# भट्टि काव्यम्।

## प्रथमः सर्गः।

---

अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः।

अथ तत्रभवान् भट्टीपाधिको भर्त्तृहरिर्नाम कविः काव्यानुगुणं रसभावादि व्याकरणशास्त्रोक्तं प्रकृतिप्रत्यय-वैचित्र्यञ्च एकत्र प्रदर्शयितुं प्रसन्नप्रकीर्णाधिकारतिङन्तैश्चतुर्भिः काण्डैर्भट्टिकाव्यं व्यरचयत्। तत्र प्रसादादिगुणगुम्फितं काव्यं श्रीरामकथाश्रयं प्रसन्नाख्यकाण्डे समग्रप्रबन्धात्मके द्वाविंशतिसर्गैर्विभक्तम्। प्रकीर्णाधिकारतिङन्तकाण्डेषु प्रबन्धान्तर्न्यायश्च पृथक् प्रदर्शितेषु व्याकरणशास्त्रमुदाहृतम्। तत्र तिङन्तकाण्डे आख्यातानि प्रकटितानि, यत्र प्राधान्येन एकैकमधिकृत्य लक्षणं प्रदर्शितं तदधिकारकाण्डम्, अधिकारकाण्डे टाधिकारामधिकारप्रभृतीनि(१) प्रकरणानि पृथक् दृष्टान्तितानि, प्रकीर्णकाण्डे च नानालक्षणानि व्याकरणशास्त्रोक्तानि युगपदव्यवस्थमुपन्यस्तानि। एतेषां मध्ये प्रकीर्णकाण्डस्य व्यापित्वात् तदेव प्रथमं उक्तम्। काव्यप्रबन्धस्य च "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि

(१) टाधिकारामधिकारप्रभृतीनि।

गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयं ॥ १ ॥

सम्मुखम्" इत्यालङ्कारिकनियमात् तदारम्भे कथानायकपितुर्दशरथस्य वर्णनरूपं वस्तु निर्दिशति, इष्टदेवतास्मरणात्मकं मङ्गलाचरणमपि प्रकाशयति, "अभूत्" इति ।

विबुध्यन्ते इति विबुधाः देवाः । विपूर्वात् बुधेः कः । तेषां सखा । यद्वा विः पक्षी जटायुः बुधा विद्वांसस्तेषां सखा विबुधसखः । "राजाहःसखिभ्यष्टच्" । परान् शत्रून् तापयति इति परन्तपः । "हियत्परयोस्तापेः" इति खच्, खचि ह्रस्वः । श्रुतेन शास्त्रज्ञानेन अन्वितः । दशसु दिक्षु अप्रतिहतगतिः रथो यस्य इति दशरथः इति नाम्ना उदाहृतः प्रसिद्धः । नॄन् पातीति नृपः अभूत् बभूव । भूतसामान्ये लुङ् । सनातनः शाश्वतो विष्णुः स्वयं साक्षात् गुणैः भीमकान्तैर्नृपगुणैः शौर्यौदार्यादिभिरित्यर्थः । वरं श्रेष्ठं यं नृपं भुवनानां भूर्भुवस्वरिति त्रयाणां लोकानां हितं दुष्टनिग्रहशिष्टपालनरूपं तदेव छलं तेन हेतुना पितरमुपागमत् पितृत्वेन स्वीचकार । तथाचोक्तं "परित्राणाय साधूनां विनाशाय च दुष्कृताम्, धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इति । "दशरथरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतं । दशपूर्वरथं यमाश्रया दशकण्ठारिगुरुं विदुर्बुधाः" इति रघौ दशरथसंज्ञां व्युत्पादयति तत्रभवान् कालिदासः । इदं कविराहृतम् । तदाह छन्दोमञ्जर्यां "जभौ सजौ गुरु चेति कविरा चतुर्दशैः" इति ॥ १ ॥

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत् सममंस्त बन्धून्।
व्यजेष्ट षड्वर्गमरंस्त नीतौ
समूलघातं न्यवधीद्रिपूंश्च ॥ २ ॥

स इति। स राजा वेदयन्ति ज्ञापयन्ति धर्माधर्मौ इति वेदाः त्रयीरूपाः, "धर्माधर्मौ त्रयीस्थितौ" इति स्मरणात्। तान् वेदान् अध्यैष्ट अधीतवान्। अधिपूर्वादिङो लुङ्। त्रयाधिकास्त्रिराहुत्ताय दश परिमाणमेषामिति त्रिदशाः त्रयस्त्रिंशत्संख्यका मुख्या देवाः द्वादशार्कैकादशरुद्राष्टवसुप्रजापतिवषट्काररूपा इत्यर्थः। "संख्यायाः परिमाणे डट्"। यद्वा तिस्रोदशा जन्मसत्ताविनाशाख्या नतु ह्रद्विपरिणामत्रया मर्त्यानामिव येषां इति त्रिदशाः। देवानां निर्जरत्वात् जन्मशैशवयौवनरूपा वा तिस्रो दशाः। तान् अयट अग्निष्टोमादिभिः पूजितवान्। यजतेः लुङ्। पितॄन् अग्निष्वात्तादीन् अपारीत् आप्यायितवान्। पॄपालनपूरणयोरित्यस्य लुङि रूपं। पितॄनतार्षीदिति पाठे श्राद्धादिना स्वधाभुजस्तोषयामास इत्यर्थः। बन्धून् मातापित्रादिभ्रातॄन् सममंस्त दानमानादिना सम्मानयायास इत्यर्थः। षण्णां कामक्रोधलोभमोहमदमात्सर्याणां वर्गस्तं व्यजेष्ट वशं निनाय। नीतौ सामादिषु सन्ध्यादिषु च उशनसा प्रोक्ते शास्त्रे वा अरंस्त निरत आसीत्। मूलं प्रकृतिः सा च अमात्यराष्ट्रदुर्गकोषादिभिर्द्विसप्तसंख्यका तेन सह इति समूलं हत्वा इति समूलघातम्। समूलोपपदात् हन्तेः णमुल्।

वसूनि तोयं घनवद्व्यकारीत्
सह्यासनं गोत्रभिदाध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थितासौ
यशांसि सर्व्वेषुभृतां निरास्यत् ॥ ३ ॥
पुण्यो महाब्रह्मसमूहयुष्टः
सन्तर्पणो नाकसदां वरेण्यः ।

अरीन् अवधीत् । तथाचोक्तं "एता प्रकृतयो मूलं मण्डलस्य समासतः" इति । अत आरभ्य इन्द्रवज्रोपेन्द्रवज्रयोः मिश्ररूपं वृत्तम् ॥ २ ॥

वसूनीति । असौ राजा तोयं घनवत् मेघ इव वसूनि धनानि व्यकारीत् सत्पात्रे विक्षिप्तवान् ददौ इत्यर्थः । गोत्रान् पर्व्वतान् भिनत्तीति गोत्रभित् इन्द्रस्तेन सह आसनं अध्यवात्सीत् एकासने उपविष्टः । अधिपूर्व्वकवसतेर्लुङ् । "उपान्वध्याङ्वसः" इति अधिकरणस्य कर्म्मसंज्ञा । त्र्यम्बकादन्यं देवं न उपास्थित आराधितवान् । उपतिष्ठतेराराधनार्थकात् लुङ् आत्मनेपदम् । सर्व्वेषां इषुमतां बाण धारिणां धन्विनामित्यर्थः यशांसि निरास्यत् निरस्तवान् धनुष्मतामग्रेसरोऽयमासीदिति भावः । निर्पूर्व्वात् अस्यतेर्लुङ स्युक् च ॥ ३ ॥

पुण्य इति । पुनातीति पुण्यः । पूञ् पवने दिवादिको यत्प्रत्ययः, ततोमुक् ह्रस्वश्च । "महती देवता होषा नरूपेण तिष्ठति" इति श्रुतेः राज्ञां पावनत्वं । महतां वेदविदां ब्राह्मणानां

जज्वाल लोकस्थितये स राजा
ययाध्वरे वह्निरभिप्रणीतः ॥ ४ ॥
स पुण्यकीर्त्तिः शतमन्युकल्पः
महेन्द्रलोकप्रतिमां समृद्धां ।
अध्यास्त सर्व्वर्त्तुसुखामयोध्यां
अध्यासितां ब्रह्मभिरिद्धबोधैः ॥ ५ ॥

समूहेन जुष्टः सेवितः । "यज्ञे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे यात्रायां पथि निद्रायां महत्यब्दौ न दीयते" इति निषेधात् महता ब्रह्मसमूहेन जुष्ट इति वा विग्रहते इति भरतः । नाके स्वर्गे सीदन्तीति नाकसदोदेवास्तेषां सन्तर्पणः इज्यादिभिस्तृप्तिप्रदः, वरेण्यो वरणीयः यो ४ इति यावत् स राजा अध्वरे यज्ञे आभिमुख्येन प्रणीतः मन्त्रेण संस्कृतोऽभिप्रणीतो वह्निर्यथा अग्निरिव लोकस्थितये लोकमर्य्यादायै मांभूलोकस्थित्यतिक्रम इत्येवमर्थी सन् इति भावः । जज्वाल दिदीपे कोपदण्डजं तेजः प्रकटयामास इत्यर्थः । उक्तानि विशेषणानि वह्नावपि योज्यानि । सोऽपि लोकस्थित्यर्थं ज्वलति । तथाचोक्तं "अग्नौ प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते । आदित्यात् जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति ॥ ४ ॥

स इति । पुण्या पावना कीर्त्तिर्यस्य सः शतं मन्यवो यज्ञाः अश्वमेधयागा यस्य स शतमन्युरिन्द्रस्तत्कल्पस्तत्तुल्यः समृद्धां महेन्द्रलोकप्रतिमां स्वर्गतुल्यां सर्व्वेषु ऋतुषु सुखां सुखकरीं

निर्माणदक्षस्य समीहितेषु
सीमेव पद्मासनकौशलस्य ।
ऊर्ध्वं स्फुरद्रत्नगभस्तिभिर्या
स्थितावहस्येव पुरं मघोनः ॥ ६ ॥
सद्रत्नमुक्ताफलवज्रभाञ्जि
विचित्रधातूनि सकाननानि ।

सघा दृढः सर्वशास्त्रपरिज्ञानात् प्रदीप्तः बोधो ज्ञानं येषां तैर्ब्रह्मभिः ब्राह्मणैरध्यासितां अध्युषितां अयोध्यां नाम नगरीं अध्यास्त अध्यवात्सीत्। अयोध्या नगरी तस्य राजधानी अभूत् इत्यर्थः ॥ ५ ॥

निर्माणेति । समीहितेषु स्वेष्टमभीप्सितेषु इत्यर्थः निर्माणदक्षस्य विरचनपटोः पद्ममासनं यस्य स पद्मासनो ब्रह्मा तस्य कौशलस्य नैपुण्यस्य सीमा मर्यादा परा काष्ठा इव स्थिता, ततो न रम्यान्तरं शोभनमासीदित्यर्थः। एवम्भूता या अयोध्या मघोनः इन्द्रस्य पुरं अमरावतीं। मघैः क्विनिप्, निपातनात् घस्य घादेशः। ऊर्ध्वमुपरिष्टात् स्फुरन्तो विभासमाना ये रत्नानामिन्द्रनीलमरकतादीनां गभस्तयो मरीचयः तैर्हासभूतैरित्यर्थः। अवहस्य "मन्तो न्यूनेषा" इत्यनादृत्य स्थिता अतिष्ठदिव। पद्मासनस्येव कौशलं यस्य इति पद्मासनकौशलस्य निर्माणदक्षस्य विश्वकर्मणः इति भरतेन व्याख्यानं कल्पते ॥ ६ ॥

सद्रत्नेति । यस्यां नगर्यां सन्ति शोभनानि रत्नानि मुक्ता-

स्त्रीभिर्युतान्यप्सरसामिवौघैः
मेरोः शिरांसीव गृहाणि यस्यां ॥ ७ ॥
अन्तर्निविष्टोज्वलरत्नभासः
गवाक्षजालैरभिनिष्पतन्त्यः ।
हिमाद्रिटङ्कादिव भान्ति यस्यां
गङ्गाम्बुपातप्रतिमा गृहेभ्यः ॥ ८ ॥

फलानि वज्राणि हीरकाणि भजन्ति यानि तानि तथोक्तानि । मुक्ताफलवज्रयोः रत्नान्तर्भावेऽपि प्राधान्यात् गोवलीवर्द्दन्यायाद्वा हयग्रहणं न दोषाय । विचित्रा धातवो मनःशिलादयश्चित्रकार्योपयोगिनो येषु तानि विचित्रधातूनि, सकाननानि रम्योपवनान्वितानि, अप्सरसां मेनकादीनां ओघैः समूहैरिव स्त्रीभिः पौरनारीभिर्युतानि गृहाणि हर्म्याणि मेरोः शिरांसि शृङ्गाणि इव स्थितानि इति शेषः । मेरोः शृङ्गाण्यपि रत्नादिमन्ति, खनिषु विविधधातुयुक्तानि सकाननानि अप्सरोभिरुपजुष्टानिच भवन्ति ॥ ७ ॥

अन्तरिति । यस्यां अयोध्यायां हिमाद्रेर्हिमालयस्य टङ्कात् उन्नतप्रदेशात् गङ्गाम्बुपातप्रतिमा गङ्गाजलप्रवाहतुल्यास्ते षां स्वच्छत्वादिति भावः, गवाक्षजालैर्वातायनसमूहैः । "जालं गवाक्ष आनाये जालके कपटे गणे" इति विश्वः । गृहेभ्यः अभिनिष्पतन्त्यः बहिर्निःसरन्त्यः अन्तः गृहमध्ये निविष्टानि निहितानि शोभार्थं ग्रथितानि उज्ज्वलानि रत्नानि तेषां भासो

धर्म्यासु कामार्थयशस्करीषु
मतासु लोकेऽधिगतासु काले ।
विद्यासु विद्वानिव सोऽभिरेमे
पत्नीषु राजा तिसृषूत्तमासु ॥ ९ ॥
पुत्रीयता तेन वराङ्गनाभिः
यानायि विद्वान् क्रतुषु क्रियावान् ।

दीप्तयः भान्ति राजन्ते । टङ्कात् पाषाणदारणात् विदीर्ण-प्रस्तर-भागात् इति भरतो व्याचष्टे तत्समर्थनार्थञ्च "टङ्कः कपित्थभेदे स्यात् मानान्तरखनित्रयोः । कोपेऽधिकोपे जङ्घायां टङ्कः पाषाणदारणे" इति विश्वमकाश्यसुपन्यस्यति । पाषाणदारण-शब्दस्य तु प्रस्तरविदारकास्त्रविशेषबोधकत्वात् चिन्त्यमेतत् ॥८॥

धर्म्यासिति । स राजा धर्म्यासु धर्म्यादनपेतासु कामार्थ-यशस्करीषु भोगसुखधनकीर्त्तिसाधनीषु लोके मतासु पूजितासु काले विवाहयोग्ये काले अधिगतासु परिणीतासु, उपनयना-व्यवहितोत्तरकाले अभ्यस्तासु इत्यन्यत्र । उत्तमासु श्रेष्ठासु तिसृषु पत्नीषु कौशम्बाकेकयीसुमित्रासु विद्यासु ऋग्यादिषु विद्वान् इव अभिरेमे निरत आसीत् ताभिरुपलब्धः सुखितो बभूव इत्यर्थः ॥ ९ ॥

पुत्रीयतेति । पुत्रीयता आत्मनः पुत्रमिच्छता तेन राज्ञा प्रयोगकुशलाभिः वरस्त्रीभिः प्रयोगाकर्त्रीभिः क्रतुषु पुत्रेष्टिप्रभृतिषु क्रियावान् प्रगल्भक्रियः निपुण इति यावत् । प्रगं-

विपक्किमज्ञानगतिर्मनस्वी
मान्यो मुनिः स्वां पुरमृष्यशृङ्गः ॥ १० ॥
ऐहिष्ट तं कारयितुं क्रतात्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्।
ज्ञाताशयस्तस्य ततो व्यतानीत्
स कर्म्मठः कर्म्म सुतानुवन्ध्यम् ॥ ११ ॥

सायां मतुप् तथाचोक्तं "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः" इति। विद्वान् वेदार्थतत्त्ववित् तच्च गुरूपदेशादेव जातमिति भावः। विपाकेन प्राक्तनानां तपसां परिणतिविशेषेण निर्वृत्ता विपक्किमा ज्ञानगतिः ज्ञानप्रवृत्तिर्यस्य स तथोक्तः। तच्च उपदेशं विना प्राग्भवीयसंस्कारादेव सम्भवमिति भावः, यद्वा अतिपरिणतज्ञानमार्ग इत्यर्थः। मनस्वी प्रशस्तमनाः। प्रशंसायां विन्। मान्यो मानार्हः "अर्हे कृत्यतृचश्च" इति खत्। मुनिः ऋष्यस्य मृगविशेषस्य शृङ्गमिव शृङ्गं यस्य इति ऋष्यशृङ्गः स्वां पुरं आनायि आनीतः ॥ १० ॥

ऐहिष्टेति। क्रतः वशीकृत आत्मा मनो येन स क्रतात्मा धृतिसम्पन्न इत्यर्थः। नृपः तं मुनीन्द्रं तापसश्रेष्ठं, पुत्रः फलं यस्य तं क्रतुं यागं कारयितुं ऐहिष्ट इयेष इच्छतेरात्मनेपदिनो लुङि रूपम्। "हेतुमण्ण्यन्तरस्याम्" इति प्रयोज्यकर्तुः कर्म्मत्वम् द्विकर्म्मकत्वञ्च। ततः अनन्तरं ज्ञात आशयो नृपाभिप्रायो येन स तथोक्तः। कर्म्मठः कर्म्मसु यागादिषु कुशलः स तस्य

रक्षांसि वेदीं परितो निरास्यत्
अङ्गान्ययाचीदभितः प्रधानम् ।
शेषाण्यहौषीत् सुतसम्पदे च
वरं वरेण्यो नृपतेरमार्गीत् ॥ १२ ॥
निष्ठां गते दक्षिमसम्भृतोर्वे
विहिविमे कर्म्मणि राजपद्म्याः ।

राज्ञः सुतमनुबध्नातीति सुतानुबन्ध्यम् सुतोत्पत्त्यनुकूलम् । "कर्म्मण्यण्" । कर्म्म यागं पुत्रेष्टिं व्यतानीत् प्रारब्धवान् इत्यर्थः ॥११॥

रक्षांसीति । वरेण्यः श्रेष्ठः स मुनिः वेदीं परितः यजनवेद्याः समन्तात् रक्षांसि यज्ञविघ्नोत्पादनार्थमुपस्थितानीति शेषः निरास्यत् निरस्तवान् । "वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पन्तु ते सर्वे ये चान्ये विघ्नकारकाः" इत्यादिभिर्मन्त्रैरिति बोध्यम् । यद्वै वसामयो यागः सा देवता तत्र प्रधानं पुत्रफलत्वादत्र विष्णुः प्रधानम् । तमिष्ट्वा तस्योभयतः पार्श्वयोः यानि अङ्गानि चक्षुरादीनि देवतान्तराणि तान्ययाचीत् अग्नौ आहुतिदानेन पूजितवान् । यजतेर्लुङि रूपम् । शेषाणि प्रतिष्ठितानि पिष्टकमयानि देवतानि च सुतानां उत्पद्यमानानां सम्पदे श्रेयसे अहौषीत् अग्नौ हुतवान् । ततः नृपतेः राज्ञः पुत्रजननार्थमित्यर्थः वरं अमार्गीत् अग्निप्रभृतिभ्यः देवेभ्योऽयाचत । यद्वा शेषाणि अहौषीत्, नृपतेः सुतसम्पदे सुता एव सम्पत् तस्यै वरमार्गीदिति अन्वयः ॥ १२ ॥

निष्ठामिति । दानेन निर्वृत्तः दक्षिमः, दक्षतेरिमच्,

प्राशुर्हुतोच्छिष्टमुदारवंश्याः
तिस्रः प्रसोतुं चतुरः सुपुत्रान् ॥ १३ ॥
कौशल्ययासावि सुखेन रामः
प्राक् कैकयीतोभरतस्ततोऽभूत् ।
प्रासोष्ट शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन ॥ १४ ॥

सभ्यानां सभासीनानां ब्राह्मणानां तोषो यत्र तत् तस्मिन् विधानेन शास्त्रोदितविधिना निर्वृत्ते विहिते विपूर्वकात् दधातेः पूर्ववत् क्विप्, कर्मणि पुत्रेष्टियागे निष्ठां समाप्तिं गते सति उदारवंश्याः महावंशोद्भवाः तिस्रो राजपत्न्यः कौशल्या-कैकयीसुमित्राः चतुरः सुपुत्रान् शोभनसुतान् प्रसोतुं जनयितुं हुतोच्छिष्टं हुतावशेषं चरुं प्राशुर्भक्षयामासुः । कौशल्या कैकयी च क्षत्रिये सुमित्रा तु वर्णसङ्करजा, अतस्तिस्र उदारवंश्या इति कविना यदुक्तं तत् नास्मभ्यं रोचते ॥ १३ ॥

कौशल्ययेति । कौशल्यया (१) प्राक् पूर्वं सुखेन, प्रकृत्यादित्वात् तृतीया, प्रसवक्लेशं विना रामः असावि प्रसूतः । पूङः

(1) There were probably two provinces of the name of Kosala, called respectively North-Kosala and South Kosala. The descendants of Ikshvaku reigned in North-Kosala and were called lords of North-Kosala or of Kosala. Kausalya must therefore have been the daughter of a king of South-Kosala, for as she was married to Dasaratha, she could not have had any blood-relationship with him.

आर्चीत् द्विजातीन् परमार्थविन्दान्
उदेजयान् भूतगणान् न्यधेधीत्।
विद्वानुपानेष्ट च तान् स्वकाले
यतिर्वसिष्ठो यमिनां वरिष्ठः ॥ १५ ॥

कर्मणि लुङि रूपम्। ततोऽनन्तरं भरतः कैकयीतः(२) अभूत् अजायत। तत एका एकैव समित्रा लक्ष्मणेन सह उदारचेष्टं महासत्त्वं शत्रुघ्नं यमजौ लक्ष्मणशत्रुघ्नौ इत्यर्थः प्रासोष्ट प्रसूतवती। प्रसूतेरात्मनेपदिनः कर्त्तरि लुङ्। "लक्ष्मणेन" इत्यत्र सहयोगे तृतीया, अत्र सहयोगस्य प्राधान्यं विवक्षितं, पित्रा सहागतः पुत्र इत्यादिवत्, तेन लक्ष्मणो जेष्ठ इति बोधम् ॥ १४ ॥

आर्चीदिति। विद्वान् ब्रह्मविद्यासम्पन्नः पौरोहित्यकर्म्मणि कुशलश्च, यमनियमेषु यतते इति यतिः, औणादिकः इः। "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्मषमिति पञ्च यमाः येषां सन्तीति यमिनः स्मृताः"। तेषां वरिष्ठः उत्तमः श्रेष्ठः इत्यर्थः वसिष्ठः परमं प्रभूतं उत्कृष्टञ्च अर्थं धनं विन्दन्ति लभन्ते इति परमार्थविन्दाः तान्। विन्देतेः शः। द्विजातीन् ब्राह्मणक्षत्रियवैश्यान् आर्चीत् दानमानादिना सम्बर्द्धयामास इत्यर्थः। उदेजयन्ते इति उदेजयाः उत्कम्पास्तान्। उत्पूर्व्वादेजतेः कम्पनार्थकात् ण्यन्तात्

(2) The Kekayas or Kaikayas appear amongst the chief nations in the war of the Mahabharata; their king being a kinsman of Krisna. The Ramayana specifies their position beyond, or west of, the Vipasa.

वेदोऽङ्गवांस्तै रखिलोऽध्यगायि
शस्त्राण्युपायंसत जित्वराणि ।
ते भिन्नवृत्तीन्यपि मानसानि
समं जनानां गुणिनोऽध्यवात्सुः ॥ १६ ॥

यः । क्रूरान् भूतगणान् दैवयोनिवेशगान् न्यपेधीत् उत्सादितवान् । स्वकाले चत्वियाणां योग्यदशायां गर्भैकादशे वर्षे तान् उपानेष्ट तेषामुपनयनसंस्कारं निरवर्त्तयदित्यर्थः । तथोक्तं "गर्भाष्टमेऽब्दे कुर्व्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः" इति । उपानेष्टेति उपपूर्वकात् आत्मनेपदिनो नीधातोर्लुङि रूपम् ॥ १५ ॥

वेद इति । "शिक्षा कल्पोव्याकरणं निरुक्तं ज्योतिषां गणः । छन्दसां निचितिश्चैव षड़ङ्गोवेदइष्यते" इति षड़ङ्गवान् वेदत्रयीरूपः तैरुपनीतैः रामादिभिरध्यगायि अधीतः अधिपूर्वकात् इङ्धातोर्लुङि रूपम् । जित्वराणि जयशीलानि शस्त्राणि धनुरादीनि उपायंसत स्वीकृतानि । उपयमः स्वीकरणे इति आत्मनेपदम् तस्मात् कर्मणि लुङ् । गुणिनस्ते रामादयः भिन्ना वृत्तयः प्रवृत्तयो येषां तानि तथोक्तानि विषयेषु भिन्नरुचीनि अपि जनानां मानसानि समं तुल्यं यथा तथा अध्यवात्सुः अधिचक्रुः, उपाधीत्यादिना अधिकरणस्य कर्मसंज्ञा । लोकोहि भिन्नरुचिरप्यासां गुणैराकृष्टाः सर्व्वेऽपि तेषु समानुरक्ता बभूवुरिति भावः ॥ १६ ॥

ततोऽभ्यगात् गाधिसुतः क्षितीन्द्रं
रक्षोभिरभ्याहृतकर्म्मवृत्तिः ।
रामं वरीतुं परिरक्षणार्थं
राजार्च्छिहत् तं मधुपर्कपाणिः ॥ १७ ॥
ऐषीः पुनर्जन्मजयाय यत् त्वं
रूपादिबोधान्यवृतच्च यत् ते ।

तत इति । ततः रक्षोभिः राक्षसैः अभ्याहृता व्याहृता कर्मणोयागादेर्वृत्तिरनुष्ठानं यस्य स तथोक्तः । गाधिसुतो विश्वामित्रः परिरक्षणार्थं यज्ञविघ्ननिरासार्थमित्यर्थः । रामं वरीतुं प्रार्थयितुं क्षितीन्द्रं दशरथं अभ्यगात् उपागमत् अभिपूर्वकात् इणधातोर्लुङि रूपम् । मधुपर्कः दधियुक्तं मधु सर्पिर्वा पाणौ यस्य सः मधुपर्कपाणिः । तदुक्तमाश्वलायनसूत्रे "दधनि मध्वानीय । सर्पिर्वा मध्वसावि" इति । राजा तं मुनिं आर्च्छिहत् पूजयामास । अर्हयतेः पूजार्थकात् लुङ् । तथाचोक्तं "राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः" इति ॥ १७ ॥

ऐषीरिति । त्वं पुनर्जन्मजयाय प्रेत्यभावरूपसंसारनिवृत्त्यै अपवर्गलाभाय इत्यर्थः यत् धामं ऐषीः, इषेर्लुङ्, वाञ्छितवान् स्वीकृतवान् इत्यर्थः । यत् ते रूपादिषु रूपरसगन्धस्पर्शशब्दाख्यपञ्चविषयेषु यो बोधस्तदादिमा धामं तत्त्वात् व्यवृतत् निरुद्धं येन धामेन परमात्मसाक्षात्काराभावप्रत्ययप्रवाहरूपेण साधनेन

तत्त्वान्यबुद्धाः प्रतनूनि येन
ध्यानं नृपस्तच्छिवमित्यवादीत् ॥ १८ ॥
आख्यन्मुनिस्तस्य शिवं समाधेः
विघ्नन्ति रक्षांसि वने क्रतूंस्तु(१)।
तानि द्विषद्दोर्व्यनिराकरिष्णुः
हृणेदु रामः सह लक्ष्मणेन ॥ १९ ॥

ते बाह्यज्ञानं निवृत्तमित्यर्थः। येन ध्यानेन प्रतनूनि सूक्ष्माणि दुर्ज्ञेयानि तत्त्वानि चतुर्विंशति-संख्यकानि महदादीनि सांख्य-दर्शनोक्तानि अबुद्धाः ज्ञातवान्। बुधयतेर्लुङि यास्। तत् ध्यानं शिवं अव्याहतं कचिदिति नृपः अवादीत्, मुनेस्तपोधनत्वात् तपसः कुशलमेव नृपतिर्भगवन्तमप्राक्षीदित्याशयः ॥ १८ ॥

आख्यदिति। मुनिर्विश्वामित्रस्तस्य समाधेर्ध्यानस्य शिवं कल्याणं उपद्रवाभावमित्यर्थः आख्यत् कथितवान्। चक्षधातोः लुङि ङविधानं ख्याञादेश्च। तत् किमत्रागमनस्य प्रयोजन-मित्यत आह विघ्नन्तीति। रक्षांसि राक्षसास्तु वने अस्माकं तपोवने क्रतून् यागान् विघ्नन्ति विघटयन्ति अतोऽयं महान् ध्यानप्रत्यूहो विद्यते इति भावः। अतो द्विषतामरीणां वीर्यस्य निराकरिष्णुर्निराकरणशीलो रामो लक्ष्मणेन सह तानि रक्षांसि हृणेदु हिनस्तु। हृहधातोर्लोट्। रामलक्ष्मणौ अस्माकं यज्ञविघ्न-कारिणो निरस्यतामित्यहं प्रार्थये इति भावः ॥ १९ ॥

(१) "क्रतूंस्तु" इत्येव पाठः साधीयान्; अस्य जयमङ्गलभरतमल्लिकाख्यासुधाख्या-मेव टीकाकृद्भ्यां धृतत्वात् प्रकृतोपयोगित्वाच्च। अतः "क्रतूंश्च" इति पाठः अनादरः प्रामादिकश्चेति सर्वथाऽयुक्तः।

स शुश्रुवांस्तद्वचनं मुमोह
राजासहिष्णुः सुतविप्रयोगम् ।
अहंयुनाथ चितिपः शुभंयुः
ऊचे वचस्तापसकुञ्जरेण ॥ २० ॥
मया त्वमाप्याः शरणं भयेषु
वयं त्वयाप्याप्महि धर्मवृद्धौ ।

स इति । सुतविप्रयोगं पुत्रविरहं असहिष्णुः सोढुमशक्तः, उदन्तवर्जनात् न क्त्योगात् कर्मणि षष्ठी । राजा तत् वचनं रामप्रयाणार्थमुक्तं यत् मुनिवाक्यं तत् शुश्रुवान् श्रुतवान् सन् । श्रुणोतेः क्सुः । मुमोह मोहमुपागतः । अथ अहंयुना अहङ्कारवता तापसानां तपस्विनां कुञ्जरः श्रेष्ठः तेन विश्वामित्रेण । "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जरसिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" इत्यमरः । शुभंयुः कल्याणभाक् । "अहंशुभमोर्युस्" इत्यस्यार्थे युस् । चितिपो दशरथः यत् यक्ष्यमाणं वाक्यं ऊचे । यचेर्दृशादिगणान्तर्गतत्वात् प्रधानस्य कर्मण उक्तत्वम्, यचेः कर्मणि लिट् ॥ २० ॥

मयेति । भयेषु यज्ञदुष्टासुपद्रवजनितेषु मया त्वं शरणं आप्याः रक्षितव्येन प्राप्तोऽसि आपेः कर्मणि ण्यत् । त्वयापि वयं धर्मवृद्धौ इज्यादिभिः प्रभूतधर्मलाभाय आप्नुमहि प्राप्तिपूर्वेण प्राप्नुमः । पूर्ववत् सुट् । तदित्थं साधं क्षत्रियतेजः द्विजस्य ब्राह्मणत्वं ब्रह्मवर्चः च परस्पराय इदं परस्परार्थं

क्षात्रं द्विजत्वञ्च परस्परार्थं
शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥ २१ ॥
घानिष्यते तेन महान् विपक्षः
स्थायिष्यते येन रणे पुरस्तात्।
मा मां महात्मन् परिभूर्योग्ये
न महिधो न्यस्यति भारमग्र्यम् ॥ २२ ॥

अन्योन्यप्रयोजनसाधनमित्यर्थः। "अर्थेन नित्यसमासः सर्व्वलिङ्गता च", इति चतुर्थीसमासः। अतः शङ्कां मा कृथा मा भैषीः। मांयोगादड़ागमनिषेधः। स्वसूनुं स्वपुत्रं रामं प्रहिणु मया सार्द्धं प्रेषय। ब्राह्मणानां रक्षणं आर्त्विज्यकर्म्मण आनृण्यार्थं क्षत्रियैरवश्यकर्त्तव्यमतः स्वपुत्रप्रेषणेन क्षत्रधर्म्मं मनुपालय इति भावः। तथाचोक्तं मनुना "नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्द्धते। ब्रह्म क्षत्रञ्च सम्पृक्तमिह चामुत्र वर्द्धते" इति। ८। २२२ ॥ २१ ॥

घानिष्यत इति। अनागतमर्थं ज्ञानेन समीक्ष्याह। पुरस्तात् अग्रतः यत् रणं युद्धं भावि परशुरामेण सार्द्धमिति भावः तस्मिन् रणे येन स्थायिष्यते, तिष्ठतेर्भावे लुट्, तेन रामेण महान् विपक्षः त्रैलोक्यविजयित्वात् स रावणोऽपि घानिष्यते हनिष्यते, किमुत इतरराक्षसाः, हन्तेः कर्म्मणि लुट्। यद्वा येन हेतुना तेन रामेण रणे पुरस्तात् अग्रतः रणशिरसि इत्यर्थः स्थायिष्यते, तिष्ठतेः कर्म्मणि लुट। अपराङ्मुखेन वर्त्ति-

क्रुध्यन् कुलं धक्ष्यति विप्रवह्निः
यास्यन् सुतस्तप्स्यति मां समन्युम् ।
इत्थं नृपः पूर्वमवालुलोचे
ततोऽनुजज्ञे गमनं सुतस्य ॥ २२ ॥

तथम्, महान् विपक्षः यज्ञद्रोही राक्षसगणश्च घातियते अतो हे महात्मन् महासत्त्व मां मा परिभूः प्रत्याख्यानेन मावज्ञासीः। ममेव विधा प्रकारो यस्य, मया विधा सादृश्यं यस्य वा इति विग्रहे मद्विधः मादृशो महानुभावो भविष्यद्भौ जनः अयोग्ये कार्यविधुरे असमर्थे जने अर्थे भयं अपयं महान्तं भारं न न्यस्यति न निक्षिपति नार्पयतीत्यर्थः। ॥ २२ ॥

क्रुध्यन्निति। यिप्र एव वह्निर्विप्रवह्निः क्रुध्यन् प्रत्याख्यानेन कोपमापद्यमानः सन् कुलं वंशं धक्ष्यति भस्मसात् करिष्यति। यद्यहं प्रजारक्षणेऽधिकृतोऽस्य वचनं न कुर्यां तदायं भृशं कोपमापन्नः शापाग्निना मदीयं वंशं भस्मीकरिष्यतीति भावः। दहतेर्लृट। सुतः यास्यन् प्रस्थास्यमानः समन्युं सशोकं मां तप्स्यति, तपेर्लृट्, मां शोकाग्निना तापयिष्यति। नृपः पूर्वं प्रथमं इत्थं अनेन प्रकारेण अवालुलोचे वितर्कयामास, अवाङ्पूर्वाल्लोचेर्लिट्। ततः सुतस्य गमनं अनुजज्ञे अनुज्ञातं तेनेति शेषः। आधातोः परस्मैपदित्वादनुपूर्वाज्ञस्य आत्मनेपदित्वे नियमाभावाच्च विभक्तिविपरिणामेनैव तेनेति कर्तृपदमध्याहर्तव्यम् ॥ २२ ॥

आशीर्भिरभ्यर्च्य ततः क्षितीन्द्रं
प्रीतः प्रतस्थे मुनिराश्रमाय।
तं पृष्ठतः प्रष्ठमियाय नम्रः
हिंस्रेषु दीप्रास्त्रधरः कुमारः ॥ २४ ॥
प्रयास्यतः पुण्यवनाय जिष्णोः
रामस्य रोचिष्णुमुखस्य धृष्णुः।

आशीर्भिरिति। ततः प्रीतः प्रसन्नः रामगमनानुज्ञया सुमनोलक्त इत्यर्थः। मुनिः क्षितीन्द्रं दशरथं आशीर्भिरभ्यर्च्य सम्भाव्य आश्रमाय प्रतस्थे चचाल। गत्यर्थक्रियायोगात् चतुर्थी। हिंस्रेषु नृशंसेषु राक्षसादिषु दीप्रास्त्रधरः शितायुधभृत् नम्रो विनयावनतः साधुषु इति शेषः। कुमारो रामः प्रतिष्ठते इति प्रष्ठमयगामिनं तं मुनिं पृष्ठतः पश्चात् इयाय, इण्धातोर्लुङ्, तमनुजगाम इत्यर्थः ॥ २४ ॥

प्रयास्यत इति। धृष्णुः शत्रुविध्वंसने प्रगल्भः। धृषेः क्नुः। तिसृणां मातॄणां अपत्यं पुमान् त्रैमातुरः कौशल्याकैकयीसुमित्रासु समपक्षपातया भक्त्या तासां समानस्नेहास्पदमित्यर्थः। यद्वा लक्ष्मणजनन्या सुमित्रया कौशल्याकैकयीदत्तपिण्डद्वयप्राशनात् लक्ष्मणस्य त्रैमातुरत्वमिति बोध्यम्। क्षत्त्रं समयं यथा तथा जितं सत्त्वं अस्त्रं शस्त्रञ्च येन स तथोक्तः। अस्यते इति अस्त्रं क्षेप्यायुधं शरादि। शस्यते हन्यते अनेनेति शस्त्रं खड्गादि इत्यनयोर्विशेषात् पृथगुपादानम्। श्रेयसि रामस्य कल्याणे

चैमातुरः क्षत्त्रजितास्त्रशस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत् ॥ २५ ॥
इषुमति रघुसिंहे दन्दशूकान् जिघांसौ
धनुररिभिरसह्यं मुष्टिपीड़ं दधाने ।

रतस्तदनुध्यानपरो लक्ष्मणः पुण्यवनाय पवित्रतपोवनाय प्रयास्यतः गमिष्यतः अतएव रोचिष्णुमुखस्य पुण्याश्रमदर्शनकौतूहलात् प्रफुल्लमुखकान्तेः जिष्णोर्जयशीलस्य रामस्य सह अध्वति गच्छतीति सध्र्यङ्। सहपूर्वादध्वतेः क्विप् सहस्य सध्र्यादेशश्च। सहचरोऽभूत् ॥ २५ ॥

इषुमतीति। पुनः पुनरतिशयेन वा दशन्तीति दन्दशूकाः दंशनशीलाः तान् हिंस्रान् राक्षसादीन्। दशतेर्यङन्तात् ण्वुलन्तात् ततो यङोलुक्। जिघांसौ हन्तुमिच्छौ अतएव इषुमति बाणसनाथे अरिभिः शत्रुभिः असह्यं सोढुमशक्यं येन धनुषा निशिताः शरादयः शत्रुभिः सुदुःसहा भवन्ति तत् इत्यर्थः। धनुः मुष्टिना पीड़यित्वा मुष्टिपीड़म्। मुष्टिशब्दोपपदे दधातौ घञ्यौ पसुम्। दधाने मुष्टिना दृढं धारयतीत्यर्थः। महामनुष्यं शिवमद्भुतं मायावर्णं वा अङ्गुलिं भवति यत् तत् अङ्गुलित्रं चर्मादिनिर्मितं अङ्गुलिच्छादं येन तस्मिन्, रघुषु रघुवंशेषु सिंह इव गौर्यादिगणयोगादिति रघुसिंहस्तस्मिन् व्रजति सति तपोवनायेति शेषः। साङ्गसिद्धयः शुभानुध्यायिन्यः पुरतरुणीः नगरयुवतयः शुरशौक्षात् दुःसहविरहदुःखादपि कथमपि मुहुरा

व्रजति पुरतरुण्यो वक्षचिवाङ्गुलिवे
कथमपि गुरुशोकान्मारुदन् माङ्गलिक्यः ॥२६॥
अथ जगदुरनीचैराशिषस्तस्य विप्राः
तुमुलकलनिनादं तूर्य्यमाजघ्नुरन्ये।

कटे न मा रुदन् न रुरुदुः शोकादुत्थितस्यापि वाष्पस्य स्तम्भमकार्षुरित्यर्थः। मांयोगादड़ागमनिषेधः। अश्रुविसर्ज्जनस्य दुर्निमित्तत्वादिति भावः। मालिनीवृत्तमिदम्। तदुक्तं "ननमयययुतेयं मालिनी भोगिलोकैः" इति ॥ २६ ॥

अथेति। अथ विप्रास्तस्य रामस्य सम्बन्धे आशिष इष्टवचनानि अनीचैरुच्चैः जगदुः ऊचुः। अन्ये वादकास्तुमुलकलनिनादं गम्भीरमधुरध्वनिं तूर्यं कांस्यतालपटहादिसमूहं आजघ्नुः। यद्वा तुमुलकलनिनादमिति आजघ्नुरिति क्रियाया विशेषणं मन्द्रमधुरध्वनि यथा तथा तूर्यं वादयामासुरित्यर्थः। आङ्पूर्वात् हन्तेर्लिट् अकर्मकत्वाभावान्न आत्मनेपदम्। अभिमतं इष्टं फलं यंसतीति अभिमतफलयंसी वाहुर्दक्षिणवाहुः चारु मनोज्ञं यथा तथा पुस्फोर पस्पन्द। दक्षिणवाहुस्पन्दनं परिणयप्रंसीति सीताप्राप्तिबीजमुपन्यस्तम्। तरुषु मार्गप्रान्तस्थितेषु वृक्षेषु सुखमासीना इति शेषः अनुकूला वामपार्श्ववर्त्तित्वात् सुभगकुलाः पक्षिणः उच्चैः अमन्दं चुक्रुशुः कूजन्ति स्म। तेषां कूजनेन भाविशुभं सूचितमिति भावः। यदुक्तं "वामे मधुर-

अभिमतफलशंसी चारु पुस्फोर वाहुः
तरुषु चुक्रुवुरुच्चैः पक्षिणश्चानुकूलाः ॥ २७ ॥

इति भट्टिकाव्ये रामोत्पत्तिर्नाम प्रथमः सर्गः ।

वाक् पक्षी इवः पक्षवितोऽयतः । अनुकूलो वहन् वायुः प्रयाणे शुभशंसिनः" इति ॥ २७ ॥

इति भट्टिकाव्यस्य टीकायां प्रथमः सर्गः ।

# द्वितीयः सर्गः ।

---

वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशाञ्च ।
निर्याय तस्याः स पुरः समन्तात्
श्रियं दधानां शरदं ददर्श ॥ १ ॥
तरङ्गसङ्गाच्चपलैः पलाशैः
ज्वालाश्रियं सातिशयां दधन्ति ।

इदानीं विजिगीषूणां कण्टकान् समुद्धर्त्तुं शरत्काले समुद्योग एव व्यवहार इति तमेव वर्णयति वनस्पतीनामिति। स रामः तस्याः पुरो नगर्या अयोध्याया निर्याय निर्गत्य समन्तात् सर्वतः वनस्पतीनां पादपानां, फलसम्पत्त्या इति भावः, सरसां जलाशयानां कमलसमृद्धया, नदीनां सरितां प्रसन्नाम्बुतया, तेजस्विनां चन्द्रनक्षत्रादीनां दीप्तिविशेषापादनेन, कान्तिभृतां मेघाद्यवरोधाभावात् शोभमानानां दिशां नैर्मल्यविधानेन इत्यर्थः, श्रियं दधानां धारयन्तीं शरदं ददर्श। वृक्षादीनां शोभाविशेषरूपं कार्यमवलोक्य शरत्कालोऽयं समायात इत्यसौ प्रत्यभिज्ञौ इति तात्पर्य्यार्थः अन्यथा कालस्य प्रत्यक्षयोग्यत्वाभावेन अनुपपत्तिः स्यात् ॥ १ ॥

तरङ्गेति। तरङ्गसङ्गात् हिल्लोलाभिघातात् चपलैः चञ्चलैः

सधूमदीप्ताग्निरुचीनि रेजुः
ताम्रोत्पलान्याकुलषट्पदानि ॥ २ ॥
विम्बागतैस्तीरवनैः समृद्धिं
निजां विलोक्यापहृतां पयोभिः ।
कूलानि सामर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ॥ ३ ॥

पत्राग्रैः पत्रैः सातिशयां अधिकां ज्वालाश्रियं दधन्ति अग्निशिखावत् शोभमानानीत्यर्थः । आकुलाः पत्राणां कम्मनवशादस्थिराः षट्पदा भ्रमरा येषु तानि अतएव सधूमदीप्ताग्निरुचीनि प्रधूमितज्वलितवह्निकल्पानि ताम्रोत्पलानि लोहितकमलानि रेजुः चकाशिरे। षट्पदानां कृष्णवर्णत्वात् धूमतुल्यत्वं पद्मानाञ्च लौहित्यात् प्रदीप्ताग्निसाम्यमिति भावः ॥ २ ॥

विम्बागतैः इति । कूलानि तीरस्थानि पयोभिः सरोभिः कर्तृभिः विम्बागतैः प्रतिविम्बितैः तृतीयेति योगविभागात् समासः तीरवनैस्तीरस्थितपादपसमूहैः पुष्पितैरित्यर्थः तैः करणभूतैर्निजां समृद्धिं श्रियं अपहृतां सुपितां विलोक्य सामर्षतया रोषादिव स्थलपद्महासैः तीरस्थितस्थलकमलविकाशैः सरोजानां पद्मानां पयःसु जातानां पद्मानां लक्ष्मीं शोभां तेनुः चक्रुरित्यर्थः । यदहि तीरेषु स्थलकमलानीव सरस्सु पद्मजानि राजन्ते इति भावः ॥ ३ ॥

निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्य्यागलदच्छबिन्दुः।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ ॥ ४ ॥
वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मीं
आलोकयाञ्चक्रुरिवादरेण ॥ ५ ॥

निशेति। नयनाम्बुकल्पैः नयनानुकारिषु पत्रेषु स्थितत्वात् नेत्रजलतुलैः निशातुषारैः रात्रिसंभूतहिमैः हेतुभूतैः इत्यर्थः पत्राणामन्तात् पर्य्यागलन्त्यद्योतन्तः अच्छा निर्मला बिन्दवः सीकरा यस्य स तथोक्तः, नदन्तः कूजन्तः पतङ्गाः पक्षिणो यत्र स नदत्पतङ्गः पतङ्गकूजनेन रोदनध्वनिमनुकुर्व्वन्निति भावः, तीरतरुः तीरस्थितवृक्षः दिनादौ उषसि कुमुद्वतीं उपारुरोदेव। कुमुदनड़ेत्यादिना डमतुप्। निशानाथस्य अस्तमनात् कुमुदिनीं निमीलितां दृष्ट्वा दयार्द्रस्तामनुशशोच इव इत्युत्प्रेक्षा। रुदेरुपसर्गयोगात् सकर्मकत्वम् ॥ ४ ॥

वनानीति। वनानि तीरोपरिस्थितकाननानि तोयानि सरांसि च निलीनभृङ्गैः संसक्तषट्पदैः अतएव नेत्रकल्पैः नयनानुकारिभिः पुष्पैर्मालत्यादिभिः सरोजैश्च आदरेण औत्सुक्यात्

प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनीश्चं सहतेऽन्यसङ्गमम् ॥ ६ ॥
दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ।

परस्परां परस्परसम्बन्धिनीं लक्ष्मीं श्रियं विस्मयवस्ति सन्ति शोभातिशयात् साश्चर्यमित्यर्थः आलोकयाञ्चक्रुरिव ॥ ५ ॥

प्रभातेति । प्रभातवातस्य आहत्या अभिघातेन कम्पिता विधूनिता आकृतिर्यस्याः सा तथोक्ता पद्मिनी कुपिता इव । कोपेऽपि शरीरकम्पनंभवतीत्यस्याःकोपः अनुमीयते । कुमुद्वती-रेणुपिशङ्गविग्रहं कुमुदिनीपरागापिङ्गलदेहम् । शठनायकोऽपि दयितान्तरसङ्गात् संक्रान्ततत्परिमलदेहो भवतीति सूचितम् । भृङ्गं निरास निरस्यति स्म तस्य प्रत्याख्यानमकार्षीदित्यर्थः । तथाहि मानिनी मानः प्रणयकोपस्तद्वन्ति नायिका अन्यया दयितान्तरेण सङ्गमो यस्य तं ईदृशं पतिं न सहते न मृष्यते, तथाभ्यस्तसंसर्गचिह्नमुपलभ्य प्रकुप्यतीति भावः ॥ ६ ॥

दत्तेति । मधु लेढुं शीलमेषामिति मधुलेहिनस्तेषां गीतौ शब्दिते दत्तावधानं अभिनिविष्टचेतसं अतः प्रशान्तचेष्टं स्थिरं हरिणं जिघांसुः हन्तुमिच्छुः मृगं विधातीति मृगावित् व्याधः । विधातेः जिघ् ततः सन्प्रत्ययं पूर्ववदस्य दीर्घत्वं । तद्वत्तया

आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित् ॥ ७ ॥
गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमभ्रम् ।
सरिन्मुखाभ्युच्चयमादधानं
शैलाधिपस्यानुचकार लक्ष्मीम् ॥ ८ ॥

सरसीसन्तरणादिरूपेष्टकार्यतत्परा ये हंसास्तेषां नादान्, "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः, आकर्णयन् शृण्वन् सन् लक्ष्ये हरिणरूपे समाधिं चित्तैकाग्र्यतां न दधे न धारयामास । भृङ्गसङ्गीतयवणेन निश्चलमपि हरिणं हन्तुं हंसकलरवाकर्णने व्यासक्तचित्तो व्याधो धृतिं न बबन्धेति भावः ॥ ७ ॥

गिरेरिति । गिरेर्नितम्बे मध्यभागे स्थितमित्यर्थः मरुता वायुना विभिन्नं विश्लेषीकृतं विचालितमित्यर्थः सरिन्मुखानां गिरिनदीनिर्गमस्थानानां अभ्युच्चयं हृद्धिं आदधानं विदधत् पर्षणेनेति भावः । अतः तोयावशेषेण जलाभावेन हिमाभं हिमस्तोमसन्निभं तद्वत् शुभ्रमित्यर्थः । जलाभावेनैव मेघस्य शुभ्रत्वं भवति जलाभावश्च हृद्ध्या सरिन्मुखाभ्युच्चयाधानेन सूचित एव । अतः "पयसोऽवशिष्टतया हिमसङ्घम्" इति यत् जैयमङ्गलेन व्याख्यातं तत् न सम्यक् । अभ्रं मेघः शैलाधिपस्य हिमवतो लक्ष्मीं श्रियमनुचकार, हिमगिरेः तुषारधवलशृङ्गमिव बभौ इति भावः । यद्यपि सरिन्मुखपदेन सरित्सागरयोः सङ्गमस्थान-

गर्ज्जन् हरिः साम्भसि शैलकुञ्जे
प्रतिध्वनीनात्मकृतान्निशम्य ।
क्रमं बबन्ध क्रमितुं सकोपः
प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥ ९ ॥
अदृश्यताम्भांसि नवोत्पलानि
रुतानि चाश्रोषत षट्पदानाम् ।

मेवाभिधीयते तथापि मुखशब्द आद्यभागार्थेऽपि वर्त्तते तथाच यस्मात् स्थानात् शैलनिर्गता नदी प्रवोढुमारभते तदेवात्र विवक्षितम् ॥ ८ ॥

गर्ज्जन्निति । साम्भसि सजले कूपादिसान्निध्यादिति भावः । शैलकुञ्जे पर्व्वतोत्सङ्गस्थितनिकुञ्जे पर्वतोपरिस्थलतादिपिहितस्थाने गर्ज्जन् हरिः सिंहः आत्मकृतान् प्रतिध्वनीन् प्रतिशब्दान् निशम्य श्रुत्वा अन्यमृगेन्द्रस्य प्रतिद्वन्द्विसिंहान्तरस्य नादान् स्पर्द्धासूचकध्वनीन् प्रतर्कयन् आकलयन् सकोपः क्रोधान्धः सन् क्रमितुं उत्पतितुं क्रमं उत्पतनानुकूलचेष्टां बबन्ध चकार इत्यर्थः । न खलु क्रोधान्धानां समीक्ष्यकारिता सम्भवतीति भावः ॥ ९ ॥

एवं सामान्यतः शरदृश्यान् वर्णयित्वा रामचेष्टितवर्णनार्थं तान् विशेषेण कथयितुमुपक्रमते अदृश्यतेति । तेन पुण्याश्रमयायिना रामेण नवोत्पलानि नवोत्पन्नकमलमण्डितानि अम्भांसि अदृश्यत दृष्टानि, षट्पदानां भृङ्गाणां रुतानि गुञ्जितानि अश्रोषत श्रुतानि च, शरविरहैः पद्मैः व्यतिषङ्गः सम्पर्कोऽस्याश्य

आघ्रायि वान् गन्धवहः सुगन्धः
तेनारविन्दव्यतिषङ्गवांश्च ॥ १० ॥
लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपाम्पृशच्च ।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्ते ॥ ११ ॥

असौ अरविन्दव्यतिषङ्गवान् अतः सुगन्धः सुरभिः वातीति वान् मन्दं मन्दं प्रवहन्, वातेः शतृप्रत्ययः, गन्धवहो वायुराघ्रायि आघ्रातश्च। सुगन्ध इत्यत्र समवायसम्बन्धेन गन्धवत्त्वाभावात् सुगन्ध आपणिक इतिवत् इकारः समासान्तो न भवतीत्यनुसन्धेयम् ॥१०॥

लतेति। ककुदि इषरूपिण इन्द्रस्य इव्यर्थः तिष्ठतीति ककुत्स्थ इक्ष्वाकुवंशीयोनृपविशेषः तस्य अपत्यं पुमान् काकुत्स्थः स रामः कुतूहलात् अदृष्टपूर्वग्रामसरय्वोभादिपदार्थदर्शनजनितकौतुकात् लतानुपातं लतां लतां अनुपात्य आवर्त्य कुसुमानि अगृह्णात्, गृहीतवान् यद्वा लतानां पातस्य पश्चात् लतानुपातमित्यव्ययीभावः, नद्यवस्कन्दं नदीं नदीं अवस्कन्द्य सर्व्वा नदीः अभिगम्य। नदीमवस्कन्द्यावस्कन्द्येति वार्थः। स्कन्देर्गत्यर्थात् घञ्। उपास्पृशत् आचमनं कृतवांश्च भरतस्तु "नद्यवस्कन्दं उपास्पृशत् स्नातवान्। नद्यामवस्कन्दः अवगाहो यत्र स्नानक्रियायामिति" व्याचष्टे। "उपस्पर्शः स्पर्शमात्रे स्नानाचमनयोरपि" इति विश्वः। चारुशिलोपवेशं चारुशिलां

तिग्मांशुरश्मिच्छुरितान्यदूरात्
प्राच्यि प्रभाते सलिलान्यपश्यत्।
गभस्तिधाराभिरिव द्रुतानि
तेजांसि भानोर्भुवि सम्भृतानि ॥ १२ ॥
दिग्वारणीर्लोचनलोभनीयाः
मृजान्वयाः स्नेहमिव स्रवन्तीः।

चारुशिलां उपविश्य, चारुशिला उपविश्य उपविश्य वा, यद्वा चारुशिलासु उपवेशोवसनं यत्रासनक्रियायां एवं, ईषत् स्मयमानो मन्दहास्यं कुर्व्वन् आस्त आसितवान्। आसेर्लङि रूपम्। यद्यपि स्मिङ्धातोरीषद्वसनमेवार्थस्तथापि ईषच्छब्देन अत्यन्तानुपलभ्यहास्यत्वेन रामस्य गाम्भीर्यं सूचितम् ॥ ११ ॥

तिग्मांशुरिति। प्रभाते स रामः अदूरात् समीपे तिग्मांशुचण्डांशुः सूर्यस्तस्य रश्मिभिः किरणैश्छुरितानि रञ्जितानि तिग्मांशुरश्मिच्छुरितानि द्रुतानि यद्वा मार्त्तण्डस्य तापाधिक्यात् द्रवीभूतानि अतएव गभस्तयो रश्मयो धाराइव गभस्तिधारास्ताभिर्भुवि सम्भृतानि पृथिवीतलमानीय एकत्र राशीकृतानि भानोः तेजांसि इव स्थितानीत्युत्प्रेक्षा। यद्वा गभस्तिधाराभिः करणभूतैः द्रुतानि सूर्यमण्डलात् चरितानि भुवि सम्भृतानि भानोस्तेजांसि इव स्थितानीत्यन्वयः अतएव प्राच्यि पूर्वस्यां दिशि अवस्थितानि प्रपूर्वादञ्चतेः क्विप्। सलिलानि अपश्यत् ॥ १२ ॥

ऋज्वायताः शस्यविशेषषण्ढीः
तुतोष पश्यन् विदृणान्तरालाः ॥ १३ ॥
वियोगदुःखानुभवानभिज्ञैः
काले नृपांशं विहितं ददद्भिः।
आहार्य्यगोभारहितैरमायैः
ऐक्षिष्ट पुंभिः प्रचितान् स गोष्ठान् ॥ १४ ॥

दिग्व्यापिनीरिति। स रामः दिग्व्यापिनीः दिशामुपान्तपर्य्यन्तं प्रसारिताः लोभयन्तीति लोभनीयाः, रमणीयादिपदवत्[1] कर्त्तर्य्यनीयः, लोचनानां लोभनीया आकर्षकाः, मृजा मार्जनं शुद्धिस्तया अन्वयः अनुगमो यासां ताः परिष्कृतगुच्छा इत्यर्थः, स्नेहं स्रवन्तीः इव स्निग्धतां चरन्तीः इव, मसृणत्वातिशय्यादियमुक्ते चा। ऋजवश्च ता आयताश्चेति ऋज्वायता अवक्रविस्तारोपलक्षिता इत्यर्थः। विदृणं तृणहीनं उत्पाटिततृणं अन्तरालं मध्यः यासां ताः शस्यविशेषाणां शाल्यादीनां षण्ढीः राजीः पश्यन् तुतोष ननन्द ॥ १३ ॥

वियोगेति। स रामः वियोगेन स्वजनविरहेण यत् दुःखं तस्य अनुभवः तस्य तत्र वा अनभिज्ञा तदनुभवरहिताः तैः तथोक्तैः तेषां पुत्रदारैः सह सर्वत्र गमनात् प्रवासक्लेशासहनाद्धा इति भावः, न कदाचिदपि सोढ़स्वजनविरहवेदनैः इत्यर्थः। काले विहितं यस्मिन् काले यावानंशोदेय इत्यवधारितं तस्मिन् काले तावन्तं नृपांशं नृपप्राप्यमंशं करं ददद्भिः अमायैरवञ्चकैः

स्त्रीभूषणं चेष्टितमप्रगल्भं
चारूण्यवक्राण्यपि वीक्षितानि ।
ऋजूंश्च विश्वासकृतः स्वभावान्
गोपाङ्गनानां सुमुदे विलोक्य ॥ १५ ॥

ऋजुस्वभावैरित्यर्थः, आहार्य्यां कटककुण्डलादिभिराहरणीयां कृत्रिमा इत्यर्थः या शोभा तया रहितैः नगरप्रसिद्धकृत्रिमभूषणाभिप्रायफलाद्यनभिज्ञैरित्यर्थः पुंभिः पुरुषैः गोपैः अर्चितान् प्यायान् गावस्तिष्ठन्ति एष्विति गोष्ठास्तान् "सुपिस्थ" इति कः ऐक्षिष्ट ददर्श । ईक्षतेर्लुङि रूपम् ॥ १४ ॥

स्त्रीभूषणमिति । स गोपाङ्गनानां गोपिकानां अप्रगल्भं सहजशालीन्ययुक्तं अतः स्त्रीभूषणं स्त्रीणामलङ्कारस्वरूपं चेष्टितं गमनासनाभाषणादिकां क्रियां, तथा अवक्राणि कटाक्षादिराहित्यात् सरलान्यपि चारूणि मनोहराणि वीक्षितानि विलोकितानि, गोपाङ्गनानयनानां भ्रूविलासानभिज्ञत्वात्, ऋजून् कौटिल्यशून्यान् विश्वासकृतः विश्वासस्य जनकान् स्वभावान् प्राभिप्रायान् च विलोक्य सुमुदे हृष्टवान् । स्वभावस्य कार्य्यविलोकनादेव तद्विलोकनव्यपदेशः । विलासशून्यमपि स्वभावमधुरं गोपाङ्गनानां चेष्टितं दृष्ट्वा स नितरां तुतोष इति भावः । तथाच "विलासा नागरस्त्रीणां न तथा रमयन्ति नः । यथा स्वभावसिद्धानि हृद्यानि वनयोषिताम्" इति ॥ १५ ॥

विवृत्तपार्श्वं रुचिराङ्गहारं
समुद्वहच्चारुनितम्बरम्यम् ।
आमन्द्रमन्थध्वनिदत्ततालं
गोपाङ्गनानृत्यमनन्दयत् तम् ॥ १६ ॥
विचित्रमुच्चैः प्लवमानमारात्
कुतूहलं वस्तु ततान तस्य ।
मेघाल्ययोपात्तवनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥ १७ ॥

विवृत्तेति । विवृत्ते तिर्यक् चलिते पार्श्वे यत्र तत् तथोक्तं, ललिताङ्गहारं मनोज्ञाङ्गविक्षेपं, "अङ्गहारोऽङ्गविक्षेपः" इत्यमरः, समुद्वहता तिर्यक् समुन्नच्छता चारुणा दर्शनीयेन नितम्बेन रम्यं मनोहरं, आमन्द्र ईषद्गभीरो यो मन्थध्वनिः दधिविलोड़नशब्दस्तेन दत्तस्तालो यत्र तत् आमन्द्रमन्थध्वनिदत्ततालं गोपाङ्गनानां नृत्यं नृत्याभिनयानुकारिणी अङ्गभङ्गी तं रामं अनन्दयत् अतोषयत् ॥ १६ ॥

विचित्रमिति । मेघाल्ययेन मेघापगमेन उपात्तं हृद्यभावात् प्राप्तमित्यर्थः यत् वनं तस्मिन् उपशोभते यत् तत् मेघाल्ययोपात्तवनोपशोभम्। वर्षासु गिरिकन्दराद्याश्रया मृगाः सम्प्रति शरदागमे वनभूमिमाश्रित्य मोदमानाश्चारुदर्शनाः सम्वृत्ता इति भावः । विचित्रं श्वेतकृष्णत्वात् शबलं, चञ्चु भवगीलं, चलिगटधीत्यादिना क्कुः, अतः आरात् उच्चैः प्लवमानं यदृच्छया

सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु ।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥ १८ ॥

समीपमागत्य पलायितुं प्रसभादुत्पतत् वातमजति वाताभिमुखं गच्छतीति यातमजम् । वातोपपदादंजतेः खश् । अयमेव हि हर्षभरोन्मत्तानां मृगाणां स्वभावो यदनिलाभिमुखे प्रधावनम् । तथाहि कुमारे "मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विक्षिप्तदृष्टिपाताः । मदोद्धताः प्रत्यनिलं विचेरुर्वनस्थलीर्मर्म्मरपत्रमोक्षाः" इति । मृगाणां कदम्बकं हृन्दं तस्य कुतूहलं कौतुकं दर्शनौत्सुक्यं ततान विदधौ ॥ १७ ॥

सितेति । सितारविन्दप्रचयेषु धवलकमलसङ्घेषु संसक्तफेनेषु संलग्नहिण्डीरेषु सैकतेषु सिकतामय-प्रदेशेषु पुलिनेषु च लीनाः सम्वृतशरीराः कुन्दावदाताः कुन्दकुसुमशुभ्राः कलहंसमालाः कादम्बराजयः । "कादम्बे कलहंसः स्याद्राजहंसे च हंसके" इति । श्रोत्रसुखैः श्रवणसुखदैः निनादैर्ध्वनिभिः प्रतीयिरे ज्ञाताः तेनेति विभक्तिविपरिणामेन सम्बन्धः । प्रतिपूर्वात् इणधातोः कर्मणि लिट् । पुण्डरीकेषु सैकतेषु च लीयमानाः कलहंसा धवलत्वात् तेषामेकावयवत्वे नोपलभ्या न खलु यावत् श्रवणतया विभाविताः यावत् श्रवणिताः ॥ १८ ॥

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तत् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः॥ १९॥
तं यायजूकाः सह भिक्षुमुख्यैः
तपःक्षयाः प्रत्युदकुम्भहस्ताः।

यदवर्णनमुपसंहरन्नाह नेति। किमधिकेन सर्वथा तत् जलं न, यत् सुचारुपङ्कजं मनोज्ञसरोजशोभितं न बभूव। तथा तत् पङ्कजं न, यत् न लीनाः न संसक्ताः षट्पदा भ्रमरा यत्र तत् अलीनषट्पदं आसीत्। असौ षट्पदो न, यः कलं मधुरास्फुटं न जुगुञ्ज न गुञ्जितवान्, गुञ्जधातोर्लिट्। अपिच तत् गुञ्जितं न, यत् मनो न जहार आचकर्ष रामस्य लोकस्य वा इति शेषः॥ १९॥

तमिति। तपसा पराकचान्द्रायणादिव्रतैः क्षयाः क्षीणा यायजूका अत्यर्थं यजनशीला वानप्रस्थाः। यजतेर्यङन्तात् ऊकः ततो यङोलुक्। भिक्षुमुख्यैः परिव्राजकप्रधानैः सह यान्त्यर्थं य उदकुम्भः स हस्ते येषां ते तथोक्ताः सन्तः। उदकस्योदादेशः। जगदर्चनीयं जगतां पूज्यं विष्णोरवतारत्वात् सकलैः वन्दनीयं तं प्राणधुः आचारात् शिरसि शान्त्युदकाभ्युक्षणेन सम्भावयामासुरित्यर्थः। तथा अर्चां महनीयचरिता यायावरा अनियतयायिभवना अन्ये मुनयः। यातेर्यङन्तात् वरच् यटो लुक्च।

यायावरां: पुष्पफलेन चान्ये
प्राणर्चुरर्च्यां जगदर्च्यनीयम् ॥ २० ॥
विद्यामथैनं विजयां जयाय
रक्षोगणं क्षिप्रमविक्षतात्मा ।
अध्यापिपद्गाधिसुतो यथावत्
निघातयिष्यन् युधि यातुधानान्(१) ॥२१॥

केचित् तु यायावरा इत्यत्र याधातोर्ज्ञानार्थत्वं कल्पन्ते, "सर्व्वे गत्यर्थाः प्रायर्था ज्ञानार्थाश्च" भवन्ति इति नियमबलात्। तन्मते यायावरा अत्यर्थज्ञानशीला इत्यर्थः। पुष्पाणि फलानि च तेषां समाहारः पुष्पफलम्। जातिरप्राणिनामिति द्वन्द्वैकवद्भावः। तेन तं प्राणर्चुः पूजितवन्तः। तपोवनसन्निधानमुपागतो राम-स्तत्रत्यैः वैखानसैः यतिभिरन्यैरनियतनिलयैः मुनिभिश्च सर्व्वै-रेवाभिनन्दित आसीदिति भावः ॥ २० ॥

विद्यामिति। अथ अविक्षतो रागादिना अनभिभूत आत्मा चित्तवृत्तिः यस्य स तथोक्तः जितेन्द्रिय इत्यर्थः। एतेन तद्दत्ता विद्या अमोघा भविष्यतीति सूचितम्। युधि युद्धे यातुधानान्

आयोधने स्यायुक्तमस्त्रजातम्
अमोघमभ्यर्णं महाहवाय।

राक्षसान् निघातयितुम् मारयितुम्, रामहारेति शेषः, गाधिसुतो गाधिराजपुत्रो विश्वामित्रः रक्षोगणं क्षिप्रं, वसिष्ठधौम्यादिना क्तुः, न लोकेति षष्ठीप्रतिषेधात् द्वितीयैव। अभिभवितुं समर्थं एनं रामं विजयां जयां च नाम विद्यां जयजनकं मन्त्रविशेषद्वयं यथावत् यथागास्त्रं अध्यापिपत् अध्यापितवान्। णिजन्तस्याधिपूर्वस्य इङो लुङि रूपम्। क्षिप्रमिति विद्यामित्यस्य विशेषणमिति केचित्। एनमिति इदमसमानार्थकस्य एनशब्दस्य रूपम् ॥ २१ ॥

न केवलं दैवेन किन्तु याज्ञेनाप्युपायेन तस्य अजेयत्वं प्रति-

---

नीतरे प्रतिपत्त्ये त्वत्तुल्योवा भविष्यति।
एतद्विद्याद्वयं प्राप्य यशश्चाप्यमवाप्स्यसि ॥
बलामतिबलाञ्चैव ज्ञानविज्ञानमातरौ।
क्षुत्पिपासे च राम त्वं नाशयं पोढयिष्यतः ॥
जयञ्च दुर्गकान्तारप्रदेशेष्वटवीषु च।
सारतां विषु लोकेषु गमिष्यसि च राघव ॥
पितामहसुते क्षीते विद्ये चायुष्यशाश्वते।
पाव्यं त्वमसि काकुत्स्थ विद्ययोर्द्वयोरनयोः ॥
स्वभावजैर्गुणैर्दिव्यैः कर्मजैर्बहुभिर्वृतः।
भूयस्त्वं गुणोत्कर्षमेते विद्ये करिष्यतः ॥
ततो रामो जगत्यूचे मात्रमिः प्रवरः स्थितः।
प्रतिजग्राह ते विद्ये विश्वामित्रात् तपोधनात्।

Adikanda, Chapter xxv.

ददौ वधाय क्षणदाचराणां
तस्मै मुनिः श्रेयसि जागरूकः ॥ २१ ॥
तं विप्रदर्शं कृतघातयत्ना
यान्तं वने राक्षिचरी डुढौके।
जिघांसुवेदं धृतभासुरास्त्रः
तां ताड़काख्यां निजघान रामः ॥ २२ ॥

पादितमित्याह आयोधने इति। श्रेयसि तत्कल्याणे जागरूकः सावधानोमुनिः क्षणदाचराणां निशाचराणां राक्षसानां वधाय निधनार्थं अभ्यर्णमहाहवाय आसन्नतुमुलसंग्रामाय तस्मै रामाय। आह्वयन्ते योद्धारोऽस्मिन् युद्धायेति आहवः, आङ्पूर्वकात् ह्वयतेः अप्। अभ्यर्ण इति अभिपूर्वादर्द धातोः क्तः निपातनात् साधु। आयुध्यन्ते अस्मिन् इति आयोधनंसंग्रामः तस्मिन् स्थायुकं स्थितिकरणशीलं अभङ्गुरं जयावहत्वादिति भावः अतएव अवन्ध्यं अमोघत्वात् अमोघं अस्त्रजातं अस्त्रसमूहं ददौ ॥ २२ ॥

तमिति। सर्व्वान् विप्रान् दृष्ट्वा विप्रदर्शम्। "कर्मणि दृशविदोः साकल्ये" इति णमुल्। रामादीन् सर्वानेव विप्रान् मन्यमानेत्यर्थः। कृतघातयत्ना कृतमारणाभियोगा राक्षिचरी वने यान्तं तं रामं डुढौके आससाद। ढौकधातोर्गत्यर्थात् लिट्। जिघांसुं विदित्वा जिघांसुवेदं, पूर्ववत् णमुल। हन्तुमिच्छुरियमिति ज्ञात्वा एतं गृहीतं भासुरं दीप्तमस्त्रं येन

अथालुलोके हुतधूमकेतु-
शिखाञ्जनस्निग्धसमृद्धशाखम्।
तपोवनं प्राध्ययनाभिभूत-
समुच्चरच्चारुपतत्त्रिशिञ्जम्॥ २४॥
क्षुद्रान् न जन्तुर्हरिणान् मृगेन्द्राः
विशश्वसे पक्षिगणैः समन्तात्।

स तथोक्तः रामः अपि ताड़काख्यां ताड़काभिधानां तां निशाचरीं निजघान निहतवान् हन्तेर्लिट्॥ २३॥

अथेति। अथ राक्षसीं हत्वा रामः हुतो यो धूमकेतुरग्निः तस्य शिखा अर्चिः तस्याः अञ्जनं तेन स्निग्धा मसृणीकृताः सान्द्रीकृता वा। "स्निग्धन्तु मसृणे सान्द्रे" इत्यमरः। समृद्धाः फलपुष्पसम्पदन्विताय शाखाः यस्य तत् तथोक्तम्। तथा प्राध्ययनेन वेदपाठेन अभिभूता तिरस्कृता समुच्चरन्तौ समुद्गच्छन्तौ चार्वी श्रुतिसुखा पतत्रिणां पक्षिणां शिञ्जा अस्फुटशब्दः यत्र तत् तथोक्तं तपोवनं आलुलोके। अपश्यत् ददर्श। यद्यपि धूमकेतुशब्द उत्पातविशेषे रूढ़स्तथापि धूमः केतुरिव ध्वजमनुमानसाधनं यस्येति योगादनलार्थे वर्त्तते॥ २४॥

क्षुद्रानिति। तत्र तपोवने मृगेन्द्राः सिंहाः क्षुद्रान् हीनबलान् हरिणान् न जन्तुः भक्षयामासुः। भक्षेर्लिटि रूपम् अदो घसादेशः। पक्षिगणैः काकोलूकादिभिर्जातिविरोधिभिः सङ्कुलैः समन्तात् सर्व्वत्र विशश्वसे विश्वस्तम् भावे लिट्। पर-

नंनम्यमानाः फलदित्सयेव
चकाशिरे तत्र लता विलोलाः ॥ २५ ॥
अपूपुजन् विष्टरपाद्यमाल्यैः
आतिथ्यनिष्णा वनवासिमुख्याः ।
प्रत्यग्रहीष्टां मधुपर्कमिश्रं
तावासनादि क्षितिपालपुत्रौ ॥ २६ ॥
दैत्याभिभूतस्य युवामवोढुं
मग्नस्य दोर्भिर्भुवनस्य भारम् ।

स्खरादशङ्कमानैः स्थितमित्यर्थः । तपोवनमहिम्ना तत्र ऐकान्तिकोऽहिंसाराहित्यमासीदिति भावः । विलोला वायुविधूनिता लताः फलानां दित्सा दानेच्छा तया इव मुनिभ्यः फलानि प्रदातुमिव नंनम्यमाना अतिशयेन अवनम्रा भवन्त्यः । नमतेर्यङ् ततः शानच् । चकाशिरे शुशुभिरे ॥ २५ ॥

अपूपुजन्निति । आतिथ्ये अतिथिसत्कारे निष्णाः कुशलाः, निपूर्वकात् स्नाधातोः कः, "निनदीभ्यां स्नातेः कौशले" इति पत्वम् । वनवासिषु मुख्याः श्रेष्ठाः मुनिपर्य्या इत्यर्थः । विष्टरपाद्यमाल्यैः कुशासनपादार्घोदकस्रग्भिः अपूपुजन् पूजितवन्तः सविति शेषः । तौ क्षितिपालपुत्रौ राजकुमारौ मधुपर्केण मिश्रं युक्तं तेन सह इत्यर्थः आसनादि प्रत्यग्रहीष्टां स्वीचक्रतुः, आपूर्वकात् ग्रहेर्लुङ् ॥ २६ ॥

दैत्येति । युवां नरनारायणऋषी भवन्तौ, दितेरपत्यानि

हवींषि सम्प्रत्यपि रक्षतं नौ
तपोधनैरित्यभिधापिपाताम् ॥ २७ ॥
तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुत कर्म धर्म्यम् ।
तपोमरुद्भिर्भवतां शराग्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु ॥ २८ ॥

दैत्यास्तैरभिभूतस्य उपप्लुतस्य मग्नस्य नष्टप्रायस्य भुवनस्य भारं दोर्भिर्भुजैर्भुजबलेन अवोढुं धारितवन्तौ। वहेर्लुङ्। पुरा किल हिरण्याक्षादिभिरुपद्रुतं सङ्कटमापन्नं भूमण्डलमुद्धृत्य भवद्भ्यां स्वभुजवीर्य्यं प्रख्यापितमित्यर्थः। सम्प्रत्यपि अधुनापि हवींषि अस्माकं हवनीयानि मारीचादिभिरुपहन्यमानानीति शेषः। रक्षतं प्रार्थनायां लोट्, इत्यं तौ क्षितिपालपुत्रौ तप एव धनं येषां तैस्तपोवीर्य्यवद्भिर्मुनिभिरभिधापितौ। भाषेः कर्मणि लुङ् ॥ २७ ॥

तानिति। अथ रघोरपत्यं राघवः रामोऽपि यूयं ईप्सितमनतिक्रम्य यथेप्सितं यथेच्छं धर्म्यादनपेतं धर्म्यं कर्म यागादि प्रस्तुत प्रारभध्वं। प्रपूर्वात् प्रारम्भार्थकात् स्तौतेः नियोगकरणे लोट्, मध्यमपुरुषबहुवचनम्। नोऽस्माकं शराग्निः भवतां तपांसि एव मरुतस्तै स्तयोक्तैः करणभूतैः समिध्यते यैस्तानि समिन्धनानि दाह्यद्रव्याणि अरयः शत्रव एव समिन्धनानि तेषु संधुक्ष्यतां दीप्यताम्। इति तान् तपोधनान् प्रत्यवादीत् प्रत्युक्तवान्।

प्रतुष्टुवुः कर्म्म ततः प्रकृतैः
ते यज्ञियैर्द्रव्यगणैर्यथावत् ।
दक्षिण्यदिष्टं कृतमार्त्विजीनैः
तद् यातुधानैश्चिचिते प्रसर्पत् ॥ २९ ॥
आपिङ्गरुचोर्द्ध्वशिरस्यवालैः
शिरालजङ्घैर्गिरिकूटदम्नैः ।

भवन्तो यागमारभन्तां, यदि यातुधानास्तमुपहन्तुमागच्छन्ति, तदा तान् हनिष्यामीति रामस्तेभ्यः प्रतिशुश्राव इत्यर्थः ॥२८॥

प्रतुष्टुवुरिति । ततो रामवचनान्तरं ते मुनयः दक्षिणां अर्हन्तीति दक्षिण्या ब्रह्मत्वेनारोपिताः महर्षयः तैर्दिष्टं कथितं प्रदर्शितं, ऋतौ यजन्तीति ऋत्विजः यजेःक्विप्, ऋत्विजां कर्म्म आर्त्विजं तस्मिन् निपुणा आर्त्विजीनास्तैः कृतमनुष्ठितं कर्म्म यागादि प्रकृतैः सम्भृतैः यज्ञाय हितानि यज्ञियानि तैर्द्रव्यगणैः हवनीयवस्तुजातैः करणैः यथावत् यथाविधि प्रतुष्टुवुरारब्धवन्तः । ततः प्रसर्पत् हविं गच्छत् तत् कर्म्म यातुधानैः राक्षसैः चिचिते आतम् । चितेः कर्म्मणि लिट् । यदा खलु आरब्धं कर्म्म बहुधे, तदैव तत् सर्व्वं रक्षोभिरुपसव्यमभूदित्यर्थः ॥ २९ ॥

आपिङ्गेति । ततः यज्ञारम्भानन्तरं आपिङ्गा विद्युदिव ईषत्कपिलाः रुचाः छेदाभावादमर्षणा ऊर्द्धा ऊर्द्धं प्रसृताः गिरौ भवाः गिरेया वासाः येषां तैः तथोक्तैः । गिराः सन्ति एषामिति गिरासा जङ्घाः येषां तैः गिरासजङ्घैः । गिरि-

ततः चपाटैः पृथुपिङ्गलाक्षैः
खं प्रावृषेण्यैरिव चानशेऽब्दैः ॥ २० ॥
अधिज्यचापः स्थिरबाहुमुष्टिः
उदञ्चिताक्षोऽञ्चितदक्षिणोरुः।
तान् लक्ष्मणः सन्नतवामजङ्घो
जघान शुद्धेपुरमन्दकर्णी ॥ २१ ॥

कूटदघ्नैः गिरिशृङ्गप्रमाणैः। प्रमाणे दघच्। "कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः। पृथूनि पिङ्गलानि अक्षीणि येषां तैः चपायां रात्रौ अटन्ति चरन्ति ये ते चपाटास्तैः निशाचरैः प्रावृषि वर्षासु भवैः प्रावृषेण्यैः अब्दैर्मेघैरिव खं आकाशं आनशे व्याप्तम्। अशूङ् व्याप्तौ कर्मणि लिट्। चकारोऽव वाक्यालङ्कारार्थः। न केवलं चिचिते आनशे च इति वा चकारार्थः ॥२०॥

अधिज्यचाप इति। ज्यामधिगतः अधिज्यः समौर्वीकः, यद्वा अधिरूढा ज्या गुणो यत्र स अधिज्यः आरोपितगुणः चापः धनुः यस्य स तथोक्तः। स्थिरबाहुमुष्टिः निश्चलभुजमुष्टिः स्थिरबाहुमुष्टित्वात् अव्यर्थसन्धानोऽयममोघास्त्र इति ध्वन्यते। उदञ्चिते उत्क्षिप्ते अक्षिणी यस्य स उदञ्चिताक्षः आकाशस्थापितदृष्टिरित्यर्थः। अञ्चितः पराङ्मुखीकृतो दक्षिणोरुर्येन स तथोक्तः। सन्नता अपतः समाकुञ्चिता प्रसारिता इति यावत् वामजङ्घा यस्य स सन्नतवामजङ्घः प्रत्यालीढाख्यस्थानवान् स्थित इत्यर्थः(1)।

(1) See Mallinatha's commentary on Ch. 52 of Raghuvansa, canto III.

गार्धेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचनमस्खचुक्षुः ।
स्थास्नुं रणे स्मेरमुखो जगाद
मारीचमुच्चैर्वचनं महार्थम् ॥ ३२ ॥
आत्मम्भरिस्त्वं पिशितैर्नराणां
फलेग्रहीन् हंसि वनस्पतीनाम् ।

शत्रे पुः क्षितसायकः अमन्दं दृढं कृष्ट्वा शीलमस्य स अमन्दकर्मी कर्णान्ताकृष्टचापः लक्ष्मणः तान् निशाचरान् जघान हतवान् ॥ ३१ ॥

गार्धेयेति । अस्खैः ख्यातः अस्खचुक्षुः चुक्षुप्रत्ययः, रामोऽपि रामश्च पूर्वोक्तसमुच्चयार्थोऽपिशब्दः । स्मे स्मुखो मन्दहासयुक्ताननः सन् तस्यानुध्यचित्तत्वादिति भावः । गार्धेरपत्यं पुमान् गार्धेयो विश्वामित्रस्तेन दिष्टं कथितं विरसं कर्कशं यथा तथा रसन्तं क्रोशन्तं मायाचनं मायया ख्यातम् । विक्ते चुक्षुचणौ इति चनः । रणे स्थास्नुं स्थितिशीलं तस्य सेनापतित्वेन पौरुषातिशयादिति भावः । मारीचं ताडकासुतं महार्थं गुर्वर्थप्रतिपादकं वचनं वक्ष्यमाणरूपमुच्चैरुच्चैर्जगाद उक्तवान् ॥ ३२ ॥

आत्मम्भरिरिति । नराणां पिशितैर्मांसैः आत्मानं बिभर्त्ति इति आत्मम्भरिस्त्वं वनस्पतीनां द्रुमाणां फलानि गृह्णन्ति (औविकार्यमादत्ते ये ते फलेग्रहयस्तान् मुनीन् । आत्मम्भरिः फलेग्रहिशब्दौ निपातनात् सिद्धौ । हंसि मारयसि । येषां

गौवस्तिकत्वं विभवा न येषां
व्रजन्ति तेषां दयसे न कस्मात् ॥ २३ ॥
अद्मो द्विजान् देवयजीन् निहन्मः
कुर्म्मः पुरं प्रेतनराधिवासम् ।
धर्म्मो ह्ययं दाशरथे निजो नः
नैवाध्वकारिप्यहि वेदवृत्ते ॥ २४ ॥

विभवाः पार्थिवसम्पत्तयः क्षोभयितार इति गौवस्तिका अस्मत्सुट् चेति ठङ् तुड़ागमश्च। तेषां भावः गौवस्तिकत्वं भाविदिनस्थायित्वं न व्रजन्ति, तेषां कथं न दयसे सुतरां दयितुमर्हसीति भावः। अधीगर्थदयेशामिति कर्म्मणि षष्ठी ॥ २३ ॥

नहि दयालुत्वमस्माकं धर्म इत्याह अद्म इति। द्विजान् ब्राह्मणक्षत्रियवैश्यान् अद्मः भक्षयामः। देवान् यजन्ति आराधयन्ति ये ते तान् देवयजीन् याज्ञिकान्। यजतेरौणादिक इप्रत्ययः। निहन्मः मारयामः। जासिनिप्रहणेत्यत्र सज्ञातविष्टहीतविपर्य्यस्तग्रहणात् षष्ठी प्राप्तापि न भवति कर्म्मणः शेषत्वेनाविवक्षितत्वात्। पुरं नगरं बहुजनपूर्णमपि प्रेतनराधिवासं मृतमनुष्यवसतिं श्मशानतुल्यं कुर्मः। कस्मादेवं पापमाचरसीत्यत आह धर्म्मोह्ययमिति। हे दाशरथे दशरथनन्दन अयं द्विजादिद्रोहलक्षणः नः अस्माकं निजः आत्मीयो नित्यो धर्म आचारः। ययं वेदवृत्ते वेदविहितं वृत्तमिति मध्यपदलोपी समासः, वेदोक्ते कर्मणि अग्निहोत्रादौ नैव अध्व-

धर्म्मोऽस्ति सत्यं तव राक्षसायम्
अन्यो व्यतिस्ते तु ममापि धर्म्मः ।
ब्रह्मद्विषस्ते प्रणिहन्मि येन
राजन्यवृत्तिर्धृतकार्म्मुकेषुः ॥ ३५ ॥

कारिष्यहि अधिकृता विधात्रेति शेषः । अधिकरोतेः कर्मणि लुङ् । योहि वैदिको धर्मः स द्विजादीनामुक्तः अस्माकन्तु राक्षसानां नरशोणितोचितानां वेदोनानुसर्त्तव्य इति तात्पर्य्यार्थः ॥ ३४ ॥

धर्म इति । रक्ष्यते हविरस्मादिति रक्षः अपादाने अस् । रक्ष एव राक्षसः । स्वार्थे अण् । स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति पुंस्त्वम् । हे राक्षस यज्ञद्रोहिन् तव अयं धर्मः पराभिद्रोहलक्षणः अस्ति सत्यं असंशयं भवत्येव । ममापि तु अन्यः अस्मात् पृथग्रूपो दुष्टनिग्रहात्मको धर्मो व्यतिस्ते व्यतिभवते । यथा तवायं धर्मस्तथा ममापि अनीदृशः कश्चित् धर्मो विद्यते इत्यर्थः । व्यतीहारे अस्ते रामनेपदमकारलोपश्चापि, व्यतीहारश्च परस्परमेकजातीयक्रियाकरणम् । येन धर्महेतुना रात्रः अपत्यानि राजन्याः क्षत्रियाः तेषां वृत्तिराचारो यस्य स राजन्यवृत्तिः दुष्टनिग्रहव्यवसायः अतएव धृतकार्म्मुकेषुः उपात्तधनुर्बाणः अहं ब्रह्मद्विषो वेदद्वेषिणस्ते तव रक्षिष्यन्ति स्वां हनिष्यामि । वर्त्तमानसामीप्ये लट् । जासिनिप्रहणेति कर्मणि षष्ठी ॥ ३५ ॥

इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनिशाविहारौ।
तृणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्यत् ॥ २६ ॥
जग्मुः प्रसादं द्विजमानसानि
द्यौर्वर्षुका पुष्पचयं बभूव।

इत्यमिति। निशायां विहारो यस्य स निशाविहारी निशाचरो मारीचः रामश्च निशाविहारश्च तौ इत्थं पूर्वोक्तप्रकारः प्रवादः वाक्कलहो यत्र तं इत्थंप्रवादं संग्रहारं संग्रामं युध्यन्ते अस्मिन्निति युधि रणभूमौ प्रचक्रतुः वाग्युद्धानन्तरं आयुधैः युयुधाते इत्यर्थः। अथ रघूणां रघुवंश्यानां नन्दनो नन्दयिता रामः रक्षः मारीचं तृणाय मत्वा तृणवत् सुतरां निशाचर इति तं अवगणय्य। "मन्यकर्मण्यनादरे" इति चतुर्थी। बाणेन एकेनैव मार्गणेन प्रधनात् संग्रामात् निरास्यत् दूरमपनीतवान् ॥ २६ ॥

जग्मुरिति। द्विजानां मानसानि द्विजमानसानि प्रसादं अव्याकुलत्वं जग्मुर्गतानि यज्ञविघ्नं निरासादिति भावः। द्यौः स्वर्लोकः पुष्पचयं वर्षुका बभूव भवति स्म 'वर्षतीति वर्षुका, वृषेर्लषपतेत्यादिना उकङ् न सोकेति षष्ठीनिषेधः। यज्ञविघ्नमुच्छेदे यज्ञांशभागिभिः देवैः पुष्पवृष्टया तयोरभिनन्दनमुचितमिति भावः। इज्या यागः। यजतेर्भावे

निर्व्याजमिज्या वृत्ते वचश्च
भूयो बभाषे मुनिना कुमारः ॥ ३७ ॥
महीयमाना भवतातिमात्रं
सुराध्वरे घस्मरजित्वरेण ।
द्विषोऽपि वज्रायुधभूषणायाः
क्षिणीयते वीरवती न भूमिः ॥ ३८ ॥
बलिर्बबन्धे जलधिर्ममन्थे
जघ्नेऽसुरं दैत्यकुलं विजिग्ये ।

क्यप् ततः स्त्रियामाप् । निर्व्याजं निर्विघ्नं वृत्ते अनुष्ठितं बभूव । मुनिना कौशिकेन च कुमारो रामो भूयः पुनरपि वचः वक्ष्यमाणं वाक्यं बभाषे उक्तः ॥ ३७ ॥

महीयमानेति । सुरान् उद्दिश्य यः अध्वरो यज्ञस्तस्मिन् घस्मराणां अदनशीलानां उपद्रोहिणां जित्वरेण अभिभाविना । घसेः क्मरच् जयतेश्च क्वरप् । भवता अतिमात्रं अत्यर्थं महीयमाना सम्यक्पालनात् पूजयमाना वीरवती भवदधिष्ठानादिति भावः भूमिः पृथिवी वज्रायुधभूषणाया महेन्द्रासङ्गतायाः दिवः स्वर्गस्यापि न क्षिणीयते न सज्जते प्रत्युत प्रतिस्पर्धते इति भावः । महीक्षिणोडेति क्षप्प्रादिगणपठितत्वात् यक् ततः मानच् ॥ ३८ ॥

बलिरिति । येन भवता वामनावस्थायां बलिर्विरोचनसुतो बबन्धे बद्धः स्वर्गराजगात् भ्रंशयित्वा पातालं सदिपातितः

कल्पान्तदुःस्था वसुधा तयोद्धे
येनैष भारोऽतिगुरुर्न तस्य ॥ ३९ ॥
इति ब्रुवाणो मधुरं हितञ्च
तमाश्विहत् मैथिलयज्ञभूमिम्।
रामं मुनिः प्रीतमना मखान्ते
यशांसि राज्ञां निजिघृक्षयिष्यन् ॥ ४० ॥

जलधिर्मन्थे मथितः, अक्षतं जङ्घे मोहिनीरूपेणासुरान् विभ्राम्य हतं, दैत्यकुलं विजिग्ये अनेकधा विजितं, तथा कल्पान्तदुःस्था प्रलयजलधिमग्ना वसुधा पृथ्वी जङ्घे वराहावतारेण उद्धृता। तस्य भवतः एष अस्मदाद्यरक्षणात्मको भारः अतिगुरुर्दुर्भरो न भवति। सर्गस्थितिप्रत्यवहारहेतोः साक्षात् परमेष्ठिनस्ते कियानयं भार इति भावः ॥ ३९ ॥

इतीति। इति अनेन प्रकारेण मधुरं श्रोत्रसुखं मनोहारीत्यर्थः हितं पथ्यञ्च ब्रुवाणः कथयन् प्रीतमनाः यज्ञदृढामभिभवात् हृष्टचित्तः स मुनिः मखान्ते यज्ञकर्मावसाने राज्ञां यशांसि शूरत्वकीर्तिं निजिघृक्षयिष्यन् निग्रहीतुमेषयिष्यन् रामं स्वकीर्त्यपनेन वीरम्मन्यानां नृपाणां भुजाश्रितां, ख्यातिं तिरस्कर्तुं प्रवर्त्तयिष्यामीति कृतमनोरथः सन्नित्यर्थः। निपूर्वात् यक्षातेः सनि कृते षिच् ततः सप्तम्यर्थः। तं रामं मिथिलानां राजा मैथिलस्तस्य यज्ञभूमिं आश्विहत् गमयति स्म। अर्हैं गत्वामिति धातोर्णिजन्तस्य तुडि रूपम् ॥ ४० ॥

इतः स्म मित्रावरुणौ किमेतौ
किमश्विनौ सोमरसं पिपासू ।
जनं समस्तं जनकाश्रमस्थं
रूपेण तावौजिहतां नृसिंहौ ॥ ४१ ॥
अजिग्रहत् तं जनको धनुस्तत्
येनार्दिदत् दैत्यपुरं पिनाकी ।

इत इति । एतौ अत्रागतौ युवानौ किं सोमरसं सोमलतानिष्कृष्टं यज्ञियं पानीयविशेषं पिपासू पातुमिच्छू मित्रावरुणौ आदित्यवरुणौ । देवताद्वन्द्वे इत्यानङ् । उत किं तादृशौ सोमरसं पिपासू अश्विनौ अश्विनीकुमारौ इतः स्म इमां यज्ञभूमिं प्राप्तौ । एतौ स्म इति पाठे एतौ आगतौ, स्मशब्दः पादपूरणार्थकः । इति अनेन प्रकारेण नरौ सिंहौ इव नृसिंहौ मनुष्यश्रेष्ठौ तौ रामलक्ष्मणौ रूपेण कान्तिविशेषेण जनकाश्रमस्थं समस्तं जनं यज्ञदर्शनार्थं जनकसद्मनि समागतं सर्वलोकमपि लोकं औजिहतां वितर्कं कारितवन्तौ । जहृ वितर्के इत्यस्मात् णिजन्तात् लुङ् । रामलक्ष्मणयोः लोकोत्तरकान्तिमवलोक्य तत्र स्थिताः सर्वे जनाः इत्थं वितर्कयामासुरिति भावः ॥ ४१ ॥

अजिग्रहदिति । जनकः अस्य रामस्य बाह्वोर्बलं भुजवीर्यं जिज्ञासमानः ज्ञातुमिच्छन् सन् । "ज्ञाजृम्भृदमां सनः" इत्यनेनात्मनेपदम् । तं रामं तत् धनुः अजिग्रहत् आहयामास पदैर्निज-

जिज्ञासमानो बलमस्य वाहोः
हसन्नभाङ्क्षीत् रघुनन्दनस्तत् ॥ ४२ ॥
ततो नदीष्णान् पथिकान् गिरिज्ञान्
आज्ञायकान् भूमिपतेरयोध्याम् ।
दित्सुः सुतां योधहरैस्तुरङ्गैः
व्यसर्ज्जयत् मैथिलमर्त्यमुख्यः ॥ ४३ ॥

न्तात् लुङ् यद्वीतुमुवाच इत्यर्थः। येन धनुषा पिनाकी पिनाक-नामकधनुष्पाणिः हरः दैत्यपुरं त्रिपुरासुरनगरं आर्हिं दत् छत्रा-दितवान्। यहैः स्वार्थिकण्यन्तात् लुङ्। ततः रघुनन्दनः हसन् स्मितं कुर्व्वन् तत् शैवं धनुः अभाङ्क्षीत् बभञ्ज भञ्जेर्लुङ्। क्लेशं विनैव लीलया द्विधा चकार इत्यर्थः। "अजियहत् बोधितवान् अनेन धनुषा त्रिपुरं दग्धम्" इति जयमङ्गलेन व्याख्यातम्। यहेरादानार्थकस्य प्रयोज्यकर्त्तुः कर्म्मत्वानियमात् पाणिनीयैरियं कष्टकल्पना क्रियते, मुग्धबोधमते तु तस्य पृथग्-यहणात् सर्वमवदातमित्यनुसन्धेयम् ॥ ४२ ॥

तत इति। ततो धनुर्भङ्गानन्तरं मिथिलायां भवाः मैथिलाः। म्रियन्ते प्राणिनो अस्मिन्निति मर्त्यो भूलोकस्तत्र भवा मर्त्या मनुष्याः। मैथिला ये मनुष्यास्तेषां मुख्यः श्रेष्ठो राजा जनकः सुतां दित्सुः, ददातेः सन्, सत्पात्रे प्रतिपादयितु-मिच्छुः सन् नद्यां ज्ञास्तीति तान् नदीष्णान् नदीज्ञान्। नदीष्णो नदीज्ञ इति पुरुषोत्तमः, ज्ञातेः क्नः, निनदीभ्यां ज्ञाते-

क्षिप्रं ततोऽध्वन्यतुरङ्गयायी
यविष्ठवद्वृद्धतमोऽपि राजा ।
आख्यायकेभ्यः श्रुतसूनुवृत्तिः
अग्लानयानो मिथिलामगच्छत् ॥ ४४ ॥
इन्दिष्ठमार्ची वसुधाधिपानां
तं प्रेष्ठमेतं गुरुवद्गरिष्ठम् ।

रिति पथम् । गिरिं जानन्तीति गिरिज्ञास्तान् कुत्र देशे कीट्शी नदी कीट्शो वा गिरिरस्तीति जानतः अतएव पथिकान् पथिकुशलान् भूमिपतेर्दशरथस्य आह्वयन्तीति आह्वायका निमन्त्रणकारिदूतास्तान् योधवरैः सैनिकप्रवरोचितैस्तुरङ्गैः क्षिप्रगामिभिरश्वैः अयोध्यां व्यसर्ज्जयत् प्रेरयामास ॥ ४३ ॥

क्षिप्रमिति । ततः आख्यान्तीति आख्यायका दूतास्तेभ्यः श्रुता सूनो रामस्य हरिहरधनुर्भङ्गाद्यवदानं येन तथोक्तः । अध्वानं पथगामिनो अध्वन्या ये तुरङ्गमास्तैः यातीति अध्वन्यतुरङ्गयायी अग्लानं अक्लिष्टं यानं यस्य स अग्लानयानः कुत्रचिदपि पथि ग्लानिवशात् निरुद्धगतिरसौ नासीदित्यर्थः । राजा वृद्धतमोऽपि यविष्ठवत् युवतम इव क्षिप्रं द्रुतं मिथिलां अगच्छत् प्रापत ॥ ४४ ॥

इन्दिष्ठमिति । यंहिष्ठा बहुलतमा कौर्त्तिर्यस्य स जनकः तद्वसुधाधिपानां इन्दिष्ठं पृन्दारकतमं प्रशस्ततममित्यर्थः । प्रेष्ठं प्रियतमं वैवाहिकसम्बन्धकरणादिति भावः । गुरुवत् पितृवत्

सट्टङ्महान्तं सुकृताधिवासं
वंहिष्ठकीर्त्तिर्यशसा वरिष्ठम् ॥ ४५ ॥
त्रिवर्गपारीणमसौ भवन्तम्
अध्यासयन्नासनमेकमिन्द्रः।
विवेकदृग्वत्वमगात् सुराणां
तं मैथिलो वाक्यमिदं बभाषे ॥ ४६ ॥

गरिष्ठं पूजिततमम् तस्य वयोजिगठत्वात्। "गुरुस्तु गीष्पतौ श्रेष्ठे गुरुः पितरि दुर्भरे" इत्यमरः। सट्टयां समानप्रतिपत्तियुक्तानां नृपानां मध्ये महान्तं महाशयं सुकृताधिवासं पुण्यनिलयं यशसा वरिष्ठं श्रेष्ठं एतं आगतं इणधातोः क्तः तं दशरथं आर्षीत् सभाजयामास। सर्वत्र बहूनामेकोत्कर्षे इष्ठादेयः सट्टमहान्तमित्यत्र सट्टक् अभिजनादिभिस्तुल्यो जनकः महान्तं महानुभावानां मध्ये महान्तं दशरथमिति वा व्याख्यानम् ॥ ४५ ॥

त्रिवर्गेति। असौ इन्द्रः त्रिवर्गस्य धर्मार्थकामरूपस्य पारीणं पारगण्दात् नीनः पारदृश्वानं धर्मार्थकामेषु परां काष्ठामापद्यमानं इत्यर्थः भवन्तं एकं आसनं अध्यासयन् आरोपयन् सुराणां मध्ये विवेकं दृष्टवान् विवेकदृग्। दृशेः क्विनप्। तस्य भावः विवेकदृग्वत्वं विवेकज्ञतां अगात् प्राप इणो लुङ् गादेशश्च। देवानां मध्ये भगवानाखण्डल एव विघ्नकारी यदसौ भवन्तमेकासनारोपणेन सभाजयामास इति भावः। इदं वाक्यं मैथिलो जनकस्तं दशरथं बभाषे उवाच ॥ ४६ ॥

हिरण्मयी सालल्तेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥ ४७ ॥
लब्धां ततो विश्वजनीनवृत्तिः
तामात्मनीनामुदवोढ़ रामः ।

हिरण्मयीति । हिरण्मयी सुवर्णनिर्मिता मयटि हिरण्यस्य यलोपोनिपानात् जङ्गमा गमनशीला यङन्तात् गमेः पचाद्यच् सञ्चारिणी सालल्ता सालवृक्षाश्रयिणी लता इव, एतेन रामस्य सालदृक्षतुल्यत्वं सूचितम्, दिवः अन्तरिक्षात् च्युता भूपतिता स्थास्नुः स्थितिशीला अचिरप्रभा विद्युदिव, तथा शशाङ्ककान्तेः चन्द्रद्युतेरधिदेवताकृतिः अधिष्ठातृदेवता इव सौम्याकारा सुता मैथिली मैथिलस्य अपत्यं स्त्री, यद्वा मैथिल भूभागे यज्ञभूमौ जाता अयोनिसम्भवा लक्ष्मीरूपेति बोध्यम् । सीता तस्य दशरथस्य सुताय रामाय ददे दत्ता जनकेनेति शेषः । सालल्ता स्थावरा जानकी तु जङ्गमा, तड़ित् चञ्चला सा तु अचञ्चला, इत्युभयत्रापि व्यतिरेको व्यज्यते । अत्र रामस्य ज्येष्ठत्वात् तस्यैव कविना परिणयो वर्णितः न शेषाणां तेनावैव सह्मणभरतशत्रुघ्ना अपि यथाक्रममुर्मिलामाण्डवीश्रुतकीर्त्तीनां पाणीन् जग्राहुरिति बोद्धव्यम् ॥ ४७ ॥

लब्धामिति । ततः सम्प्रदानानन्तरं विश्वजनाय हिता विश्वजनीना, तादृशी वृत्तिर्यस्य स रामः लब्धां प्राप्तां सतीं

सद्रत्नमुक्ताफलभर्म्मभूषां
संवंहयन्तीं रघुवंश्यलक्ष्मीम् ॥ ४८ ॥
सुप्रातमासादितसम्पदं तत्
वन्दारुभिः संस्तुतमभ्ययोध्यम् ।
अप्रतीयराजन्यकहास्तिकाढ्याम्
अगात् सराजं वलमध्वनीनम् ॥ ४९ ॥

शोभना विद्यमाना वा रत्नानां मुक्ताफलादीनां भर्म्माणां सुवर्णानां च भूषा भूषणं यस्याः सा तथोक्ता, रघुवंश्यलक्ष्मीं रघुवंश्यानां राजयश्रियं संवंहयन्तीं संबहुलामतिस्थिरां कुर्व्वतीम् । बहुलशब्दस्य णिचिकृते वंहादेशः ततः शढ। आत्मनीनां आत्मने हितां तां मैथिलीं उद्वोढ़ परिणीतवान्। क्रियाफलविवक्षया आत्मनेपदम् ॥ ४८ ॥

सुप्रातमिति। शोभनं निरुपद्रवत्वात् रमणीयं प्रातर्दिनमुखं यस्य तत् सुप्रातम्। समासान्तटिलोपश्च निपात्यते। आसादितसम्पदं प्राप्तहर्षं वन्दारुभिः स्तुतिपाठकैः संस्तुतं श्लाघ्यं अभ्ययोध्यं अयोधाभिमुखं "अभिप्रती आभिमुख्ये" इति अव्ययीभावः। अप्रतीनां समूहो आप्रतीयं राजन्यानां क्षत्रियाणां समूहः राजन्यकम् हस्तिनां समूहो हास्तिकं तैः आढ्यमुपचितं सह राज्ञेति सराजं साकल्यवचनं शोभनत्वे वा अव्ययीभावः। अध्वनीनं अध्वानमनंगामीति अध्वनीनं तत् बलं दशरथस्य सैन्यं अगात् जनकनगरात् प्रस्थे गच्छत् ॥ ४९ ॥

विशङ्कटो वक्षसि वाणपाणिः
सम्पन्नतालद्वयसः पुरस्तात् ।
भीष्मो धनुष्मानुपजान्वरत्निः
ऐतिष्म रामं पथि जामदग्न्यः ॥ ५० ॥
उच्चैरसौ राघवमाह्वतेदं
धनुः सवाणं कुरु मातियासीः ।

विशङ्कट इति । वक्षसि विशङ्कटः उरसि "वः शासच्छङ्कटचौ" इति शङ्कटच् । विशालो व्यूढोरस्क इत्यर्थः । वाणः पाणावस्य इति वाणपाणिः । प्रहरणार्थेभ्य इत्यादिना सप्तम्यन्तस्य परनिपातः । सम्पन्नः सम्यगुत्पन्नो विशाल इति यावत् यस्तालद्वयः तत्परिमाणकः सम्पन्नतालद्वयसः । "प्रमाणे द्वयसच्" । भीष्मः भयङ्करकारः भीधातोरीषादिको मक्, धनुष्मान् प्रशस्तधनुर्धारी जानुनोः समीपमुपजानु अरत्निर्हस्तो यस्य स तथोक्तः आजानुलम्बितबाहुरित्यर्थः । "अरत्निस्तु निष्कनिष्ठेन मुष्टिना" इत्यमरः । "रत्नैरत्नौ स्त्रियौ हस्तौ बद्धमुष्टितताङ्गुली" इत्यमरमाला च । जमदग्नेरपत्यं पुमान् जामदग्न्यः परशुरामः पथि रामं पुरस्तात् पुरतः ऐतिष्म आससाद ॥ ५० ॥

उच्चैरिति । असौ जामदग्न्यः राघवं उच्चैः महता ध्वनिना "आह्वत आह्वतवान् स्पर्धते इ । "स्पर्धायामाङ" इत्यात्मनेपदं आह्वयतेर्लुङि रूपम् । कथमाह्वतेत्याह । इदं सङ्गतस्थितं

अजीगणद्दाशरथं न वाक्यं
यदा स दर्पेण तदा कुमारः ।
धनुर्व्यकार्षीद्गुरुवाणगर्भं
लोकानलावीद्विजितांश्च तस्य ॥ ५३ ॥
जिते नृपारौ सुमनीभवन्ति
शब्दायमानान्यशनैरशङ्कम् ।

अस्मिन् अर्भके शिशौ रामे तव का आस्था को यत्नः । नायं ते तुल्यप्रतिद्वन्द्वी शिशुर्मे पुत्रकः अतोऽस्य यदि किञ्चिदापत्तमभवत् तत् क्षन्तव्यम् भवादृशैर्महानुभावैरिति भावः ॥ ५२ ॥

अजीगणदिति । स जामदग्न्यः दर्पेण गर्वात् यदा दशरथस्य इदं दाशरथं वाक्यं न अजीगणत् न गणितवान् प्रत्युत अवधीरितवानित्यर्थः । तदा एव अविलम्बेनेत्यर्थः कुमारो रामः गुरुर्वाणो गर्भे अभ्यन्तरे यस्य तत् तथोक्तं धनुः व्यकार्षीत् विशेषेण आकृष्टवान्, कृञ आकर्षणे इत्यस्य लुङ् । ततस्तस्य विजितान् तपःप्रभावादिना वशीकृतान् लोकान् स्वर्लोकान् असावीत् विच्छेद, षुनातेर्लुङ् । बाणेन तस्य स्वर्गमयं सरोध इत्यर्थः ॥५३॥

जिते इति । नृपारौ क्षत्रान्तकारिणि जामदग्न्ये जिते सति अमुमनांसि सुमनांसि भवन्ति सुमनीभवन्ति । अभूततद्भावे चिम्यतोऽन्त्यस्य लोपः निःशङ्कत्वात् प्रसन्नमनांसीत्यर्थः । अतः "अशङ्कं निर्भयं यथैकस्यैः शब्दायमानानि जयध्वनिं कुर्वन्ति यमानि सैन्यानि तस्य राज्ञो दशरथस्य अनुमते सति अनुमतौ

वृद्धस्य राज्ञोऽनुमते बलानि
जगाहिरेऽनेकमुखानि मार्गान् ॥ ५४ ॥
अयपुरुजवयोगान्नेदयद्दूरसंस्थं
दवयदतिरयेण प्राप्तमुर्वीं विभागम् ।

सत्यां अनुमतिं प्राप्येत्यर्थः। अनेकमुखानि पृथक् भूतत्वात् अनेकदलसंविभक्तानि सन्ति मार्गान् भिन्नान् पथः जगाहिरे आचक्रमुः। पूर्वं भयेन वर्त्तुलीभूतत्वात् अधुना तेषां पृथक् संविभक्तत्वं बहुत्वञ्च सङ्गच्छते। अतो बलानीति बहुवचनम् ॥ ५४ ॥

अयेति। अय गूर्यते वर्द्धते इति गृधातोः कुप्रत्ययः। पुरुर्महान् यो जवोवेगस्तस्य योगात् सम्बन्धात् प्रकटवेगवशात् दूरसंस्थं दूरवर्त्तिनमुर्वीविभागं भूभागं जनपदादिकं नेदयत् अन्तिकं कुर्वत् अन्तिकयब्दात् समीपवाचिनः तत् करोतीति निच्, नेदादेशश्च, ततः शतृप्रत्ययः, तथा प्राप्तं विषयीकृतं अधिगतमित्यर्थः उर्वीविभागं अतिरयेण वेगातिशयवशात् दवयत् दूरीकुर्वत्, दूरयब्दात् पूर्ववत् णिच् ततः शतृप्रत्ययः। क्लमरहितं ग्लानिमनापन्नं अतिहर्षात् क्लमातिशयं नानुभवत्, अचेतत् कियद्दूरमागतमित्यज्ञानत् हर्षात् सहितमपि अध्वानं न बुध्यमानमित्यर्थः। बलं दशरथसैन्यं न सन्ति रजांसि यस्यां सा नीरजाः अनीरजाः नीरजाः कारिता क्षा भूमिर्यत्र सो

कुमरहितमचेतन्नीरजौकारितक्ष्मां
बलमुपहितशोभां तूर्णमायादयोध्याम् ॥ ५५ ॥

इति श्रीभट्टिकाव्ये सीतापरिणयोनाम
द्वितीयः सर्गः ।

इत्यर्थः । निर्पूर्वात् रजसः अभूततद्भावे चिः सलोपश्च । उपहितशोभां छत्रध्वजपताकादिभिः कल्पितशोभां अयोध्यां राजधानीं तूर्णं त्वरितं आयात् आगतम्, आंपूर्वात् यातेर्लङ । मालिनीवृत्तम् ॥ ५५ ॥

इति भट्टिटीकायां द्वितीयः सर्गः ।

## तृतीयः सर्गः ।

---

वधेन संख्ये पिशिताशनानां
क्षत्रान्तकस्याभिभवेन चैव ।
आढ्यम्भविष्णुर्यशसा कुमारः
प्रियम्भविष्णुर्न स यस्य नासीत् ॥ १ ॥
ततः सुचेतोक्षतपौरभृत्यः
राज्येऽभिषेचो सुतमित्यनीचैः ।

वधेनेति । संख्ये संग्रामे पिशितं मांसमशनं खाद्यं येषामिति तेषां राक्षसानामित्यर्थः वधेन निधनेन क्षत्रान्तकस्य क्षत्रियकुलकालरामस्य परशुरामस्य अभिभवेन पराजयेन चैव उत्सवादितियेषः वधादिहेतुना वा यशसा कीर्त्या आढ्यं आढ्यः सम्वृत्तः आढ्यम्भविष्णुः, "कर्त्तरिभुव" इति खिष्णुच् समागमश्च, कुमारो रामचन्द्रः यस्य प्रियम्भविष्णुः यस्यापि प्राक् प्रियो न जातः यदादपि तदैव न प्रियो भूतः स नासीत् न बभूव, सर्व्वेषामेव सुतरां प्रियो बभूवेति भावः ॥ १ ॥

तत इति । ततः प्रियम्भविष्णुताया अनन्तरं सुचेतसः सुचेतसः सम्यदमानाः पौरा भृत्याश्च यस्य स तथोक्तः । राक्षसवधाय प्रेषितस्य रामस्य उत्कण्ठमानाः प्रजाः सम्प्रति जयलक्ष्मीसान्त्वितं तं जानकीसहचरं प्रतिनिवृत्तं दृष्ट्वा

आघोषयन् भूमिपतिः समस्तं
भूयोऽपि लोकं सुमनीचकार ॥ २ ॥
आदित्यदादीप्तकृशानुकल्पं
सिंहासनं तस्य स पादपीठम् ।
सन्तप्तचामीकरवल्गुवज्रं
विभागविन्यस्तमहार्घरत्नम् ॥ ३ ॥

सञ्जाताः इति भावः । भूमिपतिः राजा सुतं राज्ये यौवराज्ये अभिषेक्ष्ये अभिषिक्तं करिष्यामि । सिचेरुभयपदित्वादात्मनेपदम् । इति अनीचैः उच्चैराघोषयन् घोषणां कुर्वन् समस्तं लोकं सकलाः प्रजाः भूयोऽपि पुनरपि सुमनीचकार । बहुगुणसम्पन्नोऽयं कुमारो यौवराज्ये अभिषेक्ष्यते नवेति यद्वामपनीय सकलानधिकमाह्लादयदिति तात्पर्यार्थः । सुचेतःसुमनसोः चि प्रत्ययात् सकारलोपः । जयमङ्गलस्त्वाह किमयं दशरथः सम्यक् पालयिष्यति न वेति असुचेतसः पौरा भृत्याश्च जाताः ते सम्यक् पालनात् सुचेतसः कृता येन स सुचेतीकृतपौरवृत्य इति ॥ २ ॥

आदित्यदिति । स राजा इत्यध्याहर्त्तव्यम् । आदीप्तकृशानुकल्पं प्रज्वलितवह्निसन्निभं यतः सन्तप्तानि अनलतापयोगात् विशुद्धानि चामीकराणि सुवर्णानि यस्मिन् तत् सन्तप्तचामीकरं वल्गूनि मनोहराणि वज्राणि हीरकाणि यस्मिन् तत् तथोक्तं सन्तप्तचामीकरञ्च तत् वल्गुवज्रञ्चेति सन्तप्तचामीकरवल्गुवज्रम् ।

प्रास्थापयत् पूगकृतान् स्वपोषं
पुष्टान् प्रयत्नाद्दृढगात्रवन्धान्।
सभर्मकुम्भान् पुरुषान् समन्तात्
पदातिपिण्डस्तीर्थजलार्थमाशु ॥ ४ ॥
उद्दामम्रचक्रुर्नगरस्य मार्गान्
ध्वजान् ववन्धुर्मुमुचुः सधूपान्।

द्वयोरप्यतरस्य विशेषणत्वविवक्षायां कर्मधारयसमासः। तथा विभागेषु यथायथं विभक्तेषु स्थानेषु विन्यस्तानि सन्निवेशितानि महार्घाणि महामूल्यानि रत्नानि पद्मरागादीनि यत्र तत् विभागविन्यस्तमहार्घरत्नं सपादपीठं पादपीठान्वितं तस्य सिंहासनं आदिक्षत् निर्मातुमाज्ञापयामास। आदिगतेर्लुङ् ॥३॥

प्रास्थापयदिति। अपूगाः पूगाः कृता इति पूगकृताः सङ्घीकृतास्तान्। श्येनादिषु च्व्यर्थवचनमिति समासः। स्वपोषं पुष्टान् स्वेन धनेन पुष्टानित्यर्थः। स्वे पुष इति णमुल्। दृढगात्रवन्धान् संयतशरीरान् भारोद्वहनार्थमिति भावः। सभर्मकुम्भान् सहेमकलशान् पार्ष्णौ कपितुं शीलं येषां तान् पदातिपिण्डः पदातीनित्यर्थः। णिनि कृते पादस्य पदादेशः। पुरुषान् जनान् तीर्थजलार्थं अभिषेकार्थं तीर्थजलं आनेतुमित्यर्थः समन्तात् सर्वासु दिक्षु प्रयत्नात् आदरेण आशु क्षिप्रं प्रास्थापयत् प्रेषयामास। स इति शेषः ॥ ४ ॥

उद्दामेति। राज्ञा दशरथेन अर्थेषु कार्येषु नियुक्ता

दिशश्च पुष्पैश्चकरुर्विचित्रैः
अर्घेषु राज्ञा निपुणा नियुक्ताः ॥ ५ ॥
मातामहावासमुपेयिवांसं
मोहादपृष्ट्वा भरतं तदानीम् ।
तत् कैकयी सोढुमशक्नुवाना
ववार रामस्य वनप्रयाणम् ॥ ६ ॥

अधिकृता निपुणा जनाः । "अर्थः प्रकारे विषये वित्तकारण-वस्तुषु । अभिधेये च शब्दानां हत्तौ चापि प्रयोजने" इति विश्वः । नगरस्य मार्गान् राजपथान् उच्चांप्रचक्रुः सिक्तवन्तः, ध्वजान् केतून् बबन्धुः उच्छ्रायितवन्तः । खधूपान् खे आकाशे धूपान् सुमुचुः घटिकादिभिः प्रमुक्तवन्तः । तथा विचित्रैः नाना-वर्णैः पुष्पैः दिशः चकरुः क्षादितवन्तश्च । कृधातोर्लिटि रूपम् । उच्चाम्चक्रुरित्यत्र उपसर्गक्रियाविशेषणव्यवधानेऽपि भ्वादीना-मनुप्रयोगो भवतीति उच्चधातोः प्रपूर्वः क्षजनुप्रयुज्यते । तथाच "तं पातयां प्रथममास पपात पथात्" इति रघौ । जयमङ्गला-दयस्तु उच्चानिति पठित्वा उच्चणमुच्चा तत अर्थं आदित्वात् अमत्यय इति व्याचक्षते ॥ ५ ॥

मातेति । कैकयस्य कैकयदेशाधिपतेरपत्यं स्त्री कैकयी तत् रामस्याभिषेकसंविधानं सोढुं अशक्नुवाना असहमाना सती, रामस्य सपत्नीतनयत्वात् । शक्नोतेः परस्मैपदित्वेऽपि अतिशयस्तात्छील्ये शतुः शान इति शानः पाणिनीयमते तु चानश् इति बोध्यम् । तदानीं अभिषेककाले मातामहावासं

कर्णेजपैरार्हितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना।
रामप्रवासे व्यसृजन्न दोषं
जनापवादं सनरेन्द्रशल्युम् ॥ ७ ॥
वसूनि देशांश्च निवर्त्तयिष्यन्
रामं नृपः संगिरमाण एव।

केकयराजभवनं उपेयिवांसं, उपेयिवांसमिति निपातनात् सिद्धम्। आसादितवन्तं भरतं सौहार्द्दज्ञानात् अदृष्ट्वा दूतप्रेषणादिनेति शेषः। रामस्य वनाय प्रयागं गमनं ववार प्रार्थितवती वृणोतेर्लिट् ॥ ६ ॥

कर्णेजपैरिति। कर्णे जपन्ति ये ते कर्णेजपास्तैः कर्णेजपैः सूचकैः खलैरन्तर्द्रोहिभिर्मन्थरादिभिः। तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक्। आहितो जनितो राज्यलोभो यस्याः सा तथोक्ता, तया स्त्रैणेन स्त्रीजनोचितेन लघिम्ना लघुचित्ततया नीचागयत्वेनेत्यर्थः विकृतिं अन्यथाभावं नीता प्रापिता सा केकयी रामप्रवासे ज्येष्ठस्य राज्यार्हस्य दुराग्रस्य निर्वासने सति यदा विषये सतनौ नरेन्द्रस्य राज्ञो शल्युना सह वर्त्तमानं सनरेन्द्रशल्युं जनापवादं लोकपरीवादं दोषं न व्यसृजत् न आलोचितवती। सृजतेर्लौदादिकात् सङ्। रामे निर्वासिते सति यत् नरेन्द्रस्य शल्युर्जनापवादर्थं त्वनिष्टवमापतिष्यति तदसौ नालुचिन्तितवतीत्यर्थः ॥ ७ ॥

वसूनीति। रामं निवर्त्तयिष्यन् निवर्त्तयितुमिच्छन् नृपः

तयावजज्ञे भरताभिषेको
विषादशङ्कुश्च मतौ निचख्ने ॥ ८ ॥
ततः प्रविव्राजयिषुः कुमारम्
आदिक्षदस्याभिगमं वनाय ।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन् ॥ ९ ॥

वनप्रयाणं परिजिहीर्षुरित्यर्थः, अतः वसूनि धनानि देशान् जनपदांश्च संगिरमाणस्तस्मै दास्यामीति प्रतिजानान एव नृपः। संगिरतेस्तौदादिकात् आत्मनेपदविधानात् शानच्। तया केकय्या अवजज्ञे अवज्ञातः। भरताभिषेकः विषादः शङ्कुः शल्यमिव विषादशङ्कुश्च मतौ राज्ञो मनसि निचख्ने निखातः। रामं निर्वास्य भरताभिषेचनं याचमानासौ तं भूयोतापयदिति भावः। पुरा किल परितुष्टेन राज्ञा केकय्यै वरद्वयं देयमिति प्रतिश्रुतमासीत्, अधुना मन्थरादिभिः प्रणोदिता केकयी तयोरेकेन वरेण रामस्य वनप्रवासनमपरेण च भरतस्य यौवराज्याभिषेचनं याचितवतीति पौराणिकी वार्त्तानुसन्धेया ॥ ८ ॥

तत इति । ततः केकयीप्रार्थनानन्तरं कुमारं प्रविव्राजयिषुः प्रवज्यां कारयितुमिच्छुः प्रपूर्व्वात् व्रजतेर्निजन्तात् सन्। राजा शोचन् समन्युः सन् सुमन्त्रो नेता सारथिर्यस्य स सुमन्त्रनेत्रः। "नेतरि रथे च नाड्यां च नेत्रो नेतरि भेदवत्" इति विश्वः। तेन रथेन सौमित्रिसीतानुचरस्य लक्ष्मणजानकी-

केचिन्निनिन्दुर्नृपमप्रशान्तं
विचुक्रुशुः केचन साश्रमुच्चैः।
ऊचुस्तथान्ये भरतस्य मायां
धिक्कैकयीमित्यपरो जगाद ॥ १० ॥
गतोवनं श्वो भवितेति रामः
शोकेन देहे जनतातिमात्रम्।

सहायस्य अस्य रामस्य, कर्त्तरि षष्ठी, वनाय अभिगमं प्रयाणम्। गत्यर्थकर्म्मणीति चतुर्थी। आदिक्षत् आदिष्टवान् आंपूर्वकात् दिशतेर्लुङ ॥ ८ ॥

केचिदिति। केचित् जना अप्रशान्तं वार्द्धक्येऽपि स्त्रैणत्वात् शान्तिरहितं इति नृपं निनिन्दुः गर्हितवन्तः। केचन साश्रं सवाष्पं उच्चैरनीचैः विचुक्रुशुराक्रन्दितवन्तः क्रोशतेर्लिट। तथा अन्ये भरतस्य मायां गाढ्यमूचुः राज्यलाभाय मातरं नियुज्य स्वदोषपरिहारार्थं मातामहावासं गतवान् इति उक्त्वा तस्य कापट्यं ख्यापयामासुः। अपरः धिक्कैकयीं यया एवमनुष्ठितमिति जगाद। कैकयीमिति धिक् शब्दयोगेन द्वितीया ॥ १० ॥

गत इति। रामः श्वः आगामिनि दिवसे वनं गतो भविता गमिष्यतीति हेतोः जनता जनसमूहः शोकेन अतिमात्रं भृशं देहे दग्धा दहतेः कर्म्मणि लिट्। तत्र ये तु अन्ये अपरे धीराः स्थिरबुद्धय आसन् ते च्युतमन्यवः विगतशोकाः मन्तः

धीरास्तु तत्र च्युतमन्यवोऽन्ये
दधुः कुमारानुगमे मनांसि ॥ ११ ॥
प्रस्थास्यमानावुपसेदुषस्तौ
शोशुच्यमानानिदमूचतुस्तान् ।
किं शोचतेहाभ्युदये वतास्मान्
नियोगलाभेन पितुः कृतार्थान् ॥ १२ ॥

कुमारानुगमे मनांसि दधुः कृतवन्तः राममनुगन्तुं निश्चिक्युः इत्यर्थः । गत इति भूतकालः क्षोभवितेति भविष्यत्कालेनापि सम्बध्यमानः साधुः धातुसम्बन्धे प्रत्यया इति नियमादित्यनुसन्धेयम् ॥ ११ ॥

प्रस्थास्यमानाविति । प्रस्थास्यमानौ वनाय गमिष्यन्तौ तौ रामलक्ष्मणौ उपसेदुषः तयोः समीपमागतान् । उपपूर्वात् सीदतेः क्वसुः शोशुच्यमानान् अतिशयेन शोकं कुर्वतः शोचतेर्यङि क्तेशानच् । तान् जनान् इदं वक्ष्यमाणमूचतुः । वत आश्चर्ये इह अस्मिन् अभ्युदये महति श्रेयसि समुपस्थिते सति पितुर्नियोगलाभेन अनुमतिप्राप्त्या कृतार्थान् सिद्धमनोरथान् अस्मान् किं कथं शोचत परिदेवध्वम् । पितुराज्ञालाभेन चरितार्थत्वमस्माकं महत् भाग्यलक्षणं तत्र वयं युष्माभिः शोच्याः प्रत्युताभिनन्दनीया भवाम इति भावः ॥ १२ ॥

अस्रष्ट यो यश्च भयेष्वरक्षीत्
यः सर्व्वदास्मानपुपत् स्वपोषम् ।
महोपकारस्य किमस्ति तस्य
तुच्छेन यानेन वनस्य मोक्षः ॥ १३ ॥
विद्युत्प्रणाशं स वरं प्रनष्टो
यद्दोर्व्वशेयं तृणवत् विशुष्कः ।
अर्थे दुरापे किमुत प्रवासे
न शासनेऽवास्थित यो गुरूणाम् ॥ १४ ॥

अस्रष्टेति । यः अस्मान् अस्रष्ट अजीजनत्। सृजेर्दैवादिकस्य आत्मनेपदित्वात् लुङि रूपं नतु तौदादिकस्य तस्य परस्मैपदित्वात्। यश्च भयेषु आधिव्याधिभिः प्राणसंशयेषु समुपस्थितेषु सत्सु अरक्षीत् पालयामास, तथा सर्वदा स्वपोषं अपुपत् स्वेन धनेन पुष्टवान्। तस्य पितुः सम्बन्धिनो महोपकारस्य मोक्षः आत्मनं तुच्छेन अनायाससाध्येन वनस्य यानेन किमस्ति न खलु सम्भवत्येव। वनस्येति कर्म्मणि षष्ठी, तस्याः गत्यर्थकर्म्मणि चतुर्थ्या बाध्यमानत्वेऽपि वैभाषिकत्वात् ॥ १३ ॥

विद्युदिति । यो जनः दुरापे अर्थे दुःखसाध्ये प्राणात्ययादिकार्य्ये किमुत प्रवासे किं पुनरचिरात्र विदेशवसतौ विषये गुरूणां पित्रादिपूज्यतमानां शासने न अवास्थित अवपूर्वात् तिष्ठतेर्लुङ, यद्वागासनमन्वतिष्ठत् स वरं विद्युत्प्रणाशं प्रनष्टः विद्युदिव उत्पत्त्यनन्तरमेव वपुषा विनाशं गतः यद्वा अथवा

पौरा निवर्त्तध्वमिति न्यगादीत्
तातस्य शोकापनुदा भवेत ।
मा दर्शतान्यं भरतञ्च मत्तः
निवर्त्तयेत्याह रथं स्म सूतम् ॥ १५ ॥
ज्ञात्वेङ्गितैर्गत्वरतां जनानां
एकां शयित्वा रजनीं सपौरः ।

तृणवत् जङ्घशोषं विशुष्कः जङ्घे एव स्थित्वा अशुष्यत् । उभयत्रापि णमुल् । यदहं स्वल्पायासकरं वनप्रवासमुरीकृत्य पित्राज्ञां न बहु मन्ये तदा मे मृत्युरेव श्रेयानिति तात्पर्यार्थः ॥ १४ ॥

पौरा इति । पौरा निवर्त्तध्वं यथागतमयोध्यां प्रतिगच्छत तातस्य पितुः शोकमपनुदन्ति ये ते शोकापनुदाः । नुदः कर्त्तरि कः । भवेत । प्रार्थनायां लिङ् । तथा भरतञ्च मत्तः अन्यं मा दर्शत । मां योगात् लुङ् अड़ागमनिषेधश्च । यथाहं तथा भरतोऽपि युष्मान् पालयिष्यतीति समपक्षपातया भक्त्या भरतमुपचरत इति न्यगादीत् रामस्तानवादीत् । तथा रथं निवर्त्तय इति सूतं समन्त्रं आहस्म च । आहेत्यत्र णप्प्रत्ययस्य तिप्स्थानीयत्वेन वर्त्तमानक्रियैव बोध्यते अतः स्मशब्दप्रयोगस्य वैयर्थ्यं पौनरुक्त्यं वा नाशङ्कनीयम् । यच्च क्वचिदस्य भूते प्रयोगो दृश्यते तत् भ्रान्तमिति परिहर्त्तव्यं लक्षणया वा कथञ्चित् समाधेयमित्यलमतिगहनावगाहनेन ॥ १५ ॥

ज्ञात्वेति । रामः निवर्त्तध्वमित्युक्ते ये तत्र अनिच्छाः

रक्षन् वनेवासकृताद्भयात्तान्
प्रातश्छलेनापजगाम रामः ॥ १६ ॥
अस्राक्षुरस्तं करुणं रुवन्तः
मुहुर्मुहुर्न्यश्वसिषुः कवोष्णम्।
हा राम हा कष्टमिति ब्रुवन्तः
पराङ्मुखैस्ते न्यवृतन्मनोभिः ॥ १७ ॥

जनानां अनुगामिनां इङ्गितैरभिप्रायसूचकैर्वेष्टितैः इङ्गतेर्भावे क्तः। गलरतां गमनयौलतां अनुगमनाध्यवसायमित्यर्थः। गमेः क्वरप्। ज्ञात्वा सपौरः पौरैः सह एकां रजनीं नयित्वा गङ्गातटे शयनं कृत्वा वनेवासकृतात् वनवासमुलभात् भयात् ग्राप-दाभियोगादिजनितात् सङ्कटात्। वनेवास इति समस्या अलुक्, तान् रक्षन् पालयन् प्रातरुपसि छलेन सन्ध्यावन्दनादि-व्याजेन अपजगाम निभृतमपससार। रजनीमित्यत्र कालाध्वनोरत्यन्तसंयोगे, देशकालाध्वगन्तव्याः कर्मसंज्ञा इकर्मणा-मिति द्वितीया ॥ १६ ॥

अस्राक्षुरिति। ते पौराः राममपश्यन्तः करुणं दीनं यथा तथा रुवन्तः विलपन्तः अस्रं नेत्रजलं अस्राक्षुः मुक्तवन्तः स्रुवेस्रौदा-दिकस्य सुङ्। कवोष्णं अन्तस्तापात् ईषदुष्णं यथा तथा मुहुर्मुहुः न्यश्वसिषुः वारम्वारमुष्णोच्छ्वासं त्यक्तवन्तः निपूर्वात् श्वसेर्सुङ्। कवोष्णमिति कोरीषदर्थकस्य कवादेशः। तथा हा राम हा कष्टमिति ब्रुवन्तः विलपन्तःपराङ्मुखैः येन गतौ

सूतोऽपि गङ्गासलिलैः पवित्वा
सहाश्वमात्मानमनल्पमन्युः ।
ससीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ॥ १८ ॥

रामस्तेन गतैर्मनोभिः न्यवर्तन्त प्रत्याजग्मुः । हतेरात्मनेपदित्वेऽपि लुङि ङविधानात् परस्मैपदित्वं तस्य परस्मैपदे एव नियमितत्वात्। यत्र रामो वासस्तत्र मनो निधायं शून्यहृदयास्ते देहमात्रेण पुरमागता इत्यर्थः । तथाच शाकुन्तले "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः । चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य" इति ॥ १७ ॥

सूतोऽपीति । सूतः सुमन्त्रोऽपि गङ्गासलिलैः सहाश्वं अश्वैः सह । सहः सोवेति वैभाषिकविधानात् न सादेशः । आत्मानं पवित्वा गङ्गायामवगाहनेन स्वस्य बाह्यमाभ्यन्तरीकामपि शुद्धिमवाप्य अश्वानपि स्नापयित्वा च इत्यर्थः अनल्पमन्युः कथं राजानमेवमात्मानं दर्शयिष्ये इति विह्वलशोकः सन् ससीतयो राघवयोः अधीयन् सीतया सह रामं लक्ष्मणञ्च स्मरन्। "अधीगर्थदयेशां कर्म्मणि" इति वा षष्ठी । इकधातो रिण तुग्भ्वेऽपि शतरि भेदात् इयादेशः । कदुष्णं ईषदुष्णं यथा तथा श्वसन् पुरं आविवेश । कोरीषदर्थे कदादेशः कदुष्णत्वञ्च शोकसन्तापादिति भावः ॥ १८ ॥

प्रतीय सा पूर्दृष्टे जनेन
द्यौर्भानुशीतांशुनिराकृतेव।
राजन्यनक्षत्रसमन्वितापि
शोकान्धकारक्षतसर्व्वचेष्टा ॥ १९ ॥
विलोक्य रामेण विना सुमन्त्रम्
अच्योष्ट सत्त्वान्नृपतिश्युताशः।

प्रतीयेति। जनेन रामानुयायिना प्रतीय प्रतिनिवृत्त्य। प्रतीय इत्यत्र इङ्धातोः दैवादिकात् ल्यप् न पुनरिण: तथात्वे प्रतीत्य इत्येवं स्यात्। प्रतीयुषा इति पाठान्तरं। प्रतीयुषा प्रतिनिवृत्तेन जनेन इत्यर्थः प्रतिपूर्व्वकेणधातोः क्वसुः। राज्ञामपत्यानि राजन्याः क्षत्रिया नक्षत्राणीव तैः समन्वितापि शोकान्धकारेण क्षताः प्रतिहताः सर्व्वाः चेष्टाः क्रयविक्रयादि-रूपा नित्यमनुष्ठेया बहवः संसारव्यापारा यत्र सा तथोक्ता सा पूः अयोध्या भानुशीतांशुनिराकृता सूर्य्यनिशानाथविरहिता द्यौराकाशमिव दृष्टे दृष्टा। यथा नक्तं नक्षत्रान्वितापि द्यौश्चन्द्रसूर्य्यशून्या सती अन्धतमसाच्छन्ना भवति तथा सा अयोध्या राजन्यगणयुक्तापि रामलक्ष्मणविरहिता शोकेन निरेष्टेव समजायत इत्यर्थः ॥ १८ ॥

विलोक्येति। नृपतिर्दशरथः रामेण विना सुमन्त्रं विलोक्य श्रुताशः सन् कदाचिद्रामः पौरैरनुरुद्धः प्रतिनिवर्त्तेत इति तस्य या आशा आसीत् अधुना तद्रहितः सन् सत्त्वात् स्वभा-

सूतोऽपि गङ्गासलिलैः पवित्वा
सहाग्र्यमात्मानमनल्पमन्युः ।
ससीतयो राघवयोरधीयन्
ग्रसन् कटुष्णं पुरमाविवेश ॥ १८ ॥

रामस्तेन गतैर्मन्त्रीभिः न्यहृतन् प्रत्याजग्मुः । हृतेरात्मनेपदित्वेऽपि लुङि ङविधानात् परस्मैपदित्वं तस्य परस्मैपदे एव नियमितत्वात्। यत्र रामो यातस्तत्र मनो निधायं शून्यहृदयाख्ये देहमात्रेण पुरमागता इत्यर्थः । तथाच शाकुन्तले "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः । चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य" इति ॥ १७ ॥

सूतोऽपीति । सूतः सुमन्त्रोऽपि गङ्गासलिलैः सहाग्र्यं अग्रैः सह । सहः सोविति वैभाषिकविधानात् न सादेशः । आत्मानं पवित्वा गङ्गायामवगाहनेन स्वस्य वाङ्मात्राभ्यन्तरीणामपि शुद्धिमवाप्य अग्रानपि ज्ञापयित्वा च इत्यर्थः अनल्पमन्युः कथं राजानमेवमात्मानं दर्शयिष्ये इति विहलशोकः सन् ससीतयो राघवयोः अधीयन् सीतया सह रामं लक्ष्मणञ्च स्मरन्। "अधीगर्थदयेशां कर्म्मणि" इति वा षष्ठी । इकधातौ रिण तुग्भवेऽपि गतरि भेदात् इत्यादेशः । कटुष्णं ईषदुष्णं यथा तथा ग्रसन् पुरं पाविवेश । कोरीषदर्थे कदादेशः कटुष्णत्वस्य शोकसन्तापादिति भावः ॥ १८ ॥

प्रतीय सा पूर्दृदृशे जनेन
द्यौर्भानुशीतांशुनिराकृतेव।
राजन्यनक्षत्रसमन्वितापि
शोकान्धकारक्षतसर्व्वचेष्टा ॥ १९ ॥
विलोक्य रामेण विना सुमन्त्रम्
अच्योष्ट सत्त्वान्नृपतिश्युताशः।

प्रतीयेति। जनेन रामानुयायिना प्रतीय प्रतिनिवृत्ता। प्रतीय इत्यत्र इङ्धातोः दैवादिकात् ल्यप् न पुनरिण: तथात्वे प्रतील्य इत्येवं स्यात्। प्रतीयुषा इति पाठान्तरं। प्रतीयुषा प्रतिनिवृत्तेन जनेन इत्यर्थः प्रतिपूर्व्वकेणधातोः क्वसुः। राज्ञामपत्यानि राजन्याः क्षत्रिया नक्षत्राणीव तैः समन्वितापि शोकान्धकारेण हताः प्रतिहताः सर्व्वाः चेष्टाः क्रयविक्रयादि-रूपा नित्यमनुष्ठेया बहवः संसारव्यापारा यत्र सा तथोक्ता सा पूः अयोध्या भानुशीतांशुनिराकृता सूर्य्यनिशानाथविरहिता द्यौराकाशमिव दृदृशे दृष्टा। यथा नक्तं नक्षत्रान्वितापि द्यौरभ्रसूर्य्यशून्या सती अन्यतमसाच्छन्ना भवति तथा सा अयोध्या राजन्यगणयुक्तापि रामलक्ष्मणविरहिता शोकेन निरेष्टेव समजायत इत्यर्थः ॥ १९ ॥

विलोक्येति। नृपतिर्दशरथः रामेण विना सुमन्त्रं विलोक्य श्युताशः सन् कदाचिद्रामः पौरैरनुरुद्धः प्रतिनिवर्त्तेत इति तस्य या आशा आसीत् अधुना तद्रहितः सन् सत्त्वात् स्वभा-

मधूनि नैपीद्यलिपन्न गन्धैः
मनोरमे न व्यवसिष्ट वस्त्रे ॥ २० ॥
आसिष्ट नैकत्र शुचा व्यरंसीत्
क्षताक्षतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागात् द्युनिवासभूयम् ॥ २१ ॥

वादच्योट च्युतः । "सत्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति विश्वः । च्यवतेर्लुङि । स्वभावभ्रंशात् विकृतिमापन्न इत्यर्थः । स्वभावच्युतिरस्य कथं ज्ञायते इत्यत आह मधूनीति । मधूनि न ऐपीत् दृष्टवान् गन्धैश्चन्दनादिभिः न व्यलिपत् अङ्गविलेपनं न कृतवान् । लिम्पतेर्लुङि च्लेरदेशः । तथा मनोरमे मनोज्ञे वस्त्रे दुकूलद्वयं न व्यवसिष्ट परिहितवान् । "वस आच्छादने" इत्यस्य लुङि रूपम् । विपर्ययविधेयोहि स्वभावभ्रंशस्य लक्षणमितिभावः ॥ २० ॥

आसिष्टेति । स राजा शुचा शोकेन हेतुना एकत्र न आसिष्ट उपविष्टः चित्तवैकल्यात् क्षणे क्षणे स्थानपरिवर्त्तनं चकारित्यर्थः । आस्तेर्लुङ । कृतानि तान्यकृतानि च इति कृताकृतानि क्रमभावितानि तेभ्यः । क्षेन नष्टयिशिष्टेनानयिति समासः । क्षितिपालं भजन्तीति तेभ्यः क्षितिपालभाग्भ्यः नृपोचितेभ्यः दूतप्रेषणादिकार्येभ्यः व्यरंसीत् विरतः बभूव शायर्घः । विपूर्वात् रमतेः परस्मैपदं, तद्योगात्

विचक्रुशु भूमिपतेर्महिष्यः
केशान् लुलुञ्चुः स्वपतीपि जघ्नुः।
विभूषणान्युन्मुमुचुः चमायां
पेतुर्वभञ्जुर्वलयानि चैव ॥ २२ ॥
ताः सान्त्वयन्ती भरतप्रतीक्षा
तं बन्धुता न्यक्षिपदाशु तैले।

क्षितिपालभाग्यः इत्यस्यापादानत्वं च। तया चन्दनोशीरसृणालैरन्तस्तापप्रतीकारभूतैर्दिग्धः अनुलिप्तोऽपि शोकाग्निना द्यौर्निवासो येषां ते द्युनिवासा देवास्तेषां भावो द्युनिवासभूत्वम्। दिवो द्युर्भुवोभावे क्यप् च। अगात् जगाम। इषधातोर्लुङ्। शोकसन्तप्तः प्राणान् जहौ इत्यर्थः ॥ २१ ॥

विचुक्रुशुरिति। भूमिपतेर्महिष्यः पत्न्यः विचक्रुशुः सारस्वरेण रुरुदुः। केशान् लुलुञ्चुश्चिच्छिदुरुत्पाटितवत्य इत्यर्थः, स्वपतीपि जघ्नुस्ताडितवत्यः। विभूषणानि आभरणानि उन्मुमुचुः तत्यजुः, चमायां भूमौ पेतुः सुटन्ति स्म। वलयानि च अवैधव्यचिह्नानि बभञ्जुः चूर्णितवत्य एव सर्वत्रापि लिट ॥२२॥

ता इति। ताः महिषीः सान्त्वयन्ती आश्वासयन्ती बन्धुता बन्धुजनः भरतं प्रतीक्षते इति भरतप्रतीक्षा भरतेनैव अस्येष्टिसंस्कारः कर्तव्य इति तं प्रतीक्षमाणा तं गतासुं नृपं मा शुगेवं मा भूत् पूतिरिति तैले न्यक्षिपत् तैलद्रोण्यामरक्षीत्।

दूतांश्च राजात्मजमानिनीषून्
प्रास्थापयन्मन्त्रिमतेन यूनः ॥ २३ ॥
सुप्तोनभस्तः पतितं निरीक्ष्य-
चक्रे विवस्वन्तमधः स्फुरन्तम् ।
आख्यद्वसन्मातृकुले सखिभ्यः
पश्यन् प्रमादं भरतोऽपि राज्ञः ॥ २४ ॥

ततो मन्त्रिमतेन मन्त्रिणां मतं गृहीत्वा राजात्मजं भरतं आनिनीषुन् आनेतुमिच्छून् यूनस्तरुणान् क्षिप्रगमनक्षमानितिभावः। दूतान् प्रास्थापयत् केकयनगरं प्रेषयामास च ॥ २३ ॥

सुप्त इति। मातृकुले मातामहालये। "स्वजातीयगणे गोत्रे गृहेऽपि कथितं कुलम्" इति विश्वप्रकाशनिर्देशात् कुलस्य गृहवाचित्वमस्ति तथाच कुमारे "आसीत् पुरं सानुमतीऽनुरागादन्तःपुरस्यैककुलोपमेयम्" इति। सन् भरतोऽपि राज्ञो दशरथस्य प्रमादं अनिष्टं पश्यन् वितर्कयन् सन् सखिभ्यः मित्रेभ्यः। क्रियाग्रहणाच्चतुर्थी। आख्यत् कथयामास। ख्याधातो र्लुङि आदेशः। किमाख्यत् इत्याकाङ्क्षायामाह सुप्त इति। अहं सुप्तः सन् नभस्तः आकाशात्। पञ्चम्यास्तसिल्। 'पतितं च्युतं अधःस्फुरन्तं भूमौ चलन्तं विवस्वन्तं मार्तण्डं निरीक्ष्याचक्रे अपश्यमिति, एतत् आख्यदित्यनेन परामृश्यते। स्वप्ने सूर्यस्य दिवः पतनदर्शनात् राज्ञोमङ्गलं निष्टं सम्भावयामीत्यवादीदिति भावः ॥ २४ ॥

अशिश्रवन्नात्ययिकं तमेत्य
दूता यदार्घं प्रयियासयन्तः।
आंहिष्ट जातास्निहिपत्सदासौ
उत्कण्ठमानो भरतोगुरूणाम् ॥ २५ ॥

अशिश्रवदिति। प्रयियासयन्तः भरतं प्रयाणेच्छां कारयन्तः प्रस्थातुं प्रयोजितवन्तः इत्यर्थः। दूता एत्य केकयनगरमागत्य यदा तं भरतं आत्ययिकं अत्ययसम्बन्धि अर्घं वस्तु नृपस्य मृत्युवार्त्तामित्यर्थः न अशिश्रवन् श्रावयन्ति स्म। श्रृणोतेर्निजन्तस्य लुङि रूपम्। पितुर्मरणमुपश्रुत्य शोकविह्वलो न गच्छेत् चेदित्यागङ्क्य यदा केनचित् व्याजेन तत् निगूढवन्त इत्यर्थः। तदा एव अविलम्बेनेत्यर्थः जाता अस्निहिपा गमनेच्छा यस्य स तथोक्तः। गत्यर्थादन्नृतेर्भौवादिकात् सनि क्ते अप्रत्ययः ततः स्त्रियामाप्। असौ भरतः गुरूणां पित्रादीनां उत्कण्ठमानः तेषां अत्याहितमाशङ्कमानः सन् आंहिष्ट प्रतस्थे। दूताः तं भरतं पिता ते म्लानस्त्वां द्रष्टुमिच्छतीति आत्ययिकं विनाशप्रयोजनकं मृत्यूदन्तवक्तारमित्यर्थः अर्घयते अनेनेति अर्घं वचनं यदा अशिश्रवन् श्रावितवन्तः तदा भरतः गुरूणां पित्रादीनां उत्कण्ठमानः स्मरन् आंहिष्टेति जयमङ्गलेन व्याख्यातम्। गुरूणामुत्कण्ठमान इत्यत्र अधीगर्थदयेशां कर्म्मणीति षष्ठी ॥ २५ ॥

बन्धूनशङ्किष्ठ समाकुलत्वात्
आसेदुषः स्नेहवशादपायम्।
गोमायुशारङ्गगणाश्च सम्यक्
नायासिषुर्भीममरासिषुश्च ॥ २६ ॥
स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघजन्यम्।

बन्धूनिति। स भरतः समाकुलत्वात् दुःस्वप्नदर्शनेन अकस्मात् पितृदूतागमनेन च विकलचित्तत्वात् स्नेहवशाच्च हेतोः बन्धून् अपायं नाशं आसेदुषः प्राप्तवतः। आङ्पूर्वात् सदः कर्तुः। अशङ्किष्ट उत्प्रेक्षितवान्। स्नेहः पापमाशङ्कते, व्याकुलोहि अनर्थमुत्प्रेक्षते चेतिभावः। गोमायुशारङ्गगणाश्च शिवामृगव्रजाश्च सम्यक् न अयासिषुः पथि गच्छतस्तस्य अनुकूलं न आजग्मुः मृगालाः प्रदक्षिणं गताः मृगाश्च सव्यमित्यर्थः। वामतः स्थिताः शिवा दक्षिणे मृगाश्च शुभं सूचयन्ति, तद्विपर्ययेतु अशुभम्। यदुक्तं "वामे शवशिवाकुम्भाः दक्षिणे गोमृगद्विजाः" इति। तथा भीमं भीषणं अरासिषुः चुक्रुशुः। दुर्निमित्तं खल्वेतत् तस्य उद्विगाय बभूवेत्यर्थः ॥ २६ ॥

स इति। प्रोषिवान् मातामहालये कृतप्रवासः। प्रवसतेः कर्तुः एत्य प्रवासादागत्य पुरं प्रवेक्ष्यन् प्रवेष्टुमिच्छुरित्यर्थः। स भरतः जनौघजन्यं जनसमूहसमुद्भूतं घोषं ध्वनिं एकतः समवेतोहि जनौघः यमध्वनं शब्दं करोति तमित्यर्थः। न शुश्राव।

आकर्णयामास न वेदनादान्
नचोपलेभे वणिजां पणायाः ॥ २७ ॥
चक्रन्दुरुच्चैर्नृपतिं समेत्य
तं मातरोऽभ्यर्णमुपागतास्राः।
पुरोहितामात्यमुखाश्च योधाः
विद्वद्मन्युप्रतिपूर्णमन्याः ॥ २८ ॥

वेदनादान् वेदपाठध्वनीन् न आकर्णयामास। तथा वणिजां पण्यजीविनां पणन्ते ये ते वणिजः "पणेरिजादेय वः" इति औणादिकोवः। पणायाः क्रयविक्रयव्यवहारान्। पणङ् व्यवहारे इति धातोरायन्ततः अप्रत्यये कृते स्त्रियामाप्। न उपलेभे न ददर्श। पणायानितिपाठे पण्यन्ते इति पणाः पण्यद्रव्याणि तेषु आया लाभास्तानित्यर्थः। शोकान्धकारेण घनसर्वचेष्टत्वात् समन्तात् सर्वं नीरवमपश्यदिति भावः ॥२७॥

चक्रन्दुरिति। उपागतानि प्राप्तानि अस्राणि नेत्रजलानि यासां ता उपागतास्रा मातरः कौशल्यादयः अभ्यर्णं समीपमागतम्। अभिपूर्वादर्हतेः क्त-प्रत्यये निपातनात् साधु। तं भरतं समेत्य सम्भूय आगत्य नृपतिं राजानमुद्दिश्य उच्चैश्चक्रन्दुः रुरुदुः हा राजन् हा स्वामिन् क्व गतोऽसीति करुणं परिदेवितवत्यः। तथा पुरः अग्रे धीयते इति पुरोहितः। अमा सह राज्ञा भवतीति अमात्यः। तौ मुखं प्रधानं येषां ते योधाश्च विद्वद्मन्युना उच्छलितशोकेन प्रतिपूर्णे मन्ये गत-

दिदृक्षमाणः परितः ससीतं
रामं यदा नैक्षत लक्ष्मणञ्च ।
रोरूयमानः स तदाभ्यपृच्छत्
यथावदाख्यन्नथ वृत्तमस्मै ॥ २९ ॥
आवद्भीमभ्रुकुटीविभङ्गः
शेफ्रीयमानारुणरौद्रनेत्रः ।

शिरे येषां ते विदृक्षमन्युप्रतिपूर्णमन्याः सन्तः उच्चैश्चक्रन्दुरित्यनेन सम्बन्धः । "पश्चात् ग्रीवायिरा मन्या" इत्यमरः । शोकजन्यवायुना मन्यास्तभ्नो नाम व्याधिर्जात इत्यर्थः । यथा अस्यैव षष्ठे "मन्युर्मन्ये ममास्तभ्नोद्दिपादोऽस्तभदुद्यतिम् । अजारीदिव च प्रज्ञा बलं शोकात्तथाजरत्" ॥ २८ ॥

दिदृक्षमाण इति । स भरतः परितः सर्व्वतः ससीतं रामं सीतां रामञ्च तथा लक्ष्मणञ्च दिदृक्षमाणः द्रष्टुमिच्छन् । "शास्वृदृशां सनः" इत्यनेन आत्मनेपदम् । यदा नैक्षत तान् न ददर्श । तदा रोरूयमानः भृशं रुदन् सन् । रोदितेर्यङन्तात् यानच् । अभ्यपृच्छत् पुरोहितामात्यादीनिति शेषः । अथ ते यथावत् याद्दशं वृत्तं भूतं तादृशम् । यत्तदोर्नित्यसम्बन्धात् तत्पदमध्याहर्त्तव्यम् । अस्मै भरताय आख्यन् कथयामासुः । ख्यातेर्लुङि झादेशः । रामनिर्व्वासनादिकं सर्व्वमाख्यातवन्त इत्यर्थः ॥ २९ ॥

आवद्भेति । आवद्धः जातः भीमः भयङ्करः भ्रुवोः भ्रुव्याः

उच्चैरुपालभ्य स कैकयीञ्च
शोकेन मुह्यन्नविरतं न्यमाङ्क्षीत् ॥ ३० ॥
नृपात्मजौ चिक्लिशतुः ससीतौ
ममार राजा विधवा भवत्यः।
शोच्या वयं भूरनृपा लघुत्वं
कैकेय्युपज्ञं वत वह्वनर्थम् ॥ ३१ ॥

कौटिल्यस्य विमर्दः विरचनं येन स तथोक्तः। तथा म्रियमाणे अत्यर्थं विस्कारिते अरुषे आरक्ते च नेत्रे यस्य स तथोक्तः स भरतः। हृदार्थकात् ग्रसतेर्यङन्तात् यानच्। कैकयीं मुहुर्वारंवारं उच्चैः उपालभ्य निर्भर्त्सयामास। उपपूर्वात् लभतेर्लुङ्। तथा शोके अविरतं अजस्रं न्यमाङ्क्षीत् निमग्नः। निपूर्वात् मज्जतेर्लुङि रूपम् ॥ ३० ॥

नृपात्मजाविति। नृपात्मजौ रामलक्ष्मणौ ससीतौ सीतया सहितौ, चिक्लिशतुः निर्वासनादिक्लेशमसहताम्। राजा ममार मृतः। म्रियतेर्लुङ्लिङोश्चेत्यनेपदनियमात् सिचि परस्मैपदित्वम्। भवत्यः यूयं मातरः विगतौ धवौ भर्त्तारौ यासां ता विधवाः अभूवन्। "धवः प्रियपतिर्भर्त्ता" इत्यमरः। वयं शोच्या दैन्यमापन्नाः पालकाभावात् पाल्यानां शोचनीयत्वमिति भावः। अयशोभाजनत्वात् शोच्या इति लयमङ्गेन व्याख्यातम्। मह्या इति पाठे एतत्कृतोऽयं प्रयोग इति वितर्कणीया इत्यर्थः। भूः पृथ्वी अनृपा अराजका अराजकत्वं हि बह्वनर्थ-

नैतन्मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ शपथान्यशप्यत् ।
उद्घाश्यमानः पितरं सरामं
लुठ्यन् सशोको भुवि रोरुदावान् ॥ ३२ ॥

मूलम् । यदुक्तं "अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् । रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः" इति । वत खेदे बहवो अनर्घाः यस्मिन् तत् बह्वनर्घं लघुत्वं वरप्रार्थनलक्षणं कैकय्या उपज्ञा आद्यं ज्ञानं कैकय्युपज्ञम् । "उपज्ञा ज्ञानमाद्यं स्यात्" इत्यमरः । उपज्ञोपक्रमान्तस्य तदादित्वप्रकाशने इत्यमरवचनात् नपुंसकत्वं लिङ्गस्य लोकाश्रयत्वात् । रामं निर्वास्य यत् मदर्थं राज्यं प्रार्थितं तत् कैकय्या एव प्रथमसुज्ञापितं नान्येन इति भावः ॥ ३१ ॥

सम्प्रति स्वदोषं परिहरन्नाह नैतदिति । एतत् मतं रामनिर्वासनसंकल्पो न मत्कं न मदीयं इति ब्रुवाणः असौ सहस्रशः बहुवारान् शपथान् सम्प्रत्ययकारणवचनानि अशपथत् कृतवान्, धातूनामनेकार्थत्वात् अत्र करणार्थत्वम् । शपेः दैवादिकस्य उभयपदिनः लुङि रूपम् । ततः सशोकः स भरतः सरामं पितरं पितरं रामञ्च उद्घाश्यमानः हा तात, हा रामेति उच्चैराह्वयन् । वाशृगन्दे इति धातोः शानच् । रोरुदा अत्यर्थं रोदनमस्यास्तीति रोरुदावान् । रुदेर्यङन्तादप्रत्यये यङीलुक् स्त्रियामाप् च ततो वतुः । भुवि लुठ्यन् आसीत् लुटति स्म । लुठ्यतेर्विमोहनार्थात् शतः ॥ ३२ ॥

तं सुस्थयन्तः सचिवा नरेन्द्रं
दिधक्षयन्तः समुदूहुरारात्।
अन्त्याहुतिं हावयितुं सविप्राः
चिचीषयन्तोऽध्वरपात्रजातम् ॥ ३३ ॥

तमिति। नरेन्द्रं तैलद्रोण्यां स्थं मृतं राजानं दिधक्षयन्तः दग्धुमिच्छां कारयन्तः भरतेनेति शेषः। दहतेः सनन्तात् णिचि क्षते शटः। अध्वरपात्राणां यज्ञोपयोगिपात्राणां स्रुवादीनां जातं समूहं चिचीषयन्तः चेतुं संग्रहीतुमिच्छां कारयन्तः अत्रापि भरतेनेति शेषः। चिनोतेः सनन्तात् णिच् ततः शटः। सविप्राः विप्रैः ऋत्विग्भिः सहिताः सचन्ते कार्येषु समवयन्तीति सचिवा, सचेरीषादिश्च इवन्, अमात्याः, तं भरतं सुस्थयन्तः सुस्थं प्रकृतिस्थं कुर्वन्तः सान्त्वयन्तः सन्तः अन्त्याहुतिं शेषाहुतिं हावयितुं अग्नौ प्रक्षेपयितुं आरात् नातिदूरे समुदूहुः नरेन्द्रमिति शेषः समुत्पूर्वात् वहतेर्लिटि रूपम्। शिबिकायामारोप्य तं अनतिदूरवर्त्तिनि श्मशाने मृत्यैरुदाहितवन्त इत्यर्थः। अत्र आश्वलायनः। "अथैतान्दिग्यमग्नीन्नयन्ति यज्ञपात्राणि च ॥१॥ अन्वञ्चं प्रेतमयुजोऽमियुनाः प्रवयसः। २। "यज्ञपात्राणामन्वञ्चं पृष्ठतः प्रेतं नयन्ति अयुजः विषमाः अमियुना स्त्रियः पुरुषाय न मिथाः स्युरित्यर्थः"। इति नारायणः चतुर्थाध्यायस्य प्रथमकाण्डिकायाम् ॥ ३३ ॥

उदक्षिपन् पट्टदुकूलकेतून्
अवादयन् वेणुमृदङ्गकांस्यम् ।
कम्बूंश्च तारानधमन् समन्तात्
तथानयन् कुङ्कुमचन्दनानि ॥ ३४ ॥
श्रोत्राक्षिनासावदनं सरुक्मं
कृत्वाजिने प्राक्शिरसं निधाय ।

उदक्षिपन्निति । तत्तत्कार्य्येषु नियुक्ता भृत्यवर्गा इति अध्याहृत्य व्याख्येयम् । समन्तात् सर्व्वतः पट्टदुकूलकेतून् पट्टांशुकविरचितान् ध्वजान् उदक्षिपन् उच्छ्रायितवन्तः । वेणुमृदङ्गकांस्यं वंशमुरजकांस्यतालं अवादयन् । जातिरप्राणिनामित्येकवद्भावः । तारान् उच्चध्वनीन् कम्बून् शङ्खान् च अधमन् शब्दितवन्तः आधातोर्लङि धमादेशः । तथा कुङ्कुमचन्दनानि आनयन् यागार्थं आनीतवन्तः ॥ ३४ ॥

श्रोत्रेति । ऋतौ यजतीति ऋत्विक् ऋत्वुपपदात् यजतेः क्विप् निपातनात् साधु । अजिने कृष्णसारचर्म्मणि प्राक् पूर्व्वस्यां दिशि स्थितं शिरो यस्य तं प्राक्शिरसं शवं निधाय स्थापयित्वा शाययित्वेत्यर्थः । श्रोत्राक्षिनासावदनं प्राण्यङ्गत्वादेकवद्भावः । सरुक्मं ससुवर्णं कृत्वा तथा यथाविधानं यथागास्त्रं पात्राणि स्रुगादीनि सम्भृत्य शवप्रत्यङ्गेषु विन्यस्य ज्वलितं स्थितं चयनं तदर्थमग्निं चितामग्निं जुहाय जुहोतिश्च निदर्शनार्थः । तथा चाश्वलायनः । "तस्मिन् परिस्तीर्य्य जघनाजिनयोत्तर-

सञ्चित्य पात्राणि यथाविधानम्
ऋत्विग्जुहाव ज्वलितं चिताग्निम् ॥ ३५ ॥
कृतेषु पिण्डोदकसञ्चयेषु
हित्वाभिषेकं प्रकृतं प्रजाभिः।

लोम तस्मिन् प्रेतं संवेशयन्त्युत्तरेण गार्हपत्यं हृत्वावहवनीयमभिमुखशिरसम्। १५। अथैतानि पात्राणि योजयेत्। १। दक्षिणहस्ते स्रुचं (पलाशकाष्ठनिर्म्मितं अर्द्धचन्द्राकृतियज्ञपात्रम्)। २। सव्ये उपभृतं (अश्वत्थकाष्ठनिर्म्मितं वर्त्तुलाकारं यज्ञपात्रम्)। ३। दक्षिणे पार्श्वे स्फ्यम् (खड्गाकारं यज्ञकाष्ठभेदम्) सव्येऽग्निहोत्रहवनीम् (अग्निहोत्रसाधनं पात्रम्)। ४। उरसि ध्रुवां (उडुम्बरपत्राकारं हृहत् स्रुग्भेदम्) शिरसि कपालानि दक्षु ग्रावृनः। ५। नासिकयोः स्रुवौ। ६। कर्णयोः प्राशित्रहरणे। ७। उदरे पात्रीम् (यस्यां हवींषि साध्यन्ते)। १०। उपाभ्यां शम्याम्। ११। अरणीमूर्व्वोः। उदूखलमुपले जङ्घयोः। १२। पादयोः शूर्पे। १५। सरक्षसमित्यत्र नारायणेन उद्धृतं "ततो हिरण्मयकनैः छिद्रान्यपि दधाति वै। घृतमित्तांस्तिलांयापि किरेत् प्रेतकलेवरे" इति ॥ ३५ ॥

कृतेष्विति। पिण्डोदकसञ्चयेषु पिण्डदानतर्पणास्थिसञ्चयनकार्य्येषु कृतेषु सत्सु भरतः प्रजाभिः प्रकृतं प्रस्तुतं अभिषेकं हित्वा परित्यज्य विनयेन प्रसादनया न तु विभीषिकया रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुः सन् सपौरः मयैकेन प्रसाद्यमानः

प्रत्यानिनीपुर्विनयेन रामं
प्रायादारण्यं भरतः सपौरः ॥ ३६ ॥

कदाचिन्नागच्छेत् यदीति आशङ्क्य अयोध्यावासिभिः सह अरण्यं प्रायात् गतवान् । प्रपूर्वात् यातेर्लङ् । अस्मिन्सूत्रयंने आश्वलायनः—"सम्वत्सरान्ते चेत् सपिण्डयिष्यन् कृष्णपक्षस्य ऊर्ध्वं दशम्यां अयुजासु तिथिषु । अथ द्वादशाहे सपिण्डयिष्यंश्चेत् अन्तर्दशाहे षष्ठाष्टमदशाहवर्जमेकनक्षत्रेषु (फल्गुनीहस्तप्रोष्ठपदद्वयाषाढद्वयभिन्नेषु) पुमांसं अलक्षणे (स्त्रीनरहिते) कुम्भे सञ्चिनियुः कुम्भाभावलक्षणायां स्त्रियं अयुजोऽमिथुना इडाः । तं देशं क्षीरोदकेन गमीशाखया त्रिः प्रसव्यं परिव्रजन् कर्त्ता प्रोक्षति । अथ अङ्गुष्ठोपकनिष्ठाभ्यां एकैकमस्थि उपसंगृह्य अवध्वयन्तः कुम्भे निदधुः पादौ पूर्वं, शिरः उत्तरं सुसञ्चितं सञ्चित्योपरि कपालेन शूर्पेण सम्पूर्य यत्नेन वर्षा आपो नावभेरन् तत्र गर्त्तं च कुम्भमयदधुः । अथ पांसून् अवसम्पूर्य (यथा गर्त्तं कुम्भ आननपर्यन्तं निमग्नो भवति) अथ कुम्भं कपालेनापिधाय मृदाच्छादयेत् यथा न दृश्येत । अथ दाहायतने मृदायेदिं कृत्वा त्रीन् उपलान् अभ्यक्तस्नापितान् प्राङ्मुखान् निधाय मध्यमे प्रेत उत्तरे श्मशानवासिनः, पूर्वे प्रेतान् दक्षिणे तमग्नीयावाह्य उपलानसंकल्प्याभ्यर्च्य अयतस्तेभ्य एकैकं पिण्डमुपकल्प्य उदकुम्भं पादुकाच्छत्राणि दद्यात् । अथानयेयं प्रत्यावृत्य स्नात्वागारमुपेयुर्मृतदेशे मृत्करीषसिक्तासु षोडान् उपेयुः आर्द्रं पात्रं दद्युः" । परिशिष्ट । २ । ८ ॥ ३६ ॥

शीघ्रायमाणैः ककुभोऽभ्युवानैः
जनैरपन्थानमुपेत्य सद्यः।
शोकादभूपैरपि भूयकासां-
चकार नागेन्द्ररयाध्वमिश्रैः ॥ ३७ ॥
उच्चिक्यिरे पुष्पफलं वनानि
सस्रुः पितॄन् पिप्रियुरापगासु।

शीघ्रायमाणैरिति। अशीघ्रैः शीघ्रैर्भवद्भिः शीघ्रायमाणैः। भृगादित्वात् अभूततद्भावे क्यङ्। ककुभो दिशः अभ्युवानैः व्याप्नुवद्भिः। अभ्येतेः शानच्। अपन्थानं बहुत्वादमार्गमपि उपेत्य प्राप्य सद्यः यातैः। अपन्थानमित्यत्र पथोविभाषेति विकल्पितः समासान्ताच्प्रत्ययः। शोकात् अभूपैः अलङ्करण-शून्यैरपि नागेन्द्रा रथा अध्वाय नागेन्द्ररथाध्वन्। सेनाङ्गत्वात् द्वन्द्वैकवद्भावः। तेन मिश्रैः अन्वितैः जनैः पौरैरित्यर्थः हेतुभूतैः भूः चकासाञ्चकार शुशुभे। चकासृ दीप्तौ लिटि रूपम् ॥ ३७ ॥

उच्चिक्यिरे इति। ते जना गच्छन्तः पुष्पाणि फलानि च पुष्पफलम्। जातिरप्राणिनामित्येकवद्भावः। वनानि उच्चिक्यिरे, वनेभ्यः पुष्पाणि फलानि च संगृहीतवन्त इत्यर्थः। चिनोतेर्हिकर्म्मकस्य लिटि क्यादेशः। आपगासु नदीषु सस्रुः स्नातवन्तः पितॄन् स्वधाभुजः पिप्रियुः तर्पितवन्तः। पुलिनानि सैकतानि इत्वा गत्वा आरेभुः शोकापनोदनार्थं कियन्तमपि कालं क्रीडन्ति स्म इत्यर्थः। व्याङपरिभ्यो रम इति परस्मै-

आरेसुरित्वा पुलिनान्यशङ्कं
छायां समाश्रित्य विशश्रमुश्च ॥ ३८ ॥
सम्प्राप्य तीरं तमसापगायाः-(१)
गङ्गाम्बुसम्पर्कविशुद्धिभाजः ।
विगाहितुं यामुनमम्बु पुण्यं
ययुर्निरुद्धश्रमवृत्तयस्ते ॥ ३९ ॥

पदम् । तथा अयङ्कं विस्रब्धं छायां समाश्रित्य विशश्रमुः अध्वखेदमपनिन्युः । आरेसुरित्यत्रारेटुरिति पाठान्तरम् । पुलिनानि इत्वा आरेटुः पुलिनेषु इतस्ततः परिक्रामन्ति स्म इत्यर्थः ॥ ३८ ॥

सम्प्राप्येति । ते जना गङ्गाम्बूनां सम्पर्केण विशुद्धिं भजते इति गङ्गाम्बुसम्पर्कविशुद्धिभाक् तस्याः गङ्गाम्बुसम्पर्कविशुद्धिभाजः गङ्गासङ्गमाहितपावनतायाः । यस्याः स्मरणात् पापं ताम्यति सा तमसा आपं जलसमूहं गच्छति प्राप्नोतीति आपगा नदी तमसा एव आपगा तस्याः तीरं सम्प्राप्य निरुद्धा प्रशमिता श्रमस्य वृत्तिः प्रसरो यैस्ते तथोक्ताः अध्वखेदमपनयन्तः इत्यर्थः । यमुनाया इदं यामुनं पुण्यं पवित्रं अम्बु, विगाहितुं तत्र स्नातुं ययुः चलिताः । तरसापगाया इति पाठे तरसा वेगेन आपगाया नद्याः तमसायाः इत्यर्थः ॥ ३९ ॥

(1) The Tamasa or Tonse flows into the Ganges below Pratishthana. There is another Tamasa flowing along the Midnapur district and discharging itself into the Mayurakshi; but that is not meant here.

ईयुर्भरद्वाजमुनेर्निकेतं
यस्मिन् विगत्याम समेत्य रामः।
च्युताशनायः फलवद्विभूत्या
व्यस्यन्नुदन्यां शिशिरैः पयोभिः ॥ ४० ॥
वाचंयमान् स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून्।
अध्यापयन्तं विनयात् प्रणेमुः
पद्भा भरद्वाजमुनिं सशिष्यम् ॥ ४१ ॥

ईयुरिति। ते भरद्वाजमुनेर्निकेतं आश्रमम्। कित निवासे इति धातोरधिकरणे घञ्। ईयुः जग्मुः। इण धातोर्लिटि रूपम्। यस्मिन् निकेते रामः समेत्य मिलित्वा तस्य पश्चात् समागतैः जनैः सार्द्धमिति बोद्धव्यम्। फलवतां वृक्षाणां विभूत्या सम्पदा च्युता नष्टा अशनाया क्षुधा यस्य स तथोक्तः, अशनायेति निपातितम्, तथा शिशिरैः शीतलैः पीयन्ते इति पयांसि तैः। पोट्यपाने इत्यस्य कर्म्मण्यस्। उदन्यां व्यस्यन् वारयन् विगत्याम पर्य्यटनक्लेशमपनिनाय। अथवा उदन्याशनायाग्दौ उदकाशनाभ्यां क्यचि कृते अप्रत्ययेन साधितौ ॥ ४० ॥

वाचमिति। विनयात् पादाभ्यां गच्छन्तीति पद्भाः पदातयः मुनिभक्त्या रथादिभ्यः अवतीर्य्य पादचारेणाभिगच्छन्त इत्यर्थः। विनयादित्यत्र हेतौ यद्वर्थे वा पञ्चमी गमोत्तरपदे,

आतिथ्यमेभ्यः परिनिर्विवप्सोः
कल्पद्रुमा योगबलेन फेलुः ।
धामप्रथिम्नो मृदिमान्वितानि
वासांसि च द्राघिमवन्त्युदूहुः ॥ ४२ ॥
आम्रां प्रतीपुर्विनयादुपास्थुः
जगुः सरागं ननृतुः सहावम् ।

पदादेयः । ते भरतादयः वाचंयमान् मौनव्रतान् । "वाचि-यमो व्रते" इति खच् । स्थण्डिलशायिनः व्रतार्थं भूशायिनः अनिशं अविच्छेदेन युयुक्षमानान् योक्तुमिच्छतः योगाभ्यास-निष्ठान् मुमुक्षून् मोक्षाभिलाषिणः अध्यापयन्तं मुमुक्षुभ्यः योग-शास्त्रमनुशासतं सशिष्यं भरद्वाजं प्रणेमुः ॥ ४१ ॥

आतिथ्यमिति । आतिथ्यं अतिथ्यर्थमन्नपानादिकं एभ्यः भरतादिभ्यः परिनिर्विवप्सोः परिनिर्वपितुं दातुमिच्छोः परिनि-पूर्वोवपिर्दाने वर्त्तते, तस्मात् सन्नन्तात् उः । धाम्ना तेजसा प्रथिमा पृथुत्वं यस्य तस्य धामप्रथिम्नः, तेजसो बहिर्विसरत्वात् शरीरस्य पृथुत्वमिवोपजायते इति भावः । तस्य मुनेः योग-बलेन समाधिबलेन कल्पद्रुमाः फेलुः फलितवन्तः अन्नपाना-दिकमिति शेषः । तथा मृदिमान्वितानि मृदूनि द्राघिमवन्ति दीर्घाणि च वासांसि वस्त्राणि उदूहुः उदहन्तिस्म । उत्पूर्वस्य वहतेर्लिटि रूपम् । प्रथिमादिशब्दा इमनिप्रत्ययान्ताः ॥ ४२ ॥

आम्रामिति । च किञ्च तस्मिन् तपोवने तिलोत्तमाद्या

सविभ्रमं नेमुरुदारमूचुः
तिलोत्तमाद्या वनिताश्च तस्मिन् ॥ ४३ ॥
वस्त्रान्नपानं शयनञ्च नाना
कृत्वावकाशे रुचिसम्भृतम् ।
तान् प्रीतिमानाह मुनिस्ततः स्म
निवर्हमार्द्रं पिबतात्त शेध्वम् ॥ ४४ ॥

वनिता दिव्ययोषितः अप्सरसः इत्यर्थः आश्रमं मुनेरादेशं प्रतीयुः गृहीतवत्यः । प्रतिपूर्वादिच्छतेर्लिट, सहि यङ्लुगर्थकः । विनयात् उपास्थुः समीपमागमन् भरतादीनां परिचर्य्यार्थं उपस्थानं कृतवत्य इत्यर्थः । उपतिष्ठतेर्लुङ् । सरागं रक्तं मालवादिरागयुक्तं वा यथा तथा जगुः गीतवत्यः, गैधातोर्लिट् । सहावं सभृङ्गारचेष्टं ननृतुः नृत्यन्ति स्म । सविभ्रमं सविलासं नेमुः प्रणताः, उदारं श्रयाम्यं ऊचुः उक्तवत्यः । मुनिप्रभावात् दिव्यस्त्रियस्तत्रागत्य भरतादीन् शुश्रूषाञ्चक्रिरे नृत्यगीतादिभिर्मोदयामासुरेति भावः । पुरा किल भगवान् विरिञ्चिः सर्व्वरम्यवस्तुभ्यः तिलप्रमाणमाकृष्य तिलोत्तमां नामाप्सरसमसृजत् । ततस्तां कामयमानौ महासुरौ सुन्दोपसुन्दौ भ्रातरौ युध्यमानौ अन्योन्यमवधिषातां तेन च देवा निर्ऋतिमसेदुरिति पुराणवार्त्ता ॥ ४३ ॥

वस्त्रेति । ततो दिव्यवनितोपस्थानानन्तरं प्रीतिमान् अतिथिविशेषलाभेन आत्मनो योगवत्समदर्शनायकागमात्वा वा

ते भुक्तवन्तः ससुखं वसित्वा
वासांस्युपित्वा रजनीं प्रभाते ।
द्रुतं समध्वा रथवाजिनागैः
मन्दाकिनीं रम्यवनां समीयुः ॥ ४५ ॥

हृष्टचित्तः मुनिः भरद्वाजः अवकाशे यथाभिमते प्रदेशे रुचिसंपन्नं यस्य यादृगभिरुचिस्तस्य तथैव सम्पादितं वस्त्राणि अन्नानि भक्ष्याणि पानानि पानीयानि च वस्त्रान्नपानम् । समाहारे द्वन्द्वैकवद्भावः । शयनं शय्याश्च नाना कृत्वा पृथक् कृत्वा तान् आह स्म उक्तवान् । किमिति । निवद्धं वस्त्राणि आच्छादयत । निपूर्वात् वस्त्रेर्लोट् । आद्धं उपविशत । आस्तेर्लोट । आत्त अन्नं भक्षयत, आत्तेर्लोट, पिबत पानीयं पिबत । तथा शेद्धं शयने शयनं कुरुत इति आहेत्यनेन सम्बन्धः सर्व्वत्र विधौ लोट ॥ ४४ ॥

ते इति । ते भरतादयः ससुखं सहर्षं भुक्तवन्तः सन्तः, वासांसि वसित्वा परिधाय, रजनीं उषित्वा । "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया । प्रभाते उषसि द्रुतं शीघ्रं अध्वानं सङ्गताः समध्वाः मार्गानुसारिणः सन्त इत्यर्थः । "उपसर्गादध्वनः" इति समासान्तटच । रथाश्च, वाजिनश्च, नागाश्च इति रथवाजिनागैः । समाहारविधेरनित्यत्वात् सेनाङ्गत्वेऽपि इतरेतरद्वन्द्वः । जयमङ्गलस्य रथवाजीत्यत्र द्वन्द्वैकवद्भावः तेन सहिता नागा इति गाकपार्थिवादित्वात् समास इति व्याचष्टे । रम्यवनां मनोज्ञकाननां निर्म्मलजलाञ्च । "पयःकौसालमस्तं

वैखानसेभ्यः श्रुतरामवार्त्ताः
ततो विगिञ्जानपतत्त्रिसङ्घम्।
अभ्रंलिहाग्रं रविमार्गभङ्गम्
आनंहिरेऽद्रिं प्रति चित्रकूटम् ॥ ४६ ॥
दृष्ट्वोर्णुवानान् ककुभो वलीघान्
वितत्य शार्ङ्गं कवचं पिनद्ध।

जीवनं भुवनं वनम्" इत्यमरः। मन्दाकिनीं चित्रकूटवर्त्मनि स्थितां तन्नाम्नीं काञ्चित् नदीं समीयुः सम्भूय गताः सङ्गताः। समूपूर्वादिणधातोर्लिट्। यद्वा मन्दाकिनीं नर्म्मदां गङ्गामात्रे मन्दाकिनीति केचित् वदन्ति ॥ ४५ ॥

वैखानसेति। ततस्ते वैखानसेभ्यः वानप्रस्थेभ्यः। "वैखानसो वनेवासी वानप्रस्थश्च तापसः" इति वैजयन्ती। श्रुतरामवार्त्ताः चित्रकूटे रामोऽस्तीत्यधिगतरामोदन्ताः सन्तः विगिञ्जानः कूजन् पतत्रिणां सङ्घो यस्मिंस्तं तथोक्तम्। गिजिकिङ् स्फुटध्वनाविति धातोः शानच्। अभ्रं लेढ़ि स्पृशति इति अभ्रंलिहं अग्रं शिखरं यस्य तं अभ्रंलिहाग्रं रविमार्गस्य भङ्गो विघातो यस्मिन् तस्य अत्युन्नतत्वात् तं रविमार्गभङ्गं चित्रकूटं (१) अद्रिं प्रति तं लक्ष्यीकृत्य इत्यर्थः आनंहिरे, प्रतस्थिरे। अहिङ् गताविति धातोर्लिट, अद्रिमित्यत्र प्रतिशब्दयोगेन द्वितीया ॥ ४६ ॥

दृष्ट्वेति। गिनेपुः तीक्ष्णशरः सौमित्रिर्लक्ष्मणः ककुभः दिशः

तस्थौ सिसंग्रामयिषुः शितेषुः
सौमित्रिरच्चिभ्रुवमुज्जिहानः ॥ ४७ ॥
शुक्लोत्तरासङ्गभृतोविशस्त्रान्
पादैः शनैरापततः समन्यून् ।
औहिष्ट तान् वीतविरुद्धवृद्धीन्
विवन्दिषून् दाशरथिः स्ववर्ग्यान् ॥ ४८ ॥

ऊर्णुवानान् आच्छादयतः ऊर्णोतेरादादिकादुभयपदिनः शानच् । बलौघान् सैन्यसमूहान् दृष्ट्वा शृङ्गस्य विकारं शार्ङ्गं धनुः वितत्य आरोपितगुणं कृत्वा कवचं पिनह्य बद्ध्वा । नह बन्धने इत्यस्माल्लप् अपेरकारलोपश्च । सिसंग्रामयिषुः संग्रामयितुमिच्छुः । संग्राम युद्धे इति चौरादिकात् णिचिकृते सन्, तत उः । अच्चिणी च भ्रुवौ च अच्चिभ्रुवं समाहारद्वन्द्वे निपातनात् साधु । उज्जिहानः उत्क्षिपन् ऊर्ध्वं नयन्नित्यर्थः तस्थौ । हाङ्गतावित्यस्मात् जुहोत्यादिकात् शानच् ॥ ४७ ॥

शुक्लेत्यादि । दाशरथिः रामस्तु शुक्लं उत्तरासङ्गं उत्तरीयं बिभ्रतीति शुक्लोत्तरासङ्गभृतः विशस्त्रान् त्यक्तायुधान् पादैः शनैरापततः मुक्तवाहनत्वात् पद्भ्यामेव मन्दं मन्दं आगच्छतः अतः समन्यून् मनोकान् तान् वीतविरुद्धवृद्धीन् विगतयुद्धादिमतीन् विवन्दिषून् वन्दितुमिच्छून् स्वर्गे भवाः स्वर्ग्यास्तान् आत्मीयान् औहिष्ट ज्ञातवान् । ऊह तर्के इति धातोर्लुङ् । तेषां साहसविनीतवेगचेष्टितानि दृष्ट्वा नैतेऽस्माकमरयो युयु-

समूलकाषं चकषूरुदन्तः
रामान्तिकं हृंहितमन्युवेगाः।
आवेदयन्तः क्षितिपालमुच्चैः
कारं मृतं रामवियोगशोकात् ॥ ४९ ॥
चिरं रुदित्वा करुणं सशब्दं
गोत्राभिधायं सरितं समेत्य।

त्मवः किन्तु सभाजयितुमागच्छन्तः स्वजना एव इति निषिकाय ॥ ४८ ॥

समूलेति। हृंहितमन्युवेगा विहृदयोकावेगाः रुदन्तस्ते भरतादयः रामान्तिकं रामसमीपं समूलं कषित्वा भूमेरधोभागमुत्खाय। निर्मूलसमूलयोः कम इति कषेर्णमुल्। स्वशरीराघातात् स्वाधोभागं कषित्वा रामस्य पुरतः भूमौ लुठन्ति स्म इति भावः। किं कुर्वन्तः। रामवियोगशोकात् मृतं त्यक्तासुं क्षितिपालं दशरथं उच्चैःकारं उच्चैः कृत्वा आवेदयन्तः विज्ञापयन्तः। अप्रिये यथाभिप्रेतास्यानं इति कृत्वो णमुल्। अप्रियाभिप्रेतास्यानं नाम अप्रियस्य उच्चैः प्रियस्य च नीचैः कथनम् ॥ ४९ ॥

चिरमिति। रावणलक्ष्मणाभ्यां चिरं बहुक्षणं करुणं सशोकं सशब्दं सफुत्कारं रुदित्वा क्रन्दित्वा। रुदेः मेटक्षाद्प्रत्ययस्य नित्वं कित्त्वमतो न गुणः। सरितं नदीं समेत्य सभूय गत्वा मध्येजलात् जलमध्यमवतीर्य। त्यब्लोपे पञ्चमी। जलमध्याद्

मध्येजलाद्राघवलक्ष्मणाभ्यां
प्रत्तं जलं द्राञ्जलमन्तिकेऽपाम् ॥ ५० ॥
अरण्ययाने सुकरे पिता मां
प्रायुङ्क्त राज्ये वत दुष्करे त्वाम् ।
मागाः शुचं वीर भरं वहासुम्
आभाषि रामेण वचः कनीयान् ॥ ५१ ॥

गृहीतमिति शेषः । "पारे मधे पष्या वा" इत्यव्ययीभावः । द्वौ अञ्जली प्रमाणं अस्य द्राञ्जलं अञ्जलिद्वयपरिच्छिन्नमित्यर्थः । "द्वित्रिभ्यामञ्जलेः" इति टच् । जलं अपां अन्तिके तटे इत्यर्थः गोत्राभिधायं पितुर्नामोल्लेखपूर्वकमित्यर्थः । प्रत्तं प्रदत्तम् । प्रदातेः क्तः । प्रत्येकमेकमेकैकाञ्जलिजलदानेन पितुस्तर्पणमकारीत्यर्थः । जयमङ्गलस्तु अञ्जली द्वौ विगृह्य तद्धितार्थे समासमाह द्वावञ्जली प्रमाणमस्येत्यस्मिन् वाक्ये तु प्रमाणप्रत्ययस्य लुकि सति समासान्तो न प्राप्नोति अतद्धितलुकीत्यधिकारादिति हेतुञ्च उपन्यस्यति । द्वयोरञ्जल्योः समाहार इति तत्परिच्छिन्नत्वादभेदोपचारात् जलमपि द्राञ्जलमुक्तमिति भरतेन व्याख्यातम् ॥ ५० ॥

अरण्येति । पिता सुकरे सुखसाध्ये अरण्याय यानं अरण्ययानं तस्मिन् मां प्रायुङ्क्त, वत खेदे दुष्करे दुःखसाध्ये राज्ये राजकार्य्येऽपि त्वां प्रायुङ्क्त नियोजितवान् । युजेरौधादिकस्य सकि रूपं प्रपूर्व्वकत्वात् आत्मनेपदम् । एवं सति हे वीर शुचं

श्रुती कृती हृद्यमतेषु धीमान्
त्वं पैतृकं चेद्वचनं न कुर्य्याः।
विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्रकाम्या ॥ ५२ ॥

मागाः विषादं मागमः। मांयोगात् दृषधातोर्लुङि गादेशे अड़ागमनिषेधः। अमुं भरं पितुर्नियोगरूपं वह सम्पादय इति वचः रामेण कनीयान् अनुजो भ्राता भरतः आभाषि उक्तः। ईयसुनि अल्पस्य कनादेशः ॥ ५१ ॥

श्रुतीति। हृद्यानां भूयोदर्शिनां मनीषिणां मतानि श्रुतानि गुरुमुखादधिगतानि, कृतानि अनुष्ठितानि च येन स हृद्यमतेषु श्रुतीक्षती। क्षस्येनविषयस्येति कर्म्मणि सप्तमी। धीमान् प्रशस्तबुद्धिसम्पन्नः। प्रशंसायां मतुप्। त्वं चेत् पैतृकं पितुरागतं वचनं न कुर्य्याः न करिष्यसि। तदा इह अस्मिन् लोके कुले वंशे विच्छिद्यमाने विच्छेदमापद्यमानेऽपि परस्य अन्यस्य उत्तरकालिकस्य या पुंसः जनस्य पुत्रकाम्या आत्मनः पुत्रेच्छा कथं स्यात् न भविष्यतीत्यर्थः। पुत्रशब्दात् स्वेच्छायां काम्यच् ततो अप्रत्यये स्त्रियामाप्। भवादपि मत्पुत्रे पितुर्नियोगमवधीरयति लोकानामतःपरं पुत्रस्पृहेच्छा न भविष्यतीति भावः ॥ ५२ ॥

अस्माकमुक्तं बहु मन्यसे चेत्
यदीशिषे त्वं न मयि स्थिते च।
जिक्रेष्यतिष्ठन् यदि तातवाक्ये
जहीहि शङ्कां व्रज शाधि पृथ्वीम् ॥ ५२ ॥
दृढौरसां राज्यधुरां प्रवोढुं
कथं कनीयानहमुत्सहेय।

अस्माकमिति। अस्माकं उक्तं अग्रजवाक्यम्। वचेर्भावे क्तप्रत्ययात् अस्माकमिति कर्त्तरि षष्ठी। चेत् यदि बहु मन्यसे आद्रियसे पितृतुल्येनाग्रजेनानुमतः कथमेवं न कुर्य्यामिति चेत् जानासि। मयि स्थिते जीवति यदि त्वं न ईशिषे प्रभुत्वं न करोषि स्वातन्त्र्यं नावलम्बसे इत्यर्थः। प्रभुत्वं त्वदाज्ञाकरोऽहमिति चेत् मन्यसे इति भावः। तथा तातवाक्ये पितृनियोगे। पुत्रे पितरि पूज्ये च तातशब्दं प्रचक्षते इति। अतिष्ठन् अवर्त्तमानः तातवाक्यमकुर्व्वन् इत्यर्थः। यदि जिक्रेषि लज्जसे। गुरुवचनमनतिक्रमणीयम् विशेषतस्तातवचनं तदनादृत्य यदि ते लज्जा भवतीत्यर्थः। तदा शङ्कां विकल्पं जहीहि त्यज, व्रज अयोध्यां प्रतिनिवर्त्तस्व, पृथ्वीं कोशलराज्यमित्यर्थः शाधि पालय। तत्करणे तु मां तातश्च विमानयिष्यसीति सकर्त्तव्यामुष्ठाने मनो निधेहीति भावः ॥५२॥

दृढौरसामिति। कनीयान् कनिष्ठोऽहं उरसा निर्म्मितः औरसः पुत्रः दृढः अपत्रः औरसो यस्यां तां दृढौरसां ज्येष्ठाधि-

मा मां प्रयुंक्थाः कुलकीर्त्तिलोपे
प्राहस्म रामं भरतोऽपि धर्म्यम् ॥ ५४ ॥
जर्ज्जस्वलं हस्तितुरङ्गमेतत्
अमूनि रत्नानि च राजभाञ्जि।
राजन्यकं चैतदहं क्षितीन्द्रः
त्वयि स्थिते स्यामिति शान्तमेतत् ॥ ५५ ॥

कारार्हां राज्यस्य समाङ्गरूपस्य धूर्भारः राजधुरा ताम्। अप्रत्यये परवलिङ्गमिति स्त्रीलिङ्गत्वम्। "धूय स्यात् भार-चिन्तयोः" इति विश्वः। प्रवोढुं ग्रहीतुं कथं उत्सहेय न कथमपि शक्ष्यामीत्यर्थः। विभाषा कथमि लिङ्चेति लिङ्। अतः मां कुलकीर्त्तिलोपे कुलकीर्त्तिनाशार्थं। "निमित्तात् कर्म्मसमवाये" इति सप्तमी। मा प्रयुंक्थाः नियोजय। प्रपूर्व्वात् युजेः लुङ्। इति धर्म्यं धर्म्मादनपेतं वचनं भरतोऽपि रामं प्राहस्म उक्तवान्। ज्येष्ठातिक्रमस्य पूर्व्वैरनाचरितत्वात् तद्विपरीतवाक्यस्य धर्म्यत्वमिति भावः। क्षयमङ्गलम् लोप-यतीति लोपः रघुवंशस्य या कीर्त्तिः तस्या लोपे क्षयकरे कार्य्ये इति व्याचष्टे ॥ ५४ ॥

जर्ज्जस्वलमिति। एतत् जर्ज्जस्वलं बलवत्। "जर्ज्ज क्षीवने बले" इति धातोरम् ततो मत्वर्थे वलच्। हस्तिन-मुरङ्गाय हस्तितुरङ्गम्। सेनाङ्गत्वादेकवद्भावः। अमूनि राज-भाञ्जि राजयोग्यानि रत्नानि मरकतेन्द्रनीलपद्मरागादीनि च।

इति निगदितवन्तं राघवस्तं जगाद
व्रज भरत गृहीत्वा पादुके त्वं मदीये ।

एतत् राजन्यकं क्षत्रियसमूहश्च अस्तीतिशेषः । अहञ्च त्वयि स्थिते विद्यमाने क्षितीन्द्रः स्यां भवेयमित्येतत् शान्तं उक्तं माभूत् । शान्तमलीकमिति जयमङ्गलेन व्याख्यातम् । त्वयि जीवति अहमेतेषां मणिमाणिक्यहस्त्यश्वराजन्यानामीश्वरो भवेयमित्येतत् नितरामनुचितं मे प्रतिभातीति भावः ॥ ५५ ॥

इतीति । राघवो रामः इति इत्थं निगदितवन्तं उक्तवन्तं तं जगाद । किमित्याह । हे भरत त्वं मदीये पादुके उपानही गृहीत्वा व्रज अयोध्यां गच्छ । तया च्युतनिखिलविग्रहः अपगताशेषविकल्पः जनौघैः प्रकृतिपुञ्जैः पूज्यमानः बहुमन्यमानः सन् अस्मत्मतेन अस्माकं मतमनुसृत्य सकलभुवनराज्यं सर्व्वं च भूमण्डले राज्यं कारय अनुष्ठापय पादुके इति योजयम्। इमोरन्यतरस्यामिति प्रयोजककर्त्तुः कर्म्मत्वम् । भरतस्वाह "अस्मत्मतेन" इत्यत्र प्रयोजककर्त्तरि तृतीया । "अस्मत्मतेन" इत्यत्र गौरवादस्मच्छब्दस्य बहुत्वं तत्र "मदीये" इत्येकवचनप्रयोगेन पूर्व्वापरसङ्गतिभङ्गात् समीचीनतया न सङ्गच्छते । जयमङ्गलस्तु पादुके रामस्यैव मतन्तु रामलक्ष्मणयोरिति भिन्नवचनत्वं न दोषाय इति सिद्धान्तयति । अस्मत्मतमित्यत्र सीतासहभगवद्विग्रहत्वेन बहुत्वविवक्षया न मदादेश इति भरतेन सोमाधितम् । भरतो रामस्यैव मतानुसारी राज्यं शशास,

च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मतेन ॥ ५६ ॥

इति श्रीभट्टिकाव्ये श्रीरामप्रवासो नाम
तृतीयः सर्गः।

न खलु लक्ष्मणस्य नापि च सीतायाः इति रामायणे वर्णितं तद्धि युक्तियुक्तञ्च। तदेषा मीमांसा कष्टकल्पनमेव केवलं, कविं प्रति अतिभक्तिविजृम्भितत्वेनादरणीया ॥ ५६ ॥

इति भट्टिटीकायां तृतीयः सर्गः।

# चतुर्थः सर्गः ।

---

निवृत्ते भरते धीमानवेरामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दण्डकारण्यमीयिवान् ॥ १ ॥
अटाव्यमानोऽरण्यानीं ससीतः सहलक्ष्मणः ।
बलाद्बुभुक्षुणोत्क्षिप्य जक्षे भीमेन रक्षसा ॥ २ ॥

निवृत्त इति । भरते निवृत्ते सति धीमान् बुद्धिमान् रामः । अत्र स्थिते मयि कदाचित् भरतः पुनरेष्यतीत्यवधारणात् तस्य धीमत्वमिति भावः । अत्रेर्महर्षेस्तपोवनं प्रपेदे गतः । तस्मिन् अत्रितपोवने पूजितः पाद्यार्घ्यादिभिरर्चितः सन् दण्डकारण्यमीयिवान् प्राप । इण धातोः क्वसुः । पुरा किल इक्ष्वाकुपुत्रो दण्डाख्यो राजा विन्ध्याद्रिशृङ्गद्वयमध्ये निवसति स्म । स कदाचित् भार्गवदुहितां विरजां धर्षयमाणो मुनिनाभिशप्तः सभृत्यबलवाहनं विनाशं गतः । ततो देवराजेन पांशुवर्षणं कृत्वा तस्य राज्ञः शतयोजन यावत् अरण्याकीर्णं मकारि । तद्दण्डकारण्यमिति लोके प्रसिद्धम् (१) ॥ १ ॥

अटाव्येति । अरण्यानीं महारण्यं अटाव्यमानः पुनः पुनः

---

1 The actual position of the Dandakaranya is between the Narmada and Godavari rivers This forest in the time of Ramachandra was celebrated as a place of pilgrimage

अवाक्शिरसमुत्पादं कृतान्तेनापि दुर्दमम्।
भंक्त्वा भुजौ विराधाख्यं तं तौ भुवि निचखनतुः ॥३॥
आंहिपातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः।
अध्यासितां श्रिया ब्राह्म्या शरण्यं शरणैषिणाम् ॥४॥

अत्यर्थं वा अटन् भ्राम्यन्। अटतेर्यङ् ततः कर्त्तरि ग्रानच्। ससीतः सहलक्ष्मणः सीतालक्ष्मणाभ्याम् सहितः। सहशब्दस्य समासे वैकल्पिकः सादेशः। रामः बुभुक्षुणा भोक्तुमिच्छुना भीमेन रक्षसा केनचित् राक्षसेन विराधेन बलात् तरसा उत्क्षिप्य ऊर्द्धमुत्थाप्य जक्षे हृतः गृहीतः हृधातोः कर्म्मणि लिट्। तान् भक्षयितुं हस्ताभ्यां गृहीत्वा उत्क्षिप्तवानित्यर्थः॥ २॥

अवागिति। तौ रामलक्ष्मणौ तस्य भुजौ भंक्त्वा मोटयित्वा कृतान्तेनापि दुर्दमं दुःखेन दमनीयं विराध इति आख्या यस्य तं तथोक्तं तं राक्षसं अवाक्शिरसं अधोमस्तकं उत्पादं ऊर्द्धगतपादं कृत्वा भुवि निचखनतुः निखातवन्तौ। तं भग्नभुजमधोमस्तकमूर्द्धपादं कृत्वा भूगर्भे निहितवन्तौ इत्यर्थः। तुम्बुरुनामा गन्धर्वो वैश्रवणशापात् राक्षसयोनिं प्राप्तः नाम्ना विराधो भूत्वा दण्डकारण्यं विचचार इति पुराणवार्त्ता॥ २॥

आंहिपातामिति। ततो विराधवधानन्तरं रघुव्याघ्रौ रघूणां मध्ये श्रेष्ठौ तौ ब्राह्म्या ब्रह्मसम्बन्धिन्या तपोजनितया इत्यर्थः। "वेदस्तत्त्वं तपोब्रह्म" इत्यमरः। श्रिया लक्ष्म्या अध्यासितं अधिष्ठितं अतएव शरणं त्राणं एषितुं शीलं येषां तेषां शरणैषिणां जनानां शरणे अवस्थाने साधु शरण्यम्।

पुरो रामस्य जुहवाञ्चकार ज्वलने वपुः ।
शरभङ्गः प्रदिश्यारात् सुतीक्ष्णमुनिकेतनम् ॥ ५ ॥
यूयं समेत्यत्येत्यस्मिन् आसिष्महि वयं वने ।
दृष्टाःस्थ स्वस्ति वो यामः स्वपुण्यविजितां गतिम् ॥६॥

"शरणं सधरक्षित्रोः शरणं रक्षणे गृहे" इति विश्वः । शरभङ्गाश्रमं शरभङ्गस्य मुनेराश्रमं आंहिपातां गतवन्तौ । अंहेर्लुङि रूपम् । तपोमहिम्ना तत्रागतानां हिंस्रेभ्यः किमपि भयं नासीत् इत्यर्थः ॥ ४ ॥

पुर इति । शरभङ्गः आरात् समीपे । "आराद्दूरसमीपयोः" इत्यमरः । सुतीक्ष्णमुनिकेतनं सुतीक्ष्णस्य मुनेः केतस्मि निवसस्मि अत्र इति केतनं आश्रमं प्रदिश्य कथयित्वा तत्र वासमुपकल्पय इति उक्त्वेत्यर्थः । रामस्य पुरः अग्रतः ज्वलने अग्नौ वपुः शरीरं जुहवाञ्चकार हुतवान् निजदेहमग्निसात् चकारित्यर्थः ॥ ५ ॥

तत्र किमर्थमत्रावस्थानमिति चेदाह यूयमिति । यूयं समेत्य समागमित्य इति हेतोः वयं अस्मिन् वने आसिष्महि स्थिताः । आसेर्लुङ् । वयमिति एकत्वेऽपि बहुत्वविवक्षा । अत्रत्या यूयं दृष्टाः साक्षात्कृताः स्थ वः युष्मभ्यं स्वस्ति । वयं स्वपुण्यविजितां स्वपुण्येन विजितां लब्धां गतिं स्थानं स्वर्लोकमित्यर्थः । यामः गच्छामः । इति च प्रदिश्येति पूर्वेण सम्बन्धः । रामदर्शनात्तयोर्वां भगवान् विष्णुरत्रागमिष्यतीति एतिरं

तस्मिन् क्षणानुसाङ्गते सुतीक्ष्णमुनिसन्निधौ।
उवास पर्णशालायां भ्रमन्निशमाश्रमान् ॥ ७ ॥
वनेषु वासतेयेषु निवसन् पर्णसंस्तरः।
शय्योत्थायं मृगान् विध्यन् आतिथेयो विचक्रमे ॥८॥
ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन्।

प्रतीक्ष्य तं त्वामधुना साक्षात्कृत्य कृतकृत्यो निजतपसार्जितां गतिं प्राप्नोमीति भावः ॥ ६ ॥

तस्मिन्निति। तस्मिन् शरभङ्गे क्षणानुसाङ्गते कार्त्स्न्येन दग्धीभूते सति। विभाषा साति: कार्त्स्न्ये इति साति:। रामः सुतीक्ष्णमुनिसन्निधौ सुतीक्ष्णस्य मुनेः सन्निधौ समीपे पर्णशालायां उटजे उवास। वसेर्लिट्; किं कुर्वन्। अनिशं सदा आश्रमान् भ्रमन् मुनीनुपासितुं तत्रत्यान् आश्रमान् पर्यटन्नित्यर्थः। तत्र कृताधिवासस्य तदानीमियमेव वृत्तिरासीदिति भावः ॥ ७ ॥

वनेष्विति। वसतौ साधुषु अनुकूलेषु वासतेयेषु वनेषु निवसन् वासं कुर्वन्। संस्तीर्यते इति संस्तरः शय्या पर्णानि संस्तरो यस्य स तथोक्तः। अतिथौ साधुः आतिथेयः रामः शय्योत्थायं शय्याया उत्थाय। उत्पूर्वात्तिष्ठतेर्णमुल्। मृगान् विध्यन् अतिथिसत्कारार्थं मृगयां कुर्वन्नित्यर्थः। विचक्रमे विचचार विहरतिस्मेत्यर्थः ॥ ८ ॥

ऋग्यजुषमिति। होमोऽस्य विद्यते असौ होमवान् कृता-

तस्मिन् क्षणानुसाङ्गूते सुतीक्ष्णमुनिसन्निधौ।
उवास पर्णशालायां भ्रमन्ननिशमाश्रमान् ॥ ७ ॥
वनेषु वासतेयेषु निवसन् पर्णसंस्तरः।
शय्योत्थायं मृगान् विध्यन् आतिथेयो विचक्रमे ॥८॥
ऋग्यजुषमधीयानान् सामन्यांश्च समर्चयन्।

प्रतीच्य तं त्वामधुना साक्षात्कृत्य कृतकृत्यो निजतपसार्जितां गतिं प्राप्नोमीति भावः ॥ ६ ॥

तस्मिन्निति। तस्मिन् शरभङ्गे क्षणानुसाङ्गूते कार्त्स्न्येन दग्धीभूते सति। विभाषा सातिः कार्त्स्न्ये इति सातिः। रामः सुतीक्ष्णमुनिसन्निधौ सुतीक्ष्णस्य मुनेः सन्निधौ समीपे पर्णशालायां उटजे उवास। वसेर्लिट्, किं कुर्वन्। अनिशं सदा आश्रमान् भ्रमन् मुनीनुपासितुं तत्रत्यान् आश्रमान् पर्यटन्नित्यर्थः। तत्र कृताधिवासस्य तदानीमियमेव वृत्तिरासीदिति भावः ॥ ७ ॥

वनेष्विति। वसतौ साधुषु अनुकूलेषु वासतेयेषु वनेषु निवसन् वासं कुर्वन्। संस्तीर्यते इति संस्तरः शय्या पर्णानि संस्तरो यस्य स तथोक्तः। अतिथौ साधुः आतिथेयः रामः शय्योत्थायं शय्याया उत्थाय। उत्पूर्वात्तिष्ठतेर्ण्यमुल्। मृगान् विध्यन् अतिथिसत्कारार्थं मृगयां कुर्वन्नित्यर्थः। विचक्रमे विचचार विहरतिस्मेत्यर्थः ॥ ८ ॥

ऋग्यजुषमिति। होमोऽस्य विद्यते असौ होमवान् कृता-

बुभुजे देवसात् कृत्वा शूलाग्रमुख्यञ्च होमवान् ॥ ९ ॥
वसानस्तन्वकनिभे सर्व्वाङ्गीने तरुत्वची ।
काण्डीरःखाड्गीकः शार्ङ्गी रघन् विप्रांस्तनुत्रवान्॥१०
हित्वाशितङ्क्वीनानि फलैर्येष्वाशितम्भवम् ।

निकार्य्यः स शूले उखायां स्थाप्याच्च संस्कृतं शूल्यं उख्यं च मांसं देवसात् कृत्वा देवेभ्यो देयं कृत्वा दत्वेत्यर्थः । ऋक् च यजुश्च ऋग्यजुषम् । समाहारे टच् । ऋग्वेदं यजुर्वेदञ्च अधीयानान् द्विजान् तथा सामनि साधून् सामन्यान् च समर्चयन् । "देवद्रव्यं द्विजे दद्यात्" इति शासनात् तेन मांसेन वेदविद्ब्राह्मणान् भोजयन्नित्यर्थः बुभुजे भुक्तवान् । मृगयालब्धं मांसं अग्नावाहुतिदानेनादौ देवेभ्यो निवेद्य ततो ब्राह्मणान् भोजयित्वा तेषां भोजनावशिष्टं स्वयमभ्यवजहारेति तात्पर्य्यार्थः ॥ ७॥

वसान इति । तन्वात् अचिरापहृते तन्वके नवचर्म्मणि ताभ्यां निभा सादृश्यं ययोस्ते तन्वकनिभे । तन्वकश्च नवाम्बरे इत्यमरः । सर्व्वाङ्गानि व्याप्नुवत्यौ सर्व्वाङ्गीने तरुत्वची वल्कले वसानः परिदधानः काण्डमस्यास्तीति काण्डीरः सवाणः । "काण्डोऽस्त्रीदण्डवाणार्व्ववर्गावसरवारिषु" इत्यमरः । खड्गेन युध्यते खाड्गिकः, शार्ङ्गी धृतधन्वा, तनुं त्रायते तनुत्रं तदस्यास्तीति तनुत्रवान् विनद्धकवचः तथा विप्रान् रघन् राघवादिभ्यधायमाणः असौ रामः वनेषु यानभ्र भ्रान्तवानिति उत्तरश्लोकेन अन्वयः ॥ १० ॥

हित्वेति । पुनः पुनरतिशयेन वा दशसि दन्दशूकाः ।

तेष्वसौ दन्दशूकारिर्वनेष्वानभ्र निर्भयः ॥१२॥ युग्मकं ।
व्रातीनव्यालदीप्रास्त्रः सुत्वनः परिपूजयन् ।
पर्षदलान्महाब्रह्मैराट नैकटिकाश्रमान् ॥ १२ ॥

दशतेर्यङन्तादूकः । तेषां दन्दशूकानां राक्षसानां व्यालानां वा अरिः हन्ता निर्भयः भयशून्यः स आग्नितास्तृप्ता गावो येषु तेषां तृणप्रायत्वात् तानि आग्नितङ्वीनानि । आग्नितगोशब्दात् ङीनः । वनानि हित्वा त्यक्त्वा गोष्ठस्था तृणबाहुल्यात् तत्त्याग इतिभावः । येषु वनेषु फलैः आग्नितभवं तृप्तिं भवति । आङ्-पूर्वादश्नातेः तृप्त्यर्थकात् भावे क्तः ततः भूधातोर्भावे खच् । तेषु वनेषु आनभ्र पर्य्यटति स्म । अभ्र गत्यामिति धातोर्लिट् ॥ ११ ॥

व्रातीति । नानाजातीया अनियतसङ्ख्याः शरीरमायास्य ये जीवन्ति ते व्रातास्तेषां यत् कर्म्म तदपि व्रातं तेन जीवन्ति इति व्रातीनाः तेषां व्याला उपघातुकाः तेषु दीप्रास्त्रः ज्वलदायुधः । "व्यालं भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः । सुन्वन्तीति, सुन्वानस्तान् सुत्वनः सोमपान् । सुनुतेः सवोत्पादनार्थकात् ङ्वनिप् । परिपूजयन् स रामः महान्तः ब्रह्माणः महाब्रह्मास्तैः करणैः । क्रमङ्गग्रामन्यतरस्यामिति टच् । पर्षत् परिषत् अस्ति येषु ते पर्षदलास्तान् सभायुक्तान् महाब्राह्मण-समूहजुष्टानित्यर्थः । ग्रामस्यान्तिके क्रोशमात्रं त्यक्त्वा यतयो भिक्षवो ये निवसन्ति ते नैकटिकाः तेषां आश्रमान् आट गतवान । अटते लिट् । जयमङ्गलस्तु पर्षदलान् सुत्वनः परिपूजयन् स महाब्रह्मैः सह आट इत्यन्वयं करोति । परिषद्-

परेद्यव्यद्यपूर्वेद्युरन्येद्युश्चापि चिन्तयन् ।
हृद्विचयौ मुनीन्द्राणां प्रियभावुकतामगात् ॥१३॥
आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् ।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥१४॥ युग्मकं ।

लानिति पाठे नवाक्षरपादस्यापीष्टत्वात् न च्छन्दोभङ्गदोषस्यावकाशः । "आख्यानं संसदाख्यानौ पर्यंत्वारिंपदौ समे" इति रभसः ॥ १२ ॥

परेद्यवीति । रामः परेद्यवि परस्मिन् आगामिनि दिवसे इत्यर्थः । अद्य एतस्मिन् अहनि पूर्वेद्युः पूर्वस्मिन् अहनि अन्येद्युः अन्यस्मिन् अहनि चिरातिक्रान्ते चिरागामिनि च दिवसे इत्यर्थः । मुनीन्द्राणां हृद्विचयौ धनशरीरादिगतोपचयापचयौ चिन्तयन् अनुध्यायन् सन् पूर्वं प्रियकार्य्येष्वनियुक्तत्वात् अतथाभूतः सन् प्रियो भवतीति प्रियभावुकः तस्य भावः तत्तां प्रियभावुकतां। अभूततद्भावे भुवः कर्त्तरि खुकञ्। अगात् प्राप । परेद्व्यादयः शब्दा निपातिताः ॥ १३ ॥

आतिष्ठदिति । आयत्यः गावो अस्मिन् काले इति आयतीगवं प्रक्रान्तां आरब्धाम् । गावोऽपि गोचरात् गोष्ठमायान्ति दिवसस्यार्द्धनाड़िकावशेषे सन्ध्यापि तदैव प्रवर्त्तते । सम्यक् ध्यायन्ति अस्यां इति सन्ध्या तां ध्याय्य। अत्यन्तसंयोगे द्वितीया। तिष्ठन्ति गायः दोहाय अस्मिन् काले इति तिष्ठद्गु, तत्पर्य्यन्तं आतिष्ठद्गु । गावो हि रात्रिप्रथमयामस्य नाड़िकायां अतीतायां विद्यमानाः गत्यः उत्थाय दुह्यन्ते । गवानयनकाला-

दृष्टश्च पर्णशालायां राक्षस्याभीकयाय सः।
भार्योढं तमवज्ञाय तस्थे सौमित्रयेऽसकौ॥ १५॥

दारभ्य गोदोहकालं यावत् इत्यर्थः। जपन् सावित्रीमिति शेषः। पतत्रिभ्यः प्रातस्तरां अधिकप्रभाते तेभ्यः प्राक् इत्यर्थः प्रबुद्धः जागरितः। प्रातस्तरामित्यत्र प्रकर्षविवक्षायां तरप्। रविं प्रणमन् "नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये सवित्रे कर्मदायिने" इति मन्त्रोच्चारण-पूर्वकं नमस्कुर्वन् यदा चरतिस्म तदा प्रियभावुकताम् अगादिति पूर्वेण अन्वयः। आयतीगवतिष्ठद्गुशब्दौ काले अव्ययीभावे निपातितौ। जपन् सन्ध्यामित्यत्र प्रमाणं "प्रातःसन्ध्यां सनक्षत्रामुपासीत यथाविधि। सादित्यां पश्चिमां सन्ध्यामर्कास्तमितभास्कराम्" इति। अपिच "पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात्। पश्चिमां तु समासीनः सम्यगृक्षविभावनात्" इति॥ १४॥

दृष्ट इति। सः रामः पर्णशालायां अभिकामयते इति अभीका निपातनात् साधु। तया अभीकया कामुकया राक्षस्या शूर्पणखया दृष्टः। अथ असकौ पापासौ निन्दिता असौ राक्षसी ऊढा भार्या येन तं भार्योढम् सहभार्यां। आहिताग्न्यादिषु पाठात् परनिपातः। तं अवज्ञाय अनादृत्य सौमित्रये लक्ष्मणाय तस्थे स्वाभिप्रायमाविष्कृतवती। यस्मै दित्सेत्यादिना चतुर्थी। "प्रतिज्ञानिर्णयप्रकाशे" इति आत्मनेपदम्। असकौ इत्यत्र कुत्सायां अक्। यदुक्तं "कृपायां

दधाना वलिभं मध्यं कर्णजाहविलोचना ।
वाक्त्वचेनातिसर्व्वेण चन्द्रलेखेव पक्षतौ ॥ १६ ॥
सुपाद् द्विरदनासोरूर्मृदुपाणितलाङ्गुलिः ।
प्रथिमानं दधानेन जघनेन घनेन सा ॥ १७ ॥

निन्दनेऽज्ञाने नीतौ दानेन मानिते । प्रायोऽगस्त्यसखात् पूर्वः सर्व्वनामतिङव्ययात्" इति ॥ १५ ॥

त्रिभिः कलापकेन कामरूपिण्या राक्षस्या रूपं वर्णयति । दधानेति । सा तं प्रार्थयाञ्चक्रे इति वक्ष्यमाणेन सम्बन्धः । कौट्यौ वलयोऽस्मिन् सन्तीति वलिभं मध्यं दधाना धारयन्ती, "तुन्दिवलिवटेर्भः" कर्णजाहं कर्णमूलसमीपमित्यर्थः । मूलार्थे कर्णात् जाहच् । कर्णजाहयोः विद्यन्ते लोचने यस्याः सा कर्णजाहविलोचना इति उपपदलोपी बहुव्रीहिः । अतिसर्व्वेण माधुर्य्यसौन्दर्य्याभ्यां सर्व्वमतिक्रान्तेन वाक् च त्वक् च वाक्त्वचं तेन उपलक्षिता । प्राण्यङ्गत्वात् द्वन्द्वैकवद्भावः समासच् । पक्षतौ पक्षमूले प्रतिपदि चन्द्रलेखा इव स्थिता । प्रतिपच्चन्द्रोपमेयत्वात् सा नितरां तन्वङ्गी भासीदित्यर्थो लभ्यते ॥ १६ ॥

सुपादिति । शोभनौ पादौ यस्याः सा सुपात् । सङ्गासुपूर्व्वस्येति पादशब्दस्यपः इप् प्रत्ययस्य चैकस्विकत्वात् तदभावः । द्विरदनासा करिकर इव ऊरुर्यस्याः सा द्विरदनासोरूः । उपमानपूर्व्वादूरोरुच् । तलच्च मृदुनि च तलाङ्गुलि । कर्म्मधारयः । मृदु पाणीवतलाङ्गुलि यस्याः सा तथोक्ता । प्रथि-

उन्नसं दधती वक्त्रं शुद्धदन्तोलकुण्डलम्।
कुर्व्वाणा पश्यतः शंयून् स्रग्विणी सुहसानना ॥१८॥
प्राप्य चञ्चूर्य्यमाणासौ पतीयन्ती रघूत्तमम्।
अनुका प्रार्थयाञ्चक्रे प्रियाकर्त्तुं प्रियम्वदा ॥१९॥ कुलकं।

मानं पृथुत्वं दधानेन पृथुना इत्यर्थः घनेन निविड़ेन जघनेन उपलक्षिता सा ॥ १७ ॥

उन्नसमिति। उन्नता नासिका यस्मिन् तत् उन्नसम्। उपसर्गात् नसादेशः। शुद्धाः शुक्लाः दन्ता यस्मिन् तत् शुद्धदत्। अयान्त-शुद्धेत्यादिना दत्वादेशः। लोलकुण्डलं चञ्चलकुण्डलं वक्त्रं मुखम्। उच्यते अनेनेति वक्त्रं वक्त्रशब्दो मुखैकदेशे वर्त्तमानोऽपि कविभिः समुदाये प्रयुज्यते। दधती धारयन्ती स्रग्विणी मालावती सुहसं आननं यस्याः सा सुहसानना अतएव पश्यतो जनान् शंयून् सुखितान् कुर्वाना। अस्तार्थे युः। यद्वा अपश्यत इति पदच्छेदे अपश्यतां जनानां सुखकरी पश्यतान्तु पीड़ाकरी मदनवेदनाजननादिति भावः ॥ १८ ॥

प्राप्येति। पुनः पुनः गर्हितमाचरन्ती चञ्चूर्य्यमाणा। चरतेर्गर्हार्थे यङ्, ततः शानच्। भरतेनोक्तं गर्हितं पुनः पुनः चरन्तीति। पतीयन्ती आत्मनः पतिमिच्छन्ती अनुका कामुका प्रियम्वदा असौ राक्षसी रघूत्तमं लक्ष्मणं प्रियाकर्त्तुं अनुकूलयितुम्। आनुकूल्यार्थे डाच्। प्रार्थयाञ्चक्रे वक्ष्यमाणश्लोकेन स्वाभिलाषं विज्ञाप्य तत्पूरणायानुरुद्धवतीत्यर्थः अनुकेति निपातनात् साधु ॥ १९ ॥

सौमित्रे मामुपायंस्थाः कस्त्वामिच्छुर्वशम्बदाम् ।
सुभोगीनां सहचरीमशङ्कः पुरुषायुषम् ॥ २० ॥
तामुवाच स गोष्ठीने वने स्त्रीपुंसभीषणे ।
असूर्य्यम्पश्यरूपा त्वं किमभीरुरराय्यसे ॥ २१ ॥

किं प्रार्थितवतीत्याकाङ्क्षायामाह सौमित्रे इति । हे सौमित्रे सुमित्रानन्दन त्वं अशङ्कः निर्विकल्पः तथा इच्छुः अभिलाषुकः सन् कस्त्वां कामयमानां वशम्बदां ते वश्याहमिति वदन्तीं सुभोगीनां सुभोगाय हिताम् । सुभोगात् ढैनः । पुरुषस्य आयुः पुरुषायुषम् । निपातनात् साधु । पुरुषस्य आयुष्कालं व्याप्य यावज्जीवनमित्यर्थः सहचरीं अवैधव्यादियोगात् ते चिरसङ्गिनीं मां उपायंस्थाः परिणय । आशंसायां भूतवच्चेति लुङ् । "उपयमो विवाहे" इति आत्मनेपदम् । त्वद्भोगीनामिति पाठे भुज्यते अनेन अस्मिन् वेति भोगः शरीरं तव भोगाय हितां त्वद्भोगीनामित्यर्थः ॥ २० ॥

तामिति । स लक्ष्मणः तां उवाच । किमिति । गावस्तिष्ठन्ति अस्मिन् इति गोष्ठं भूतपूर्वं गोष्ठं गौष्ठीनं तस्मिन् गौष्ठीने । सम्प्रति गोसंचाराभावात् यत्र हिंस्रप्राणिसङ्घत्वमनुभोयते तस्मिन् इति भावः । अतः स्त्री च पुमान् च स्त्रीपुंसौ । निपातनात् साधु । तयोः भीषणे भयावहे वने । अति गोपनीयतया सूर्य्यमपि निषिद्धदर्शनं न पश्यतीति असूर्य्यम्पश्यं रूपं यस्याः सा तथोक्ता । नञ्पूर्वात् सूर्य्योपपदात् पश्यतेः खश् । त्वं न बिभेतीति अभीरुः सती किं किमर्थं रराय्यसे अत्यर्थं

मानुषानभिलष्यन्ती रोचिष्णुर्दिव्यधर्मिणी।
त्वमप्सरायमाणे ह स्वतन्त्रा कथमश्वसि ॥ २२ ॥
उग्रम्पश्याकुलेऽरण्ये शालीनत्वविवर्जिता।
कामुकप्रार्थनापट्वी प्रतिवक्ती कथन्नवा ॥ २३ ॥

भ्रमसि। अर्त्तिर्गत्यर्थात् यङ्। भीरुशब्दस्य क्रियावाचिनो मनुष्यजातिबोधकत्वाभावाद्डूप् न भवति। तथाच अमानुषीयमिति भङ्ग्या प्रदर्शितमित्यनुसन्धेयम् ॥ २१ ॥

मानुषानिति। मनोरपत्यानि मानुषास्तान् अभिलषन्ती कामयन्ती तैः सह रन्तुमिच्छन्तीत्यर्थः। रोचिष्णुः दीप्तिमती ज्वलद्भूषणादिभिरुल्लासमाना इत्यर्थः। दिवि भवा दिव्याः देवयोनित्वात् राक्षसाः इत्यर्थः तेषां धर्म्माः अस्तास्याः दिव्यधर्म्मिणी। अतएव अप्सरायमाणा अप्सराः इव आचरन्ती राक्षसभावं गोप्तुमिति भावः। त्वं इह वने स्वः आत्मा तन्त्रः प्रधानं यस्याः सा स्वतन्त्रा सती। "तन्त्रः कुटुम्बे ह्यङ्गे स्यात् कारणेऽपि परिच्छदे शास्त्रे प्रधाने सिद्धान्ते तन्त्रवाये गदोत्तमे" इति विश्वः। कथं अश्वसि भ्रमसि। स्वतन्त्रभ्रमणात् सा स्वैरिणीति सूच्यते ॥ २२ ॥

उग्रमित्यादि। उग्रं पश्यन्ति ये ते उग्रम्पश्याः सिंहव्याघ्रादयः मांसाशयत्वात् शबरादयो वा तैराकुले व्याप्ते अरण्ये। उग्रोपपदात् दृशेः खश्। शालां प्रवेष्टुमर्हति शालीना अदृष्टा तस्या भावः शालीनत्वं स्त्रीस्वभावसुलभा लज्जा तेन विवर्जिता निर्लज्जा इत्यर्थः। तथा कामुकस्य या प्रार्थना तस्यां पट्वी,

राघवं पर्णशालायामासिक्षानुरहसं पतिम् ।
यः स्वामी मम कान्तावानौपकर्णिकलोचनः ॥२४॥
वपुश्चान्दनिकं यस्य कार्ष्णवैष्टनिकं मुखम् ।
संग्रामे सर्व्वकर्म्मीणौ पाणी यस्यौपजानुकौ ॥२५॥

निपुणा त्वं पतिरस्या अस्तीति पतिवत्नी जीवद्भर्तृका । मतुपो वत्वं निपातनात् साधु । कथं वा कथमपि न भवसीति शेषः । पतिसत्त्वे ईट्क् स्वातन्त्र्यास्यासम्भवादिति भावः ॥ २३ ॥

राघवमिति । पर्णशालायां पुरोवर्त्तिनि उटजे स्थितमिति शेषः । अनुगतं रहः विजनस्थानं येन स अनुरहसस्तं एकान्ते स्थितं अतस्त्वदुपसर्पणयोग्यमित्यर्थः । अनुपूर्व्वात् रहस अच् । राघवं पतिं इच्छ पतित्वेन कुरु इत्यर्थः । यो राघवः मम स्वामी प्रभुः अतः सति तस्मिन् मदरणमयुक्तमिति भावः । कान्तावान् कान्तां प्रति समुचितावरणाभिप्राय इत्यर्थः । अहन्तु तपस्वीति ध्वनिः । कर्णयोः समीपं उपकर्णं तत्र भवः औपकर्णिकः साढ्ये सोचने यस्य स तथोक्तः कर्णायतलोचन इत्यर्थः । अनेन तस्य रूपवत्त्वं दर्शितम् ॥ २४ ॥

वपुरिति । यस्य राघवस्य वपुः शरीरं चान्दनिकं चन्दनेन चर्चितं, मुखं कार्ष्णवैष्टनिकं कर्णवेष्टनाभ्यां कृष्णताभ्यां राजितम् । एतेन तस्य विलासित्वं दर्शितम् । यस्य पाणी संग्रामे सर्व्वकर्म्मीणौ सर्व्वकर्म्मसु छेदनभेदनादिषु असिसायकादिसाधनेषु व्यापारिषु कुशलौ तथा चौपजानुकौ आजानुसम्मितौ । एतत् दृढत्वं तस्य वीरत्वं महापुरुषत्वञ्च सूचयति ॥ २५ ॥

वङ्को दुर्बलरक्षार्थमसिर्यंनीपनीविकः।
यश्चापमाश्मनप्रख्यं सेषुं धत्तेऽन्यदुर्वहम् ॥ २६ ॥
जेता यज्ञद्रुहां संख्ये धर्मसन्तानसूर्वने।
प्राप्य दारगवानां यं मुनीनामभयं सदा ॥ २७ ॥

वङ्क इति। येन, रामेण दुर्बलरक्षार्थं दुर्बलानां रक्षायै नीवीसमीपे प्रायेण भवतीति औपनीविकः वामपार्श्वादधःस्थायीत्यर्थः। स्त्रीकटौ वस्त्रबन्धेऽपि नीवी मूलधनेऽपि च" इति अभिधानात्, यद्यपि नीवीपदं स्त्रीकटिबन्धपरं, तथापि लक्षणयात्र पुंकटिबन्धस्याप्युपलक्षणम्। यश्च अन्यदुर्वहं अन्येन रामादन्येन दुःखेन उह्यते यत् तथोक्तं अश्मनो विकारः आश्मनः स्तेन प्रख्या सादृश्यं यस्य तत् तथोक्तं प्रस्तरघटितवत् दृढं सेषुं सबाणं चापं धत्ते धारयति। अतः शूरोऽयं परत्राणपरायण इति भावः॥ २६॥

जेतेति। यः संख्ये युद्धे यज्ञाय द्रुह्यन्ति यज्ञद्रुहः तेषां जेता। क्रियायोगात् कर्मणि षष्ठी। तथा धर्मस्य सन्तानं अनुबन्धं अविच्छिन्नभावमिति यावत् सूते जनयति साधयतीति यावत् यः स धर्मसन्तानसूः वर्णाश्रमधर्मपालननिरतः इत्यर्थः। वने यं प्राप्य मुनीनां दाराश्च गावश्च दारगवानि तेषाम्। निपातनात् साधु। सदा अभयं भयाभावः भवतीति शेषः। येषामेव प्राप्तिक्रिया तेषामेवाभयमिति समानकर्तृकत्वम्। यस्मादभयं प्राप्य मुनयः पत्नीभिः सह गार्हस्थ्यधर्ममनुपालयन्तः अग्निहोत्रादिकं निर्विघ्नमाचरन्ति, यस्य च शासनादि-

ततो वाह्यमानासौ रामशालां न्यविक्षत ।
मामुपायंस्त रामेति वदन्ती सादरं वचः ॥ २८ ॥
अस्त्रीकोऽसावहं स्त्रीमान् स पुष्यतितरां तव ।
पतिरित्यब्रवीद्रामस्तमेव व्रज मा मुचः ॥ २९ ॥
लक्ष्मणं सा हृषस्यन्ती महोक्षं गौरिवागमत् ।
मन्मथायुधसम्पातव्यथ्यमानमतिः पुनः ॥३०॥

दानीं यातुधानाः तेषां मन्त्रौषधो नाभिद्रुह्यन्ति, नापि श्वापदाः गा हिंसन्तीति तात्पर्यार्थः ॥ २७ ॥

तत इति । ततो लक्ष्मणवचनानन्तरं वाह्यमाना रामं हरन्ती, वाहृ प्रापणे इति धातोर्दैवादिकात् कर्त्तरि शानच् । अतएव हे राम मां उपायंस्त परिणयतु भवान् इति वचः सादरं सबहुमानं वदन्ती असौ रामशालां रामस्य उटजं न्यविक्षत प्रविष्टा । निपूर्वात् विशतेर्लुङ् । उपायंस्त इत्यत्र आशंसायां भूतवच्चेति लुङ् ॥ २८ ॥

अस्त्रीति । असौ लक्ष्मणः अस्त्रीकः अस्त्रीसहायः । नञ्भूतयेति कप् । अहं स्त्रीमान् उत्तमस्त्रीसहायः । प्रशंसायां मतुप् । स त्वं पतिर्भूत्वा पुष्यतितरां त्वामत्यर्थं पोषयिष्यतीत्यर्थः । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति सट्, अद्रव्यप्रकर्षात् च तराम् । तं एव व्रज गच्छ, मा मुचः मा त्याक्षीः । मुचतेर्लुङ्लदित्वादङ् । इति रामः अब्रवीत् उवाच ॥ २९ ॥

लक्ष्मणमिति । हृषं लब्धुमिच्छन्ती हृषस्यन्ती कामुकी ।

तस्याः सासद्यमानाया लोलूयावान्नृपोत्तमः।
असिं कौचेयमुद्यम्य चकारापनसं मुखम् ॥३१॥
अहं सूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया।
दण्डोऽयं चेत्रियो येन मय्यपातीति साब्रवीत् ॥३२॥

वृषशब्दात् क्यच् ततः शतः। आयुध्यन्ते एभिरायुधानि घञर्थे कविधानम्। मन्मथस्य आयुधानां सम्पातेन प्रहारेण व्यथ्यमाना पीड्यमाना मतिर्यस्याः सा तथोक्ता, स्मराहितेत्यर्थः सा वृषस्यन्ती गौः महान् उक्षा महोक्षस्तमिव। समासान्तष्टच्। पुनः लक्ष्मणं अगमत् प्राप ॥ ३० ॥

तस्या इति। लोलूया अत्यर्थं लवनं तदस्यास्तीति लोलूयावान् लुनातेर्यङि क्ते अप्रत्ययस्ततः स्त्रियामाप् वतुष। रघूत्तमः लक्ष्मणः कुत्सौ कोषे भवं विद्यमानं कौचेयं असिं उद्यम्य कोषात् उत्क्षिप्य सासद्यमानायाः समीपे गर्हितं सीदन्त्या उपविशन्त्याः तस्या मुखं अपगता नासिका यस्मात् तत् तथोक्तं चकार। उपसर्गाच्च इति अच् नासिका च नसादेशमापद्यते। सासद्यमानाया इत्यत्र गत्यर्थात् गर्हायां यङ्विधानात् यङ् ततः शानच् ॥ ३१ ॥

अहमिति। त्वया नूनं निश्चितं अहं सूर्पणखा इति नाम्ना न अज्ञायिषि न ज्ञातास्मि। कर्मणि लुङ्। येन हेतुना चेत्रे परचेत्रे जन्मान्तरशरीरे चिकित्स्य इति चेत्रियः एतज्जन्मनि नासाया अनुत्पत्त्या शरीरान्तरे एव तत्सम्भवात् उक्तं चेत्रिय इति। अयं दण्डः नासाच्छेदलक्षणः मयि अपाति पातितः।

पर्य्यशाप्सीद्दिविष्ठासौ संदर्श्य भयदं वपुः ।
अपिस्फवच्च बन्धूनां निनंक्षुर्विक्रमं मुहुः ॥३३॥
खरदूषणयोर्भ्रातोः पर्य्यदेविष्ट सा पुरः ।
विजिघाक्षयिपूरामं दण्डकारण्यवासिनोः ॥ ३४ ॥

धातेः कर्म्मणि लुङ् । इति सा अब्रवीत् । मत्स्वरूपाज्ञाना देव त्वयेदमप्रतिविधेयदण्डधारणे साहस कृतमिति भावः ॥३२॥

पर्य्यशाप्सीदिति । असौ सूर्पणखा दिवि तिठतीति दिविष्ठा सती । तत्पुरुषे कृतिबहुलमिति सप्तम्या अलुक् । भयदं वपुः संदर्श्य भीषणं शरीरं धारयित्वा लक्ष्मणं भीषयितु मिच्छुरित्यर्थः । संपूर्वात् पश्यतेः णिचि कृते लप् । पर्य्यशाप्सीत् आक्रुष्टवती । तया नष्टुं अन्तर्द्धातुमिच्छुः निनंक्षुः सा बन्धूनां खरदूषणादीनां विक्रमं बलं मुहुः पुनः पुनः अपिस्फवत् स्फीतीचकार विवर्द्ध कथयामास इत्यर्थः । स्फायतेर्निजन्तात् लुङ् । अपिस्फुरदिति पाठे प्रकाशितवतीत्यर्थः ॥ ३३ ॥

खरेति । रामं विजिघाक्षयिषुः खरादिभिः योधयितु मिच्छुः । विपूर्वात् अहेर्निजन्तात् सन् तत उः । सा दण्ड-कारण्यवासिनोः दण्डकान्तर्वर्त्तिनो जनस्थानस्य रावणाधि-कृतजनपदस्य रक्षणे नियुक्तयोरित्यर्थः । भ्रातोः खरदूषणयोः पुरः पुरतः पर्य्यदेविष्ट परिदेवन कृतवती । परिपूर्वात् देवृङ् देवने इत्यर्थात् धातोर्लुङ् ॥ ३४ ॥

कृते सौभागिनेयस्य भरतस्य विवासितौ।
पिता दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः ॥२५॥
मम रावणनाथाया भगिन्या युवयोः पुनः।
अयं तापसकाद्ध्वंसः क्षमध्वं यदि वः क्षमम् ॥ २६ ॥

कृते इति। सुभगायाः पतिबहुमतायाः कैकेय्याः अपत्यं पुमान् 'सौभागिनेयः तस्य भरतस्य कृते कार्यनिमित्तं दुर्भगे पतितिरस्कृते कौशल्यासुमित्रे तयोरपत्ये पुमांसौ दौर्भागिनेयौ यौ रामलक्ष्मणौ पिता दशरथेन विवासितौ राष्ट्रात् निराकृत्य निष्काशितौ। तयोः चेष्टितं मन्त्रासाच्छेदनरूपं कार्यं पश्यतं युवां प्रेक्षेथाम्। सौभागिनेय-दौर्भागिनेय-शब्दयोरुभयपदवृद्धिः ॥ २५ ॥

ममेति। रावणो नाथः प्रभुर्यस्याः तादृश्याः युवयोर्भगिन्या मम पुनः मम तु अयं तापसकात् कृतापसात्। कृत्वायां कन्। ध्वंसः नासिकाविनाशः वो युष्माकं गुरूणामित्यर्थः। युष्मदि गुरावेकेषामिति बहुवचनं तयोर्य्येऽलादित्यनुसन्धेयम्। यदि क्षमं क्षन्तुं योग्यम्। तर्हि क्षमध्वं उपेक्षध्वं रावण एव क्षास्यतीति भावः। क्षममिति क्षमायोग्यं सामान्यतः प्रयुक्तम्। युक्ते योग्ये हिते क्षममिति कोषात्। क्षममव्ययमित्यन्ये। पुनरित्यत्र पुर इति पाठे भगिन्या मम युवयोः पुरः अयं तापसकात् ध्वंस इत्यन्वयः कर्त्तव्यः ॥ २६ ॥

असंस्कृतिमसंव्यानावनुप्तिमफलाशिनौ ।
अभृतिमपरीवारौ पर्य्यभूतां तथापि माम् ॥३७॥
श्वःश्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा ।
प्राणिवस्तवमानार्थं व्रजाश्वसिहि मारुदः ॥३८॥

असंस्कृतिमिति । संस्कारेण तन्त्वादीनां विन्यासेन वपनेन भरणेन च निर्वृत्तं संस्कृतिमं तन्न भवतीति असंस्कृतिमं संव्यानं उत्तरीयं ययोः तथोक्तौ वल्कलवाससौ इत्यर्थः । वपनेन निर्वृत्तानि न भवन्तीति अनुप्तिमानि अयत्नलभ्यानि फलानि अशितुं भोक्तुं शीलं ययोः तौ तथोक्तौ । अभृतिमः भरणेन न निर्वृत्तः परीवारः अनुजीविलोको ययोः तौ अभृतिमपरीवारौ स्वगपरिजनौ इत्यर्थः । परिवियते अनेनेति परीवारः स्वगाणां ममनुष्यत्वात् "उपसर्गस्य घञ्यमनुष्ये बहुलम्" इति दीर्घः । तौ यद्यपि इष्टौ, तथापि मां पर्य्यभूतां परिभूतवन्तौ, नासिकाच्छेदनेन विमानयामासतुरित्यर्थः ॥ ३७ ॥

श्व इति । श्वःशब्दः प्रशंसामाह शोभनं श्रेय इति वाक्ये श्वः श्रेयसं निपातनात् साधु । अवाप्तासि प्राप्स्यसि । भविष्यदनद्यतने लुट् । इति सा भ्रातृभ्यां प्रत्यभाणि प्रत्युक्ता । अचिरेणैव तव रिपुं हत्वा त्वां सन्मङ्गलभाजं करिष्याव इति तस्यै प्रत्युत्तरं दत्तमिति भावः । तव मानार्थं तव मानखण्डनं माभूदिति हेतोः प्राणिवः जीवावः । तव मानत्राणमेवावयोर्जीवितस्य प्रयोजनमित्यर्थः । अतः व्रज स्वस्थानं गच्छ, आश्व-

जक्षिमोऽनपराधेऽपि नरान्नक्तन्दिवं वयम्।
कुतस्त्यं भीरु यत्तेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे ॥३९॥
तौ चतुर्दशसाहस्रबलौ निर्ययतुस्ततः।
पारग्रधिकधानुष्कशाक्तीकप्रासिकान्वितौ ॥४०॥

सिहि वैमनस्यं विजहीहि, मारुदः मारोदीः रोदनं त्यज। मायोगात् रोदितेर्लुङ्, पचे ङः ॥ ३८ ॥

क्षमध्वं यदि वः क्षममिति यत् उक्तं तत्रोत्तरमाह जक्षिम इति। वयम्। हिलेऽति बहुलनिर्देशः अन्यराक्षसयोगादित्यनुसन्धेयम्। नक्तञ्च दिवाच नक्तन्दिवम्। निपातनात् साधु। अनपराधे दोषाभावेऽपि नरान् जक्षिमः भक्षयामः। रुदादिलात् श्नट्। अतः हे भीरु भयशीले। भयशीलत्वं खलु तव शत्रुकृतपरिभवेऽप्यावयोरौदासीन्याग्रहया प्रकटितम्। द्रुह्यद्भ्योद्रोहं कुर्वद्भ्योऽपि तेभ्यः नरेभ्यः क्षमामहे मर्षयामः इति यत् तत् कुतस्त्यं कुतआगतं अमूलकमित्यर्थः। कुतः इति तसन्तात् भवार्थे त्यः। तेभ्य इत्यत्र यदभिप्रेत्य धात्वर्थः तत्र चतुर्थीविधानात् चतुर्थी। भीरु इत्यत्र सम्बुद्धौ गुणो न भवति संज्ञापूर्वको विधिरनित्य इति नियमात्। भरतस्त्वाह "तन्वादेर्वा" इति पचे ऊप् ततः ङसकरणात् न गुणः ॥ ३९ ॥

तावितिः। ततः प्रतिवचनानन्तरं चतुर्दशसहस्राणि परिमाणं अस्य चतुर्दशसाहस्रं तादृग् बलं ययोः तौ तथोक्तौ। उक्तरूपदृष्टिः। परशुधैर्युध्यन्ते पारशुधिकाः, धनुर्भिर्युध्यन्ते

अथ सम्पततो भीमान् विशिखैरामलक्ष्मणौ ।
बहुमूर्द्धो द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां मृधे ॥ ४१ ॥
तैर्हतैः कृत्तरुग्णसंभुग्नच्छुन्नभिन्नविपन्नकैः ।
निमग्नोद्विग्नसंक्षीणैः पन्नैः दीनैश्च मेदिनी ॥ ४२ ॥

धानुष्काः, शक्तिभिर्युध्यन्ते शाक्तीकाः, प्रासैः कुन्तैर्युध्यन्ते प्रासिकाः। एतेषां समाहारः पारश्वधिकधानुष्कशाक्तीकप्रासिकम् । सेनाङ्गत्वात् द्वन्द्वैकवद्भावः। तेन अन्विती अनुगतौ तौ निर्ययतुः संग्रामार्थं निर्गतौ ॥ ४० ॥

अथेति । अथ रामलक्ष्मणौ मृधे युद्धे विशिखैः शरैः बहवः मूर्द्धानो येषां ते बहुमूर्द्धानस्तान् द्वौ मूर्द्धानौ येषां तान् द्विमूर्द्धान् च तथा त्रयः मूर्द्धानः येषां तान् त्रिमूर्द्धान् च अतः भीमान् भयङ्करान् सम्पततः आक्रमणार्थमभिमुखमागच्छतः राक्षसान् । विशेषणोपादानात् विशेष्यप्रतिपत्तिः प्रकृतत्वात्। अहतां हतवन्तौ । हन्तेर्लङ् । "द्वित्रे मूर्धः" इति समासान्तः प्रत्ययः ॥ ४१ ॥

तैरिति । कृत्ताः छिन्ना शरैः ताः। रुग्णा भग्नहस्तपादाः। संभुग्नाः सम्यक् वक्रीकृताः भल्लाघातात् न्युब्जीकृता इत्यर्थः, भुज कौटिल्ये इति धातोर्भोदादिकात् क्तः। छुण्णाः संपिष्टदेहाः, छदिर संवरणे इति धातोरौधादिकात् क्तः । भिन्नाः विदारिताः । विपन्नकाः नष्टा अनुकम्पायां कन् । विपन्नका मृताः, विपूर्वः पदिर्गतौ वर्तते, स्वार्थे कुत्सायां वा कः इति भरतेनोक्तम् । तैः

केचिद्विपद्युमासेदुरन्ये दवथुमुत्तमम्।
सरक्तं वमथुं केचिद्भ्राजथुं न च केचन ॥ ४२ ॥
मृगयुमिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मरावुदन्यन्।

दृक्णरक्णसंभुग्नत्रुस्रभिन्नविपन्नकैः। तया निमग्नाः परिभूताः। भीत्या गुप्ता रुधिरप्रवाहे मग्ना वा इति भरतः। उद्विग्नाः भीताः। संक्षीणाः वयमपीदृशीं दशां प्राप्ता इति लज्जिताः। तैः निमग्नोद्विग्नसंक्षीणैः। दीनैः हा तात हा भ्रातरित्येवं भाषमाणैः। सुतादिदुःखान्वितैरिति भरतः। तैः राक्षसैः मेदिनी पद्रे पूरिता। प्रापूरणे पृलिपूर्त्तौ वेतिधातोः कर्म्मणि लिट। ते राक्षसा बहुधा निपीड़िता हिंसो भेजिरे, केचिच्च निहता भग्नमाहता वा रणभूमिमलञ्चक्रुरित्यर्थः ॥ ४२ ॥

केचिदिति। तेषां मध्ये केचित् वेपथुं कम्पं आसेदुः प्रापुः। अन्ये उत्तमं महान्तं दवथुं उपतापं आसेदुः। केचित् सरक्तं सशोणितं वमथुं छर्दनं आसेदुः शोणितं उद्गिरन्ति स्म। केचन च भ्राजथुं दीप्तिं शोभां न आसेदुः। सर्व्वे एव राक्षसाः परिभवदुःखाभिभूता म्लानिमुपयन्तित्यर्थः ॥ ४३ ॥

मृगयुमिति। अथ राक्षसपराभवानन्तरं त्रिमूर्द्धः त्रिशिरा नाम कश्चित् निशाचरः रघुतनयं रामं उपाययौ अभ्यधावत्। कः कमिव। दक्षिणे ईर्म्मं व्रणं यस्य स दक्षिणेर्म्मा "लुब्धयोगे" इत्यनिच्। "व्रणोऽस्त्रियामीर्म्ममरुः" इत्यमरः। व्याघ्रेण

रघुतनयमुपाययौ चिमूर्द्धा
विषभृदिवोग्रमुखं पतत्रिराजम् ॥ ४४ ॥
शितविशिखनिकृत्तकृत्स्नवक्त्रः
चितिभृदिव चितिकम्पकीर्णशृङ्गः ।

व्रणितदक्षिणाङ्गः मृगः, मृगं याति यः स मृगयुः श्वादिकः कुप्रत्ययः । तमिव । उदन्यन् उदकं पातुमिच्छन् जनः । उदकात् क्यचि उदनादेशः, ततः शटप्रत्ययः । मरौ निर्जले देशे दाहवतीं दावाग्नियुतां दिशं इव । तथा विषभृत् आशीविषः उग्रमुखं भीषणतुण्डं पतत्रिराजं खगपतिं गरुडमिव । व्रणितमृगादिभिरुपमानसामर्थ्यात् रामसन्निधानाभिगमनेन त्रिशिरसो मरणमवश्यम्भावीति सूचितम् । पुष्पिताग्राछन्दस्त्वमिदं यदुक्तं "अयुजि नयुगरेफतो यकारो युजिच नजौ जरगाश्च पुष्पिताग्रा" इति ॥ ४४ ॥

शितेति । शितैः तीक्ष्णैः विशिखैर्बाणैः निकृत्तानि छिन्नानि सत्त्वानि यज्ञानि यस्य स तथोक्तः, अखिलस्य समस्तस्य कुलस्य रक्षः कुलस्य क्षये यत् पूर्वलिङ्गं पूर्वचिह्नं भाविक्षयसूचकं उत्पातविशेषमस्तस्य्यः स त्रिशिराः चितिकम्पेन भूमिकम्पेन क्षीणानि विचिन्नानि शृङ्गाणि यस्य स चितिभृत् पर्वत इव । इदृक् पर्वतोऽपि अखिलस्य सर्वस्य कुलस्य लोकसमूहस्य क्षये

भयमुपनिदधे स राक्षसानाम्
अखिलकुलक्षयपूर्वलिङ्गतुल्यः ॥ ४५ ॥

इति श्रीभट्टिकाव्ये चतुर्थः सर्गः।

पूर्वलिङ्गं भवति इत्यनुसन्धेयम्। राक्षसानां भयं उपनिदधे जनयामास इत्यर्थः। इत्तच्चेदं पूर्ववत् ॥ ४५ ॥

इति श्रीभट्टीकायां चतुर्थः सर्गः।

## पञ्चमः सर्गः ।

निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितोरणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥ १ ॥
तौ खड्गमुषलप्रासचक्रबाणगदाकरौ ।
चकार्ष्टामायुधच्छायं रजःसन्तमसे रणे ॥ २ ॥

निराकरिष्णू इति । निराकरिष्णू शत्रुनिराकरणशीलौ, वर्त्तिष्णू प्रतियोधाभिमुखं वर्त्तनशीलौ, वर्द्धिष्णू मायया महाप्राणीद्भावनशीलौ, उत्पतिष्णू आकाशोत्पतनशीलौ, सहिष्णू शस्त्रप्रहारसहनशीलौ च खरदूषणौ तन्नामानौ रावणभ्रातरौ रणं परितः रणभूमेः समन्तात् चेरतुः,भ्रमतुः। तसन्तपरियोगात् द्वितीया । अत्र सर्वत्र शीलार्थे ष्णुच्प्रत्ययः ॥ १ ॥

तावितिः । खड्गश्च, मुषलश्च प्रासश्च चक्रञ्च बाणश्च गदा च ताः करे ययोस्तौ तथोक्तौ । जातिरप्राणिनामित्यनेन द्वन्द्वैकवद्भावे तु "बाणगदकरौ" इत्येवं स्यात् अतः खड्गमुषलप्रासचक्रबाणैः सहिता गदा करे ययोरिति शाकपार्थिवादित्वात् समास इति जयमङ्गलेन व्याख्यातम् । तादृशौ खरदूषणौ रजसा सम्यक् तमः यस्मिन्निति रजःसन्तमसे । समूपूर्वात्तमसः समाधान्तोऽच्प्रत्ययः । रणे रणाङ्गने आयुधानां छाया आयुधच्छायं । "नित्यं छायाबाहुल्ये" इति नपुंसकत्वे ह्रस्वत्वम् । अकार्ष्टां कृतवन्तौ लङीलुङ ॥ २ ॥

अथ तीक्ष्णायसैर्बाणैरधिमर्म्म रघूत्तमौ।
व्याधंव्याधममूढौ तौ यमसाच्चक्रतुर्द्विपौ ॥ ३ ॥
हतबन्धुर्जगामासौ ततः सूर्पणखा वनात्।
पारेसमुद्रं लङ्कायां वसन्तं रावणं पतिम् ॥ ४ ॥
संप्राप्य राक्षससभं चक्रन्द क्रोधविह्वला।
नामग्राहमरोदीत् सा भ्रातरौ रावणान्तिके ॥ ५ ॥

अथेति। अथ अमूढौ सावधानौ रघूत्तमौ अयसोविकार आयसं फलं तीक्ष्णानि आयसानि येषां तैर्बाणैः अधिमर्म्म मर्म्मसु जीवितस्थानेषु। विभक्त्यर्थेऽव्ययीभावः। व्याधं व्याधं विद्ध्वा विद्ध्वा। आभीक्ष्ण्ये णमुल् आभीक्ष्ण्ये द्विर्भवत इति द्विर्वचनम्। तौ द्विपौ खरदूषणौ यमसात् यमाधीनौ। "तदधीनवचने" इति साति:। चक्रतुः सावधानत्वात् तयोरायुधच्छायं निराकृत्य तौ निजघ्नतुरित्यर्थः ॥ ३ ॥

हतेति। ततः तदनन्तरं हतबन्धुः व्यापादितभ्रातृयुगला असौ सूर्पणखा वनात् दण्डकारण्यात् समुद्रस्य पारे पारेसमुद्रम्। "पारेमध्ये षष्ठ्यावा" इत्यव्ययीभावः। स्थितायां लङ्कायां वसन्तं पतिं प्रभुं खरदूषणमिति यावत्। रावणं जगाम तत्समीपमभ्यगच्छदित्यर्थः ॥ ४ ॥

सम्प्राप्येति। क्रोधविह्वला कोपविवशा सा राक्षसानां सभा राक्षससभम्। "सभा राजाऽमनुष्यपूर्व्वा" इत्यनेन क्लीवत्वम्। सम्प्राप्य चक्रन्द क्रन्दनं चकार। तथा रावणान्तिके,

दण्डकामध्यवात्तां यौ वीर रक्षःप्रकाण्डकौ ।
नृभ्यां संख्येऽक्षपातां तौ सभृत्यौ भूमिवर्द्धनौ ॥६॥

रावणसमीपे नामग्राहं नाम गृहीत्वा "हा वीर खर हा भगिनीवत्सल दूषण कासि देहि मे प्रतिवचनम्" इति तयोर्नामग्रहणपूर्वकं भ्रातरौ अरोदीत् तावुद्दिश्य अश्रुमोचनमकरोदित्यर्थः। अत्र नामग्रहणविशिष्टाया रोदनक्रियाया व्याप्तुमिष्टत्वात् रुदिः सकर्मकः इति जयमङ्गलेन सिद्धान्तितम्। भरतस्त्वाह "अश्रुमोचनमात्रे रुदिरकर्मकः शब्दयुक्तक्रन्दने तु सकर्मक इति प्राचः" इति। तथाच उत्तरचरिते "हद्धी हद्धी दुक्खिविषएण विप्पलद्धा अहं अज्जउत्तं आक्रन्दामि" इति। तथा इहैव द्वितीये। "उपारुरोदेव नदत्पतङ्गः कुमुदतीं तीरतरुर्दिनादौ" इत्यादिषु द्रष्टव्यम् ॥ ५ ॥

दण्डकामिति। हे वीर यौ रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ। "प्रशंसावचनैश्च" इति समासस्ततः स्वार्थे कन्। दण्डकां अध्यवात्तां अधिष्ठितवन्तौ वसतेर्लुङ्। : अधिपूर्वात् वसेरधिकरणस्य कर्मसंज्ञा। सभृत्यौ सानुचरौ तौ संख्ये संग्रामे नृभ्यां नराभ्यां भूमिं वर्द्धयतः इति भूमिवर्द्धनौ अक्षपातां क्षतौ। क्षधातोः कर्मणि लुङ्। भूमिवर्द्धनौ इत्यत्र नन्द्यादिलात् ल्युनः। "अवसु भूमिवर्द्धनः" इति त्रिकाण्डशेषः। तौ निहत्य तच्छवाभ्यां यथा चितेर्मांसिकोपचयो भवति तथा विहितमित्यर्थः। दण्डकानिति पाठे दण्डकारण्यसन्निवेशानित्यर्थः। यद्यपि प्रकाण्डमुद्धतमजाविति अमरेणोक्तं दृश्यते च गोप्रकाण्ड-

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा।
सार्द्धं कुमारसेनान्या शून्यश्चासीति को नयः ॥७॥
यदहं नाथ नायास्यं विनसा हतवान्भवा।
नाज्ञास्यस्त्वमिदं सर्व्वं प्रमादन् चारदुर्व्बलः ॥८॥

मित्यादौ अजहल्लिङ्गता तथापि कप्रत्यये सति "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपि" इति न्यायात् पुंस्त्वम्। वस्तुतस्तु पुंलिङ्गोऽपि प्रकाण्डशब्दो वर्त्तते। "निगड़ाक्रीड़नल-प्रकाण्डकाण्डाः" इति पुंनपुंसकवर्गे हेमचन्द्रः। "उद्यप्रकाण्डौ द्वौ प्रशंसायाम्" इति च हलायुधः ॥ ६ ॥

विग्रह इति। बृहतां वाचां पतिः बृहस्पतिः। पृषोदरादित्वात् साधु। पुरः अग्रे हितं विधत्ते पुरोधाः। बृहस्पतिः पुरोधा यस्य तेन बृहस्पतिपुरोधसा। कार्य्येषु पुरोधीयते इति पुरोधा मन्त्री इति जयमङ्गलेन व्युत्पाद्यते। तथा कुमारः कार्त्तिकेयः सेनानीः सेनापतिर्यस्य तेन तथोक्तेन शक्रेण सार्द्धं विग्रहो विरोध आसीत्। पुरा दैत्येनापि देवराजेन सह विग्रह्य जयश्रीलाञ्छितोऽभूरित्यर्थः। अधुना च शून्यः निरुद्योगः कार्य्याकार्य्यविचाररहितो वा असि भवसि इति को नयः का नीतिः दुर्नीतिरित्यर्थः। विजिगीषुणा तु सततमप्रमत्तेन भाव्यं त्वयितु ममभाग्यविप्लवात् तद्विपरीतं दृश्यते इति भावः ॥ ७ ॥

यदीति। हे नाथ अहं विगता नासिका यस्याः सा विनसा। नासिकाया नसादेशस्ततः सनासान्तोऽच्

दण्डकामध्यवात्तां यौ वीर रक्षःप्रकाण्डकौ ।
नृभ्यां संख्येऽक्षपातां तौ सभृत्यौ भूमिवर्द्धनौ ॥६॥

रावणसमीपे नामग्राहं नाम गृहीत्वा "हा वीर खर हा भगिनीवत्सल दूषण क्वासि देहि मे प्रतिवचनम्" इति तयोर्नामग्रहणपूर्वकं भ्रातरौ अरोदीत् तावुद्दिश्य अश्रुमोचमकरोदित्यर्थः। अत्र नामग्रहणविशिष्टाया रोदनक्रियाया व्याप्तुमिष्टत्वात् रुदिः सकर्मकः इति जयमङ्गलेन सिद्धान्तितम्। भरतस्त्वाह "अश्रुमोचनमात्रे रुदिरकर्मकः शब्दयुक्ताक्रन्दने तु सकर्मक इति प्राचः" इति। तथाच उत्तरचरिते "हद्धी हद्धी दुस्सिविणएण विप्पलद्धा अहं अज्जउत्तं आक्कन्दामि" इति। तथा हरैव द्वितीये। "उपारुरोदेव नदत्यतङ्गः कुमुद्वतीं तीरतरुर्दिनादौ" इत्यादिषु द्रष्टव्यम् ॥ ५ ॥

दण्डकामिति। हे वीर यौ रक्षःप्रकाण्डकौ प्रशस्तौ राक्षसौ। "प्रशंसावचनैश्च" इति समासस्ततः स्वार्थे कन्। दण्डकां अध्यवात्तां अधुषितवन्तौ वसतेर्लुङि। अधिपूर्वात् वसेरधिकरणस्य कर्मसंज्ञा। सभृत्यौ सानुचरौ तौ संख्ये संग्रामे नृभ्यां नराभ्यां भूमिं वर्द्धयतः इति भूमिवर्द्धनौ अक्षपातां क्षतौ। क्षधातोः कर्मणि लुङ्। भूमिवर्द्धनौ इत्यत्र नन्द्यादिलात् ल्युनः। "ग्रवस्तु भूमिवर्द्धनः" इति त्रिकाण्डशेषः। तौ निहत्य तच्छवाभ्यां यथा चितेर्मृत्तिकोपचयो भवति तथा विहितमित्यर्थः। दण्डकानिति पाठे दण्डकारण्यसन्निवेशानित्यर्थः। यद्यपि प्रकाण्डशुद्धतरुजाविति अमरेणोक्तं दृश्यते च गोप्रकाण्ड-

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा।
सार्द्धं कुमारसेनान्या शून्यश्चासीति को नयः ॥७॥
यद्यहं नाव नायास्यं विनसा हतवान्भवा।
नाज्ञास्यस्त्वमिदं सर्व्वं प्रमाद्यन् चारदुर्ब्बलः ॥८॥

मिलादौ अनहद्विहिता तथापि कप्रत्यये सति "स्त्रियिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्तेऽपि" इति न्यायात् पुंस्त्वम्। वस्तुतस्तु पुंलिङ्गोऽपि प्रकाण्डशब्दो वर्त्तते। "निगड़ाक्रीड़नल-प्रकाण्डकाण्डाः" इति पुंनपुंसकवर्गे हेमचन्द्रः। "उद्यप्रकाण्डौ द्वौ प्रयंसायाम्" इति च हलायुधः ॥ ६ ॥

विग्रह इति। हृहतां वाचां मतिः बृहस्पतिः। पृषोदरादित्वात् साधु। पुरः अग्रे हितं विधत्ते पुरोधाः। बृहस्पतिः पुरोधा यस्य तेन बृहस्पतिपुरोधसा। कार्य्येषु पुरोधीयते इति पुरोधा मन्त्री इति जयमङ्गलेन व्युत्पाद्यते। तथा कुमारः कार्त्तिकेयः सेनानीः सेनापतिर्यस्य तेन तथोक्तेन शक्रेण सार्द्धं विग्रहो विरोध आसीत्। पुरा इन्द्रेणापि देवराजेन सह विरुद्ध जयश्रीलाञ्छितोऽभूरित्यर्थः। अधुना च शून्यः निरुत्साहः कार्य्याकार्य्यविचाररहितो वा असि भवसि इति को नयः का नीतिः दुर्नीतिरित्यर्थः। विजिगीषुणा तु सततमप्रमत्तेन भाव्यं लघिष्ठ ममभाग्यविप्लवात् तद्विपरीतं दृश्यते इति भावः ॥ ७ ॥

यदीति। हे नाथ अहं विगता नासिका यस्याः सा विनसा। नासिकाया नसादेशस्ततः रुभासान्तोऽच्। केचित्तु,

करिष्यमाणं विज्ञेयं कार्यं किन्नु कृतं परैः ।
अपकारे कृतेऽप्यङ्गो विजिगीषुर्नवा भवान् ॥८॥

नसादेशस्य संज्ञाविषयत्वात् "वेर्गोवक्तव्यः" इति गादेशविधायकस्य वार्त्तिकस्य बाधकत्वाच्चात्र विगतया नासिकया उपलक्षिता इति व्याचक्षते । हतबान्धवा नाशितभ्रातृका सती यदि न आयास्यं त्वत्सकाशं नागच्छेयं, तदा प्रमाद्यन् अनवहितः तथा, कार्याकार्यज्ञानाय लोके चरतीति चरः । पचाद्यच् । चर एव चारः । स्वार्थे अण् । चारेण दुर्बलः हीनः चारदुर्बलः त्वं इदं सर्वं भगिनीधर्षणभ्रातृवधादिकं न अघ्रास्यः न जानीयाः । "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति लृङ् । अत्र निषेधवाचिना नञा क्रियातिपत्तेरभावप्रतीतावपि न दोषः तस्याप्रयोगे तु क्रियातिपत्तिप्रतीतेर्दुर्वारत्वात् । अतः कुमारसम्भवसञ्जीवन्यां "गामधास्यत् कथं नागः मृणालमृदुभिः फणैः । आरसातलमूलात्त्वमपालम्बिष्यथा न चेत्" इति अत्र मल्लिनाथेन "अत्र क्रियातिपत्त्यभावात् लृङ् प्रयोगचिन्त्यः" इति यदुक्तं तत् न सम्यक् ॥ ८ ॥

करिष्यमाणमिति । परैः शत्रुभिः करिष्यमाणं अपकारार्थं विधास्यमानमपि न तु विहितं कार्यं विज्ञेयं विजिगीषुणेति भावः । यत् कृतं परैः सम्पादितं, तत् किन्नु किमुत, तत् अवश्यमेव विज्ञेयमित्यर्थः । अपकारे कृतेऽपि अङ्गः अनभिज्ञः भवान् विजिगीषुः न वा न भवत्येव । अथ वाशब्द एवार्थकः । "वा स्यात् विकल्पोपमयोरेवार्थेऽपि समुच्चये" इत्यमरः । त्वं

हतस्त्वं पावे समितैः खट्वारूढः प्रमादवान्।
पानगौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥१०॥
अध्वरेष्वग्निचित्वत्सु सोममुत्वत आयमान्।
अत्तुं महेन्द्रियं भागमेति दुश्यवनोऽधुना ॥ ११ ॥

विजिगीषुणेत् कथं परावज्ञाप्रासोऽपि माध्यस्थमवलम्ब्य तिष्ठसीति भावः ॥ ९ ॥

हत इति। पावे भोजनकाले एव समिताः सविहिताः स्तैः अनुजीविभिरित्यर्थः। "पावे समिताद्यव" इति चेपे समासः। हतः क्षुटः खट्वामारूढः खट्वारूढः स्वल्पप्रस्थितः। "खट्वा चेपे" इति समासः। प्रमादवान् अनवहितचित्तः पाने गौण्डः प्रसक्तः पानगौण्डः। तथा उन्मना उद्भ्रान्तचित्तस्त्वं श्रियं राज्यलक्ष्मीं अत्यन्तं गामिनी अत्यन्तीना तत्तां भात्यन्तीनत्वं न नेता न प्रापयिष्यसि। गौणार्थकथनवर्जनात् न कर्मणि षष्ठी। यद्यपि महोदयं राज्यं प्राप्तवानसि तथापि नैतत्ते राजगुणविहीनस्य चिराय स्थास्यतीति भावः ॥ १० ॥

अध्वरेष्विति। अधुना दुश्यवनो वासवः अग्निं चितवन्तः अग्निचितः साग्निकाः। अग्निपूर्वात् चिनोतेरतीतकाले क्विप्। ते विद्यन्ते येषु तेषु अग्निचित्वत्सु आहिताग्निभिरनुष्ठितेषु इत्यर्थः। अध्वरेषु महेन्द्रियं महेन्द्रदेवताकं भागं हविर्भागं अत्तुं भक्षयितुम्। सोमं सुन्वन्ति ये ते सोमसुतः ते एषु सन्तीति सोमसुत्वतः तादृशान् आयमान् एति आयाति। पूर्वमिन्द्रस्य यज्ञभागः यज्ञाग्निभिर्विनुत आसीत् इदानीन्तु तव प्रमादात् स स्वभागं यथेच्छमाददातीत्यर्थः ॥ ११ ॥

आमिक्षीयं दधिक्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनञ्च नाप्युपघ्नन्ति राक्षसाः ॥ १२ ॥
युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः ।
रामो यच्चद्रुहो हन्ति कालकल्पशिलीमुखः ॥१३॥

आमिक्षीयमिति । आम्यते जलेन सिच्यते या सा आमिक्षा दध्ना सहितं घृतं पयः । औणादिकः सक् ततस्त्रियामाप् । तस्मै पक्वे दुग्धे दधियोगजा विकृतिः । "आमिक्षा सा घृतोष्णे या क्षीरे स्याद्दधियोगतः" इत्यमरः । आमिक्षायै हितं आमिक्षीयं दधि च क्षीरञ्च दधिक्षीरम् । द्वन्द्वैकवद्भावो व्यञ्जनत्वात् । पुरो दाश्यते दीयते पुरोडाः अन्नविकारः पिष्टकादिः । निपातनात् साधु । तस्मै हितं पुरोडाश्यं, ओषधिरेव औषधम् । "ओषधिः फलपाकान्ता" इत्यमरः । "स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति नपुंसकता । तथा हूयते हविः हव्यं क्षीरोदोहस्य विकारः हैयङ्गवीनं । निपातनात् साधु । "तत्तु हैयङ्गवीनं यत् क्षीरोदोहोद्भवं घृतम्" इत्यमरः । तच्च । एतानि राक्षसा न उपघ्नन्ति न नाशयन्ति । त्वयि उदासीने राक्षसाः स्वकार्य्यप्रमत्ता यन्नियं वस्तु न दूषयन्तीत्यर्थः ॥ १२ ॥

इदानीं कार्य्यप्रदर्शनेन प्रोत्साहयितुमाह युवेति । युवतिः जाया यस्य असौ युवजानिः, जायाया निङ् पुम्वद्भावश्च । पाणौ धनुर्यस्य असौ धनुष्पाणिः । "प्रहरणार्थेभ्यः परनिष्ठासप्तम्यौ" इति परनिपातः । भूम्यां तिष्ठति इति भूमिष्ठः कालकल्पशिलीमुखः मृत्युतुल्यसायकः रामः खविचारिणः आकाशचरणशीलान्

सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाशासते लोलां तां हस्तेकृत्य माऽवसीः ॥१६॥
लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात् ।
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते ॥१७॥

सहायेति । सहायवन्तः प्रशस्तसहायसम्पन्ना उद्युक्ता उत्साहवन्तः निपुणाः कार्यकुशलाश्च बहवः बहुसंख्यकाः पुरुषा यां त्वदीयां श्रियं आशासते कामयन्ते, आङ्पूर्वात् शासेरात्मनेपदं डिदभावश्च । लोलां चञ्चलां तां हस्तेकृत्य स्वीकृत्यापि माऽवसीः आश्वासं मा कार्षीः । हस्ते शब्दः सप्तम्यन्तप्रतिरूपकोऽव्ययः स्वीकारे वर्त्तते, तस्य गतिसंज्ञायां समासे ल्यबादेशः । स्वभावचञ्चला लक्ष्मीः स्वल्पेनापि प्रमादेन भज्यते, बहवश्च उद्योगिनस्तामाकाङ्क्षन्ति अतो निजायत्तामपि तामप्रमत्तेन मनसा सततमनुपालयेति भावः ॥ १६ ॥

लक्ष्मीरित्यादि । कुलात् अटति कुलं विहाय गच्छतीति कुलटा पुंश्चली इव । निपातनात् साधु । पुंभिः योगः पुंयोगः बहुपुरुषसंसर्गः तं आशंसुः अभिलषन्ती "सनाशंसभिक्ष उः" इति कर्त्तरि उप्रत्ययः । लक्ष्मीः पत्युः अन्तिके अदूरे स्थितापि । दूरान्तिकार्थैरित्यादिना षष्ठी । कुतूहलात् कौतुकात् छलेन व्याजेन किञ्चित् छिद्रं प्राप्य इत्यर्थः अन्यं पुरुषं निरीक्षते साभिलाषं पश्यति । इयमेवहि लोलतायाः परा काष्ठा यत् स्वामिसन्निधानेऽपि पुरुषान्तर-प्रार्थनमिति भावः ॥ १७ ॥

योषिद्वृन्दारिका तस्य दयिता हंसनादिनी।
दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला ॥१८॥
नास्यं पश्यति यस्तस्या निंसे दन्तच्छदं न वा।
संशृणोति न चोक्तानि मियासौ विहितेन्द्रियः ॥१९॥

सम्प्रति प्रलोभनार्थं जानकीं वर्णयति। योषिदिति। तस्य रामस्य दयिता प्रिया योषितां मध्ये वृन्दारिका श्रेष्ठा। पाणिनीयास्तु योषिच्चासौ वृन्दारिका चेति समासं कुर्व्वन्ति विशेष-सूत्रबलात् "न निर्द्धारणे" इति षष्ठीसमासनिषेधाच्च। हंस इव नदितुं शीलं यस्याः सा हंसनादिनी। "कर्त्तर्य्युपमाने" इति णिनिः। दूर्व्वाकाण्डं इव स्थिता तद्वत् सा, श्यामा "शीते सुखोष्णसर्व्वाङ्गी ग्रीष्मे तु सुखशीतला। तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते" इत्युक्तलक्षणान्विता। यद्वा श्यामा अप्रसूताङ्गना। यदुक्तं विश्वप्रकाशे "अप्रसूताङ्गनायाञ्च श्यामा-सोमलतौषधौ" इति। न्यग्रोधपरिमण्डला "स्तनौ सुकठिनौ यस्या नितम्बे च विशालता। मध्ये क्षीणा भवेत् या सा न्यग्रोधपरिमण्डला" इत्युक्त-स्वरूपा। न्यग्रोधस्य वटवृक्षस्य इव परिमण्डलं यस्याः सा तथोक्ता यद्वा वटपात् वटपादपः सर्व्वतो विस्तृतिमापद्यते, तद्वत् सा गुरुणा नितम्बबिम्बेन पथात् प्रसृतत्वमधिगताइव तन्वी इति केचित्। दूर्व्वाकाण्डमिव श्यामा श्यामवर्णेति व्याख्यानं तु पुराणविरुद्धं तत्र गौरत्वकथनादित्यनुसन्धेयम्। हंसनादिनीत्यत्र हंसगामिनीति पाठान्तरम् ॥१८॥

नास्यमिति। यो जनः तस्या आस्यं मुखमण्डलं न पश्यति,

सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः ।
तप्ये कान्तान्तरैः सार्द्धं मन्येऽहं धिङ्निमज्जथुम्॥२०॥
न तं पश्यामि यस्यासौ भवेन्नोदेजया मतेः ।
त्रैलोक्ये नापि विन्देस्त्वं तां क्रीत्वा सुकृती भव॥२१॥

अथवा दन्ताः छाद्यते अनेनेति दन्तच्छदं अधरम् । छादेः करणे घस्तृतो ह्रस्वः । न निंस्ते न सुम्भति । निसि लंङ् सुम्भने । उक्तानि न च संशृणोति । असौ मिथ्या विहितेन्द्रियः । विधात्रा तस्मै यत् चक्षुरादीनि इन्द्रियाणि दत्तानि, तत् निष्फलं अतस्तस्याप्यलाभोऽपि विडम्बनैव इति भावः ॥ १९ ॥

सार इति । असौ रामदयिता इन्द्रियाणां ये अर्थाः भोग्या विषयाः तेषां मध्ये सारः उत्कर्षः रूपादयतिशययोगात् । "अर्थः प्रकारे विषये वित्तकारणवस्तुषु । अभिधेये च शब्दानां हेतौ चापि प्रयोजने" इति विश्वः । असौ रामप्रिया यस्य जनस्य सम्बन्धे श्रूयते इति शेषः, तस्य नन्दथुः आनन्दः स एव सुखीत्यर्थः, तस्मै शय्यायां कान्तान्तरैः अन्यस्त्रीभिः सार्द्धं निमज्जथुं निमज्जनं शयनमित्यर्थः धिक् इत्यहं मन्ये ॥ २० ॥

नेति । तं न पश्यामि, तादृशो जनो जगति दुर्लभ इत्यर्थः । असौ जानकी यस्य मतेः उदेजयति उत्कम्पयतीति उदेजया क्षोभजनिका । उत्पूर्वादेजयतेः गः । ल्यधीगात् कर्मणि षष्ठी । न भवेत् । अतः त्वं त्रयः लोका एव त्रैलोक्यं भातुर्वर्णादित्वात् स्वार्थे ष्यञ् । तेनापि तां क्रीत्वा विन्दतीति विन्दः लाभवान् सन् । कर्तरि गः । सुकृतमस्यास्तीति

नैवेन्द्राणी न रुद्राणी न मनावी न रोहिणी।
वरुणानी नचाग्नायी तस्याः सीमन्तिनी समा ॥२२॥
प्रत्यूचे राघवेन्द्रस्तामाश्वसिहि विभेषि किम्।
त्वज नक्तञ्चरि क्षोभं वाचाटे रावणोद्वहम् ॥ २३ ॥

सुकृती पुण्यवान् भव लोके पुण्यशालितया प्रथितो भव इत्यर्थः। यद्वा सुकृती सुष्ठुकृती कृतार्थो भव सफलजन्मलाभो भवेत्यर्थः ॥ २१ ॥

ननु अन्या अपि देवादिषु वरस्त्रियः सन्ति तत् किमनया मानुष्येत्याशङ्क्याह नैवेति। तस्याः समा तुल्या, सीमन्तः केशेष्विति निपातनात् साधु, अन्यत्र सीमान्तः। स विद्यते यस्याः सा सीमन्तिनी। स्त्री इन्द्राणी इन्द्रपत्नी शची नैव। रुद्राणी गौरी न। उभयत्र ङीप् आनङ् च। मनावी मनुभार्या शतरूपा न। ङीपि मनोरौकारादेशः। रोहिणी चन्द्रपत्नी न। रोहित शब्दात् ङीप् नकारश्च। वरुणानी वरुणपत्नी न। अत्र पूर्ववत् ङीप् आनङ् च। तथा अग्नायी अग्निभार्या स्वाहा न। ऊपि अग्नेरैकारादेशः। सा रमणीमण्डले अपूर्वा सृष्टिरिति भावः ॥ २२ ॥

प्रत्यूचे इति। राघवेन्द्रः तां प्रत्यूचे प्रतिवचनं उक्तवान्। किमिति आश्वसिहि आश्वस्ता भव, किं कथं विभेषि भयमापद्यसे। हे नक्तञ्चरि रात्रिञ्चरि क्षोभं दुःखं त्वज तापसकावधीरणया यत्ते निर्वेदस्तं परिहर। क्षोभमिति दुःखं मां प्रति रोषं वा। वाचोऽस्तीत्यर्थे वाग्मिवाचाटवाचाला निपात्यन्ते।

मामुपास्त दिदृक्षावान् याष्टीकव्याहतो हरिः ।
आञ्जालाभोन्मुखो दूरात् काचेनानादरेक्षितः ॥२४॥
विरुग्णोद्रधधाराग्रः कुलिशो मम वक्षसि ।
अभिन्नं शतधात्मानं मन्यते बलिनं बली ॥ २५ ॥

बाघाटे बाघाले । "बाघाटो बहुगर्ह्यवाक्" इत्यमरः । अहं हि निर्घृतं रावणः, रवणस्य विश्रवसः अपत्यं यद्वा रावयति सर्वभूतानि आक्रन्दयतीति रावणः । प्रसिद्धनामानुवादात् उत्कर्षः सूचितः । अतोऽहं रामलक्ष्मणौ हत्वा तव क्षोभं निराकरिष्यामीति भावः ॥ २३ ॥

सम्प्रति आत्मपौरुषख्यापनार्थमाह मामिति । दिदृक्षावान् दर्शनेच्छावान् द्रष्टुमिच्छुरित्यर्थः । याष्टीकेन वेत्रधारिणा द्वारिकेण व्याहतः विनिवारितः याष्टीकव्याहतस्तथापि आञ्जालाभोन्मुखः मदाञ्जालाभार्थं ऊर्ध्वमुखः हरिः इन्द्रः दूरात् सन्निधानगमनायोग्यत्वादिति भावः । काचेन कटाक्षेण, कौटिल्यपदर्थे इति काद्देशः । यद्वा कु अक्षं तेन काचेन कुदृष्ट्या, अक्षशब्दस्य इन्द्रियसामान्याभिधायित्वेऽपि ईक्षितशब्देन परामर्शात् चक्षुषि वर्णनम् । अथवा कु अक्षि यस्य तेन काक्षेण मया मक्ष्यस्योरिति यत् । अनादरेक्षितः अवज्ञाविलोकितः सन् मयेति शेषः । मां उपास्त सेवितवान् । उपपूर्वात् आस्तेर्लङ् ॥ २४ ॥

विरुग्णेति । बलमस्यास्तीति बली मत्तवान् कुलिशः वज्रः मम वक्षसि विरुग्णोद्रधधाराग्रः कुण्ठितविपुलधाराकोटिः

कृत्वा लङ्काद्रुमालानमहमैरावतं गजम् ।
बन्धनेऽनुपयोगित्वान्नतं तृणवदत्यजम् ॥ २६ ॥
आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा ॥२७॥

सत्रपि शतधा अभिन्नं अभग्नं आत्मानं बलिनं मन्यते प्रत्येति । अत्र प्रतीयमानोत्प्रेक्षा । असुरनिवहविदारणेन पूर्वं सारवत्तया प्रसिद्धोऽपि महेन्द्रस्य कुलिशः "अहो मे बलवत्ता यद्रावणवक्षसि निपातितोऽपि शतधा न चूर्णीकृतोऽस्मि" इति आत्मानं बहुमन्यते इत्यर्थः ॥ २५ ॥

कृत्वेति । अहं इरावान् समुद्रः तव भवं ऐरावतं गजं आलीयन्ते एष्विति आलानानि । अधिकरणे ल्युट लीयतेर्ङादेशः । लङ्कायां ये द्रुमाः त एव आलानानि बन्धनस्तम्भा यस्य तथोक्तं कृत्वा बन्धने अनुपयोगित्वात् प्रयोजनाभावात् तस्य स्वयमेव वशीभूतत्वात् अनुपादेयत्वाद्वेति भावः । नतं नम्रं तं तृणवत् अत्यजं त्यक्तवान् । भरतस्तु तं न अत्यजं अपितु अत्यजमेवेति विरुद्धालंकारः ॥ २६ ॥

आहो इति । मम रावणस्य अहोपुरुषस्य भावः आहोपुरुषिका कार्यसिद्धावपि तत्साधने वृत्तिः तां पश्य । यतः सद्रत्नकान्तिभिः सत्कृष्टमणिप्रभाभिः ध्वस्तान्धकारे निरस्ततिमिरेऽपि पुरे सदा सततं पौर्णमासीभिन्नतिथिष्वपि पूर्णेन्दोः सकलकलान्वितचन्द्रस्य सन्निधिः सन्निधानं अस्तीति शेषः । प्रयोजनाभावेऽपि भीत्वा पूर्णीभूत्वा चन्द्रस्तिष्ठति देवैरपि भीत्वा नासौ

हृतरत्नश्रुतोद्योगो रक्षोभ्यः करदो दिवि ।
पूतक्रतायीमभ्येति सव्रपः किन्न गोत्रभित् ॥२८॥
अतुल्यमहसा सार्द्धं रामेण मम विग्रहः ।
चपाकरस्तथाप्येष यतिष्ये तद्विनिग्रहे ॥ २९ ॥

पीयते चन्द्रोपमानि च रत्नानि मम सन्तीति सूचितम् । अहमेव पुरुषो यत्रेति सम्भावनायामाहोपुरुषिका निपातनात् साधु । "आहोपुरुषिका दर्पात् या स्यात् सम्भावनात्मनि" इत्यमर इति भरतेन व्याख्यातम् ॥ २७ ॥

हृतेति । हृतानि रत्नानि जातित्वेऽवस्तूनि ऐरावदुच्चैःश्रवःपारिजातादीनि यस्य तथोक्तः । "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति यादवः । च्युतोद्योगः उद्योगहीनः निरुत्साह इति यावत् । दिवि स्वर्गे स्थितोऽपि रक्षोभ्यो लङ्कावासिभ्यो राक्षसेभ्यः करं राजग्राह्यभागं ददाति इति करदः गोत्रभित् इन्द्रः सव्रपः सलज्जः सन् किं न पूताः क्रतवः यस्य स पूतक्रतुरिन्द्रः तस्य पत्नीं पूतक्रतायीं शचीम् । हपाक्ष्यन्नीत्यादिना ईप् एङ् च । अभ्येति अभिगच्छति । यदि स्त्रीजनसन्निधानेऽपि लज्जां जनयति, तदतीव सदुःसहमिति भावः ॥ २८ ॥

अतुल्येति । अतुल्यमहसा असदृशतेजसा हीनबलेनेत्यर्थः रामेण सार्द्धं एवम्विधस्य मम विग्रहः युद्धं चपाकरः लज्जाकरः । तथापि एषोऽहं तद्विनिग्रहे तस्य विविधनिग्रहविषये यतिष्ये अविलम्बेनैव यत्नं करिष्यामि सम्भावयेति शेषः । सर्वत्रान-

उत्पत्य खं दशग्रीवो मनोयायी शितासृभृत्।
समुद्रसविधावासं मारीचं प्रति चक्रमे॥ २०॥
सम्पत्य तत्सनीडेऽसौ तं वृत्तान्तमशिश्रवत्।
वस्तुनाथ श्रुतार्थेन तेनागादि दशानन:॥ २१॥
अन्तर्दत्त रघुव्याघ्रात् तस्मात् त्वं राक्षसेश्वर।
यो रणे दुरुपस्थानो हस्तरोधं दधद्धनुः॥ २२॥

सामीप्ये वर्त्तमानवदिति विकल्पेन लटो विधानात् लुङुदाहृतः। न खलु त्रिभुवनविजयिनो मम तापसकेन युद्धं युज्यते, तथापि मानत्राणं सर्व्वथा कर्त्तव्यमिति भावः॥ २८॥

उत्पत्येति। मन इव यातुं शीलमस्य मनोयायी कर्त्तर्युपमान इति णिनिः। शितासृभृत् गृहीततीक्ष्णचन्द्रहासः दशग्रीवो दशकन्धरः रावणः खं आकाशं उत्पत्य उड्डीय समुद्रस्य सविधे समीपे आवासो यस्य तं मारीचं ताड़कापुत्रं प्रति लक्ष्यीकृत्य चक्रमे गतः। अनुपसर्गादिति आत्मनेपदम्। "सदेशाभ्याससविधसमर्य्यादसवेद्यवत्" इत्यमरः॥ २०॥

सम्पत्येति। असौ रावणः तस्य मारीचस्य सनीड़े समीपे तत्सनीड़े। "समीपेनिकटासन्नसन्निकृष्टसनीड़वत्" इत्यमरः। सम्पत्य सङ्गत्य अवतीर्य्य तं वृत्तान्तं सूर्पणखोक्तं अशिश्रवत् श्रावयामास। श्रुणोतेर्निजन्तात् लुङ्। अथ श्रुतार्थेन ज्ञातवृत्तान्तेन वस्तुना भयशीलेन तेन दशानन: दशवदनः अगादि अभिहितः। गदेः कर्म्मणि लुङ्॥ २१॥

अन्तरित्यादि। हे राक्षसेश्वर त्वं तस्मात् वीरत्वेन प्रसि-

भवन्तं कार्त्तवीर्य्यो, यो हीनसन्धिमचीकरत् ।
जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकम् ॥२३॥

स्तात् । प्रक्रान्तप्रसिद्धानुभूतपूर्व्वार्थे तत्परं यत्परमनपेक्षते । रघुव्याघ्रात् रघुश्रेष्ठात् । रघुव्याघ्रादित्यत्र "अन्तर्द्धौ येनादर्शनमिच्छति" इति पञ्चमी । "सुश्रेष्ठरपदे व्याघ्रपुङ्गवर्षभकुञ्जरसिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" इत्यमरः । अन्तर्द्धत्ते यथा न तेन दृश्येथास्तथा व्यवहितोभव इत्यर्थः । अन्तःपूर्वात् दधातेर्लोट् । यो रामः हस्तेन रुद्ध्वा यथा हस्तस्यान्यकर्म्मनिवृत्तिस्तथा दृढं धृत्वा इत्यर्थः । हस्तोपपदात् रुधेर्णमुल् । धनुः दधत् गृह्णन् । नाभ्यस्तात् शतुर्नुम् इति नुमभावः । अतएव दुःखेन उपस्थीयते उपगम्यते इति दुरुपस्थानः । कर्म्मणि लुट् । शत्रुभिस्तस्य समीपगमनमेवाशक्यं किं पुनर्युद्धमिति भावः ॥२२॥

तदेव दुरुपस्थानत्वं स्फुटयन्नाह भवन्तमिति । यः कृतवीर्य्यस्य अपत्यं पुमान् कार्त्तवीर्य्यः सहस्रबाहुरर्জ্জুनः भवन्तं हीनेन दुर्बलेन कर्त्रा यः सन्धिं तं अचीकरत् कारयामास । हीनबलो हि प्रतियोधो यादृशं सन्धिमर्हति तादृशं सन्धिं बलाद्विर्জিत्य भवन्तं कारितवानित्यर्थः । यद्वा हीनो निन्द्यो यः सन्धिस्तथोक्तम् । सः रामः सर्वलोकेषु विदितः सार्व्वलौकिकः अपि समस्तलोकस्य निःक्षत्रियीकरणात् सुप्रसिद्धम् । सुभगादित्वादुभयपदस्थितस्वरयोर्हि । तस्य कार्त्तवीर्य्यस्य हन्तारं परशुरामम् । हन्तेर्भावे कर्म्मणि षष्ठी । जिगाय जितवान् ।

यमास्यदृग्वरी तस्य ताड़का वेत्ति विक्रमम् ।
शूरम्मन्यो रणाच्चाहं निरस्तः सिंहनर्दिना ॥३४॥
न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाप्यसौ ।
अनुभूतो मया चासौ तेन चान्वभविष्वहम् ॥३५॥

अतस्ते न तव युद्धवार्त्तापि न युज्यते । पुरा किल जामदग्न्यः अग्निहोत्रधेनुमपहृत्य गच्छतः कार्त्तवीर्यार्जुनस्य बाहुसहस्रं परशुना चिच्छेद इति पौराणिकी कथाऽनुसन्धेया । "सार्वलौकिकः" इति पाठे तस्य राम इति पदेनान्वयः । भरतेनोक्तं भवन्तं हीनसन्धिं भग्नसन्धिं अचीकरत् कृतवान् । कृञः स्वार्थे णिः । "चुम्यौंविर्वा" इत्यस्य योगविभागात् क्वचिच्चुरादेरन्यस्मादपि स्वार्थे णिर्वा भवतीति बोध्यं तेन "रामो राज्यमकारयत्" इत्यादिप्रयोगाः सङ्गच्छन्ते इति ॥ ३३ ॥

यमेति । यमास्यं मृत्युमुखं दृष्टवती यमास्यदृग्वरी तद्दर्शनेन निहता इत्यर्थः । दृगेः क्विप् तत ईप् रङ् च । ताड़का तस्य रामस्य विक्रमं वीर्यं वेत्ति जानाति । वर्त्तमानसामीप्ये इति भूते लट् । च किञ्च आत्मानं शूरं मन्यते इति शूरम्मन्यः । आत्ममाने खश् । अहं सिंह इव नर्दतीति यः स सिंहनर्दी तेन सिंहनादिना रामेण । कर्त्तर्युपमाने इति णिनिः । रणात् रणभूमेः निरस्तः बहिष्कृतः । दृगोऽहमपि तस्य विक्रमं जानामीत्यर्थः ॥ ३४ ॥

नत्वमिति । तेन रामेण त्वं न अन्वभाविष्ठाः अनुभूतोऽसि ।

अधयङ् शस्त्रभृतां रामो न्यञ्चस्तं प्राप्य मद्विधाः ।
स कन्याशुल्कमभनक् मिथिलायां मखे धनुः ॥३६॥
संवित्तः सह्युध्वानौ तच्छक्तिं खरदूषणौ ।
यज्वानश्च ससुत्वानो यानोपीन्मखेषु सः ॥ ३७॥

असौ रामोऽपि त्वया न अन्वभावि न अनुभूतः परीक्षित-विक्रमोऽस्ति । अतस्तस्मिन् तवेयमवधीरणा । किन्तु मया च मया पुनः असौ अनुभूतः, तेन च अहं अन्वभविमि विदित-सारोऽस्मि । अतो मद्वचनं ग्राह्यमित्यर्थः । सर्वत्र कर्मणि लुङ् ॥ ३५ ॥

अधयडिति । रामः शस्त्रभृतां योधानां मध्ये अधयङ् अधिकः अग्रेसर इत्यर्थः । अधिपूर्वादञ्चतेर्गत्यर्थात् कर्त्तरि क्विन् । यद्वा अधयञ्चते आधिक्येन पूज्यते इति अधयङ् अञ्चतेः कर्मणि क्विप्, पूजार्थकत्वात् नलोपाभावश्च । मद्विधाः मादृश्याः पुरुषाः तं प्राप्य तस्य पुरतः इत्यर्थः । न्यञ्चन्ति अधोगच्छन्ति इति न्यञ्चः हीना इत्यर्थः, निरञ्चाधोभागे वर्त्तते पूर्ववत् । स रामः मिथिलायां जनकराजधान्यां मखे यज्ञे कन्यायाः सीतायाः शुल्कं पणः कन्याशुल्कम् । यो रौद्रं धनुरारोपित-गुणं करोति तस्मै कन्या दीयते इति मूल्यीकृत्य स्थापितमित्यर्थः । धनुः अभनक् बभञ्ज । भञ्जे रौधादिकात् लङ् ॥ ३६ ॥

संवित्त इति । सह तेन सार्द्धं युध्वानौ युद्धवन्तौ । युधेः क्वनिप् । खरदूषणौ तव भ्रातरौ तस्य रामस्य शक्तिं तच्छक्तिं

सुखजातः सुरापीतो नृजग्धो मालधारयः।
अधिलङ्कं स्त्रियो दीव्य मारय्वा बलिविग्रहम् ॥३८॥
तं भीतङ्कारमाक्रुश्य रावणः प्रत्यभाषत।
यातयामं विजितवान् स रामं यदि किन्नतः ॥३९॥

संवित्तः सम्यक् जानीतः। वर्त्तमानसामीप्ये इति भूते लट्। अकर्म्मकत्वाभावात् सम्पूर्व्वात् विदेर्णिजनेपदम्। तया सुतवत्तः सुत्वानः सोमयाजिनः। सुनोतेः क्वनिप्। तैः सह ससुत्वानः यज्वानश्च। "यज्वा तु विधेनेटवान्" इत्यमरः। संविदन्तीति वचनविपरिणामेन योज्यम्। यान् यज्वनः सुत्वनश्च स मखेषु अगोपीत् अरक्षीत्, तेषां यज्ञविघ्नकारिणां राक्षसानां हननात् तेऽपि जानन्तीत्यर्थः ॥ ३७ ॥

सुखेति। त्वं अधिलङ्कं लङ्कायाम्, विभक्त्यर्थे अव्ययीभावः। जातं सुखमस्य सुखजातः, सुरापीतः पीतमदिरः, नृजग्धो भुक्तमानुषः, अदेर्जग्धादेशः। सर्वत्र आहिताग्न्यादिषु पाठात् परनिपातः। मालं धारयति इति मालधारयः सन्। कर्त्तरि यः। स्त्रियः स्त्रीभिः दीव्य क्रीड़। दिवः करणस्य कर्म्मसंज्ञा द्वितीया च। बलिना वीर्य्यवता रामेण विग्रहं संग्रामं मारय्वाः माकार्षीः। न खलु विलासिनस्ते प्रबलविरोधो युज्यते इति भावः ॥ ३८ ॥

तमिति। रावणः तं मारीचं भीतं ज्ञात्वा भीतङ्कारं भीतोऽसीति उक्त्वा इत्यर्थः। कर्म्मण्याक्रोशे क्वौ खमुञ्। आक्रुश्य विनिन्द्य गर्हित्वा वा प्रत्यभाषत। स दाशरथिः यातयामं

अघानि ताड़का तेन लज्जाभयविभूषणा ।
स्त्रीजने यदि तत् श्राघ्यं धिक्लोकं क्षुद्रमानसम् ॥४०॥
यद्गेहेनर्दिनमसौ शरैर्भीरुमभाययत् ।
कुब्रह्मयज्ञके रामो भवन्तं पौरुषं न तत् ॥ ४१ ॥

गलितवयसं रामं परशुरामं विजितवान् यदि ततः किम् । जराजीर्णस्य जामदग्न्यस्य निर्जयात् किं स शूर इति मन्तव्य इति भावः । एतेन "जिगाय तस्य हन्तारम्" इत्यादिना यदुक्तं तदपास्तम् ॥ ३९ ॥

अघानीति । तेन रामेण लज्जा भयं च विभूषणं यस्याः सा तथोक्ता नतु शौर्यभूषणा इति भावः । ताड़का अघानि व्यापादिता । हन्तेः कर्मणि लुङ् । स्त्रीजने तत् हननं श्राघ्यं श्लाघनीयं यदि तदा क्षुद्रमानसं हीनचित्तं लोकं जनं धिक् । स्त्रीवधोहि लोके लज्जाकरः कापुरुषैरेव बहुमन्यते इति भावः ॥ ४० ॥

यद्गेहे इति । असौ रामः कुत्सिता ब्रह्माणः कुब्रह्माः । कुमहद्ब्रह्मेत्यन्यतरस्यामिति समासात्सटच् । तेषां यज्ञके कुत्सिते यज्ञे । कुत्सायां कन् । गेहे एव नर्दिनं विकत्थनपरम् । पात्रे समितादित्वात् समासः । भीरुं भयशीलं भवन्तं शरैः अभाययत् त्रासयामास इति यत् तत् पौरुषं पुरुषकारः न किन्तु कापुरुषत्वमेव इत्यर्थः । अभाययदित्यत्र प्रयोजककर्तुरन्यनिरपेक्षताभावात् न णिगमनेपदे । आभ्यां श्लोकाभ्यां "यमास्य-दग्रणी तस्य" इत्यस्य परिहारः कृतः ॥ ४१ ॥

चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके ॥४२॥
वनतापसके वीरौ विपक्षे गलितादरौ।
किं चित्रं यदि सावज्ञौ मत्तुः खरदूषणौ ॥४३॥
त्वञ्च भीरुः सुदुर्बुद्धे नित्यञ्च रणकाम्यसि।

चिरेति। चिरकालं व्याप्य उषितं स्थितं चिरकालोषितं जीर्णं कीटैः घुणैः निष्कुषितं अन्तःखादितं तथोक्तं धनुः शैवकोदण्डं रामेण कर्त्रा क्षत्रियकाणां जनकादि-कुत्सितक्षत्रियाणां अन्तिके समीपे भग्नं यदि तत्र किं चित्रं आश्चर्य्यम्। जीर्णधनुर्भङ्गः कापुरुषैरेव प्रशस्यते न खलु वीराणां श्लाघाकर इति भावः। एतेन "अथाङ् यज्ञभृतां रामः" इत्यायुक्तं परिहृतम् ॥ ४२ ॥

वनेति। वने यः कुत्सितः तापसः तपःशीलः स वनतापसकस्तस्मिन् विपक्षे गलितादरौ किमयं करिष्यतीति अवहेलया योषितवन्तौ वीरौ वीर्य्यवन्तौ अपि सावज्ञौ अकिञ्चित्करोऽयमिति बुद्ध्या अनवहितौ इत्यर्थः खरदूषणौ यदि मत्तुः नाथं गतौ, म्रियतेर्लुङ्लिङोश्चेति नियमात् लिटि आत्मनेपदं न भवति। तत् किं चित्रम्। नहि वीराणामपि प्रमादे स्खलनमसम्भाव्यमिति भावः। अस्मिन् श्लोके "संवित्तः सह-युध्वानौ" इत्यायुक्तं निरस्तम् ॥ ४३ ॥

त्वञ्चेति। हे सुदुर्बुद्धे नितान्तमदुर्बुद्धे त्वं च भीरुः भय-

गुणांश्चापह्नुषेऽस्माकं स्तौषि शत्रूंश्च नः सदा ॥४४॥
शौर्यच्छेद्यमतोऽहं त्वां करोमि क्षितिवर्द्धनम् ।
कारयिष्यामि वा कृत्यं विजिघृक्षुर्वनौकसौ ॥ ४५ ॥
तमुद्यतनिशातासिं प्रत्युवाच जिजीविषुः ।
मारीचोऽनुनयन् वासादभ्यमित्यो भवामि ते ॥४६॥

शीलः भवसि नित्यं रणकाम्यसि आत्मनो युद्धमिच्छसि । आत्मेच्छायां काम्यच् । भीरोर्युद्धेच्छा विडम्बना, यतः पराजयः नियत एव इति भावः । त्वं अस्माकं गुणान् शौर्यादीन् अपह्नुषे अपलपसि नः अस्माकं शत्रून् अरींश्च सदा अजस्रं स्तौषि बहुमन्यसे । गुणापवादात् तदन्यारोपणाच्च त्वमस्माकं महान् विपक्षः सम्वृत्तोऽसीति भावः ॥ ४४ ॥

शौर्येति । अतः अस्मात् तव अकारणद्वेषात् हेतोः शौर्यच्छेदं अर्हति शौर्यच्छेद्यः तं त्वां अहं क्षितिवर्द्धनं भूमिवृद्धिकरं करोमि गिरञ्छित्वा त्वां व्यापादयामीत्यर्थः । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट् । वा अथवा वनं श्रीकोष्टकं, ययोः तौ वनौकसौ रामलक्ष्मणौ विजिघृक्षुः विग्रहीतुं योधयितुं अभिभवितुं वा इच्छुः अहम् । विपूर्वात् ग्रहेः सन् सत उः, नलोकाव्ययेति षष्ठ्याः प्रतिषेधश्च । कृत्यं कार्यं मदभिप्रेतसीताहरणाकूतमित्यर्थः । कारयिष्यामि त्वामिति शेषः । कृञोरन्यतरस्यामिति अणिकर्तुः कर्मत्वम् ॥ ४५ ॥

तमिति । जिजीविषुः जीवितुमिच्छुः अतएव अनुनयन्

हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ।
उद्योगमभ्यमित्रीणो यथेष्टं त्वञ्च सन्तनु ॥ ४७ ॥
ततश्चित्रीयमाणोऽसौ हेमरत्नमयो मृगः।
यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन् ॥४८॥

कातरवचनैः प्रसादयन् मारीचः त्रासात् भयात् उद्यतनिशातासिं शीर्षच्छेदार्थं उत्थापिततीक्ष्णचन्द्रहासं तं रावणं प्रत्युवाच। किमिति ते तव अमित्रस्य अभिमुखं अभ्यमित्रम्। आभिमुख्ये अव्ययीभावः। अभ्यमित्रमलंगामीति अभ्यमित्रः भवामि त्वदमित्राभिमुखं गच्छामीत्यर्थः अभ्यमित्रशब्दात् इदं गच्छतीति अर्थे यप्रत्ययः। इति प्रत्युवाच इति पूर्वेण सम्बन्धः। निशातेत्यत्र शाच्छोरन्यतरस्यामिति इत्वाभावपक्षे रूपम् ॥ ४६ ॥

हरामीति। अहं मृगो भूत्वा माययेति शेषः। मृगैः दीव्यत इति मृगद्युवौ मृगयानिरतौ। दीव्यतेः क्विपि ऊट् ऊकारस्य उवादेशः। मृगद्युतौ इति पाठे द्युतमिसर्पति इति धातोः क्विपि रूपम्। रामसौमित्री रामलक्ष्मणौ हरामि केनचित् व्याजेन अन्यतो नयामीत्यर्थः। त्वञ्च अभ्यमित्रीणः विपक्षाभिमुखं गच्छन्नित्यर्थः यथेष्टं यथाकामं उद्योगं कार्यं सन्तनु विधेहि ॥ ४७ ॥

तत इति। ततो वचनानन्तरं हेमरत्नमयः सुवर्णेन रत्नैश्च निर्मितदेहः अतः चित्रीयमाणः आश्चर्यबुद्धिं जनयन्। चित्रशब्दात् क्यङ् मानश्च। असौ मारीचः सीतायाः मुखमनतिक्रम्य तिष्ठतीति यथामुखीनः पुरतः वर्त्तमानः इत्यर्थः। बहु

तेनादुदूषयत् रामं मृगेण मृगलोचना।
मैथिली विपुलोरस्कं प्रावुवूर्षुं मृगाजिनम् ॥४९॥
योगक्षेमकरं कृत्वा सीताया लक्ष्मणं ततः।
मृगस्यानुपदी रामो जगाम गजविक्रमः ॥ ५० ॥

लोभयन् बहुधा चक्षुःस्पृहां जनयन् सन् पुप्लुवे भ्रमति स्म। जयमङ्गलस्त्वाह "निर्मलत्वात् सीताया अयतः यथासुखीनः प्रतिबिम्बायय इव भूत्वा" इति। "सुखस्य सदृशं यथासुखं दर्पणादिस्थप्रतिबिम्बमुच्यते सादृश्येऽव्ययीभावः मृगस्य रत्नमयत्वेन स्वच्छतया यथासुखं दृश्यते अत्र" इति भरतेनोक्तम् ॥ ४८ ॥

तेनेति। मृगस्य लोचने इव लोचने यस्याः सा मृगलोचना। मध्यपदलोपी समासः। ह्यधिकस्वरात् स्वाङ्गात् न ङीप्। मैथिली मिथिलाधिपपुत्री मृगाजिनं मृगचर्म प्रावरितुं परिधातुमिच्छुः प्रावुवूर्षुः। प्रापूर्वात् वृणोतेः सन् तत उः। विपुलोरस्कं विशालवक्षसम्। उरःप्रभृतिभ्यः कप् इति बहुव्रीहौ कप्। रामं तेन मृगेण अदुदूषयत् क्रीडितुमिच्छामकारयत्। सन्नन्तात् दीव्यतेः णिचि कृते लुङि रूपम्। क्रीडाव्याजेन मृगमिमं धारय इति प्रार्थितवतीति भावः ॥ ४८ ॥

योगेति। ततो गजविक्रमः हस्तिविक्रमः हस्तितुल्यगमनो वा रामः लक्ष्मणं सीतायाः योगक्षेमे शरीरस्थितिपालने करोतीति योगक्षेमकरम्। कृञो हेतौ टः। अहणवतां तदस्तित्वेऽभावात् क्षेमप्रियभद्रेत्यादिना अणखौ न भवतः। कृत्वा मृगस्य अनुपदी अन्वेष्टा सन्। अनुपदमन्वेष्टेति निपातनात्

स्थायं स्थायं क्वचित् यान्तं क्रान्त्वाक्रान्त्वा स्थितं क्वचित्
वीक्षमाणो मृगं रामश्चित्रवृत्तिं विसिस्मिये ॥ ५१ ॥
चिरं क्लिश्त्वा मर्म्मावित् रामो विलुभितध्रुवम्।
शब्दायमानमध्यास्त भयदं क्षणदाचरम् ॥५२॥
श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनी।

साधु। जगाम चचाल अत्र "फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः" इति भरतेनोक्तम् ॥ ५० ॥

स्थायमिति। स्थायं स्थायं स्थित्वा स्थिता क्वचित् कुत्रचित् प्रदेशे यान्तं गच्छन्तं तथा क्रान्त्वा क्रान्त्वा उत्प्लुत्य उत्प्लुत्य क्वचित् स्थितं गतिनिवृत्तिप्राप्तं चित्रवृत्तिं आश्चर्य्यशरीरचेष्टं मृगं वीक्षमाणः पश्यन् रामः विसिस्मिये विस्मितः सम्वृत्तः। अत्र आभीक्ष्ण्ये क्राच् यमुसौ द्विर्वचनञ्च ॥ ५१ ॥

चिरमिति। मर्म्माणि जीवितस्थानानि विध्यति मर्म्मावित्। विध्यतेः क्विप् ततः सम्प्रसारणं नहिवृतिवृधीत्यादिना पूर्वपदस्य दीर्घत्वञ्च। रामः चिरं क्लिश्त्वा महान्तं कालमायस्य विलुभितध्रुवं शराघातात् व्याकुलितगमनम्। लुभ्य विमोहने इति धातोः क्तः विमोहनं व्याकुलीकरणम्। तथा शब्दायमानं क्रोशन्तम्। शब्दवैरेति क्रियार्थे क्यङ्। भयदं भयावहं क्षणदाचरं रात्रिचरं अध्यास्त विधवान्। विधातेर्लुङि रूपम् ॥ ५२ ॥

श्रुत्वेति। सीता विस्फूर्जथुप्रख्यं वज्रनिर्घोषतुल्यम्।

मत्वा कष्टश्रितं रामं सौमित्रिं गन्तुमैजिहत् ॥५३॥
एष प्रावृषिजाभोदनादी भ्राता विरौति ते ।
ज्ञातेयं कुरु सौमित्रे भयात् त्रायस्व राघवम् ॥५४॥
रामसंघुषितं नैतत् मृगस्यैव विवक्षिषोः ।
रामस्वनितसङ्काशः स्वान इत्यवदत् स ताम् ॥५५॥

स्फूर्जतेर्भावे अथुच् । निनादं निशाचरशब्दं श्रुत्वा रामं कष्टश्रितं सङ्कटापन्नं मत्वा परिदेवनशीला कृतस्य कर्मणः अनुचितत्वधिया अत्याहितं शङ्कमाना अनुशोचन्तीत्यर्थः । परिदीव्यतेर्घिनुण् । सौमित्रिं लक्ष्मणं गन्तुं ऐजिहत् ईहामकारयत् नोदयामासेत्यर्थः । ईहृङ् चेष्टायामिति धातोः णिजन्तात् लुङि रूपम् ॥ ५३ ॥

एष इति । प्रावृषि वर्षासु जायते प्रावृषिजः । सप्तम्या अलुक् । तादृशः यः अभ्रोदः मेघः तद्वत् नदति प्रावृषिजाभ्रोदनादी एष ते भ्राता विरौति आर्त्तनादं करोतीत्यर्थः । हे सौमित्रे ज्ञातेयं ज्ञातिकृत्यं कुरु राघवं भयात् त्रायस्व । भयात् त्राणं हि बन्धुकार्य्यम् तदनुतिष्ठेत्यर्थः । ज्ञातेयमित्यत्र "कपिज्ञात्योर्ढक्" इति ढक् ॥ ५४ ॥

रामेति । एतत् रामसंघुषितं रामस्य कण्ठध्वनिर्न । संघुषे र्भावे क्तः विकल्पेन इट् । किन्तु विवक्षिषोः वक्तुमिच्छोः मृगस्य एव संघुषितमिति शेषः । एष स्वानः ध्वनिः रामस्वनितसङ्काशः रामस्य नादानुकारी इति स लक्ष्मणः तां अवदत् ।

आप्यानस्कन्धकण्ठांसं रुषितं सहितुं रणे।
प्रोर्णुवन्तं दिशो वाणैः काकुत्स्थं भीरु कः क्षमः ॥५६॥
देहं विभ्रत्तुरस्तान्नौ मृगः प्राणैर्दिदेविषन्।
ज्याघुष्टकठिनाङ्गुष्ठं राममायात् सुमूर्षया ॥ ५७ ॥

स मृग एवास्माकं वञ्चनार्थं मायया रामसदृशरूपमकार्षीदित्यर्थः। विवच्छिमोरिति धातूनामनेकार्थत्वात् वञ्चगत्यामितिधातोरूपं, वञ्चकच् वञ्चने इत्यस्य वा रूपं अनित्यण्यन्तायुरादय इति नियमादत्र णिच् न भवति ॥ ५५ ॥

आप्यानेति। हे भीरु कातरस्वभावे स्कन्धः अंसस्य पश्चिमोभागः सच कण्ठश्च अंसः भुजशिरः सच एतेषां समाहारः स्कन्धकण्ठांसं आप्यानं स्थूलं स्कन्धकण्ठांसं यस्य स तथोक्तः। आङ्पूर्वात् हृदार्थकात् प्यायतेः कर्त्तरि क्तः। रुषितं कुपितं वाणैः दिशः प्रोर्णुवन्तं छादयन्तं काकुत्स्थं रामं रणे सहितुं प्रतिद्वन्द्वी भूत्वा योधयितुं को जनः क्षमः समर्थः न कोऽपीत्यर्थः। युद्धे अजय्यस्य त्रिभुवनैकवीरस्य रामस्य विपत् कदापि नाग्रहणीयेति भावः ॥ ५६ ॥

देहमिति। अस्तमग्निरिव तस्मिन् अस्ताग्नौ देहं विभ्रतुः भर्तुं दग्धुमिच्छुः। भृञ्जतेः सन् तत उः। प्राणैः दिदेविषन् क्रीडितुमिच्छन् सदृशैव क्रीडनवस्तुषु तुच्छत्वबुद्धिरतः 'प्राणानकिञ्चित्करान् गणयन्निति भावः। मृगः ज्यया धनुर्गुणेन घुष्टौ निघृष्टौ अत एव कठिनौ किणाङ्कितत्वात् दृढौ अङ्गुष्ठौ सव्यापसव्यकर्षणात् यस्य तं तथोक्तं रामं सुमूर्षया मर्तुमिच्छया

शत्रून् भीषयमाणं तं रामं विस्मापयेत कः ।
मास्म भैषीस्त्वयाद्यैव कृतार्थो द्रक्ष्यते पतिः ॥५८॥
यायास्त्वमिति कामो मे गन्तुमुत्सहसे न च ।
इच्छुः कामयितुं त्वं मामित्यसौ जगदे तया ॥५९॥

आयात् आजगाम । यदयमनिष्टकामनया धनुष्मतामग्रेसरं राममायातस्तदस्य मृत्युरासन्नएव इति भावः । दिदेविषन् इति दीव्यतेः सन्नन्तात् शतृः, दृढ़भावपक्षे तु दुद्यूषन्निति रूपम् ॥ ५७ ॥

शत्रूनिति । शत्रून् भीषयमाणं भीतान् कुर्वाणं तं रामं कः विस्मापयेत क्षुभितचित्तं कुर्यात् न कोऽपीत्यर्थः । सम्भावनायां लिङ् । भीस्रोः कर्तुरन्यनिरपेक्षत्वादात्मनेपदं पक्षे भीयोभीषादेशश्च । अतः मास्म भैषीः भयं न कुरु । मास्मयोगात् लुङ् । त्वया अद्यैव कृतार्थः पूर्णमनोरथः पतिः द्रक्ष्यते दृष्टोभविष्यति, दृशेः कर्मणि लट् ॥ ५८ ॥

यायाइति । त्वं यायाः रामान्वेषणाय याहीति मे कामः अभिलाषः । कामप्रवेदने लिङ् । किन्तु त्वं गन्तुं न उत्सहसे न शक्नोषि च । अतः त्वं मां कामयितुं रन्तुं इच्छतीति इच्छुः । विन्दुरिच्छुरिति निपातनात् साधु । इति असौ लक्ष्मणः तया सीतया जगदे उक्तः । गन्तुमनुत्साहेनैव ते दुष्टाभिसन्धिरावेदितो भवति इति भावः । कामयतेरिच्छार्थकत्वात् कामयितुमिच्छुरित्यस्य न काचिदर्थप्रतिपत्तिर्भवेदतो लक्षणया कर्मधातुत्व इच्छाकार्यभूते रमणे वर्त्तते ॥ ५९ ॥

मृषोद्यं प्रवदन्तीं तां सत्यवद्यो रघूत्तमः।
निरगात् शत्रुहस्तं त्वं यास्यसीति शपन् वशी ॥६०॥
गते तस्मिन् जलशुचिः शुद्धदन्तः रावणः शिखी।
जंजपूकोऽक्षमालावान् धारयो मृदलावुनः ॥६१॥

मृषोद्यमिति। सत्यं वदतीति सत्यवद्यः अवितथवादी। कर्त्तरि यत्। वशः इन्द्रियसंयमनमस्यास्तीति वशी जितेन्द्रियः। रघोरपत्यानि रघवः। राजवाचकादुत्पत्तेस्य प्रत्ययस्य विकल्पेन लोपः। तेषु उत्तमः श्रेष्ठः स लक्ष्मणः मृषोद्यं असत्यवाक्यम्। मृषोपपदाद्दृदेर्नित्यं भावे क्यप्, यजादित्वात् सम्प्रसारणम्। प्रवदन्तीं ताम्। त्वं शत्रुहस्तं यास्यसि अद्यैव शत्रुहस्तगता भविष्यसीति शपन् अभिसम्पातं कुर्वन् सन् निरगात्, निःपूर्वादिण्गतावितिधातोर्लुङ्। उटजात् निष्क्रान्तः ॥ ६० ॥

चतुर्भिः कलापकमाह गते इति। तस्मिन् लक्ष्मणे गते सति रावणः तां सत्ये इति वक्ष्यमाणेन सम्बन्धः। स कीदृशः। जलशुचिः स्नातः शुद्धा दन्ता यस्य स शुद्धदन्तः। दन्तस्य दचादेशः। शिखी शिखायुक्तः परिव्राजकत्वादिति भावः। पापाश्रयत्वात् गर्हितं जपति जंजपूकः। जपतेर्गर्हायां यङ्, तत ऊकि तस्य लुक्। अक्षमालावान् जपमालिकान्वितः। अलावुनुम्बौ, तस्याः फलं अलावु मृण्मयं अलावु मृदलावु तस्य धारयतीति धारयः। कर्त्तरि यः छन्दोगे कर्म्मणि षष्ठी। सीतामुद्दे इत्युत्तरश्लोकेन सम्बन्धः ॥ ६१ ॥

कमण्डलुकपालेन शिरसा च मृजावता ।
संवस्त्रा लाचिके वस्त्रे मात्राः संभाण्डा दण्डवान् ॥ ६२
अधीयन्नात्मविद्विद्यां धारयन् मस्करिव्रतम् ।
वदन् वङ्गुलिस्फोटं भ्रूक्षेपञ्च विलोकयन् ॥ ६३ ॥

कमण्डल्विति । कमण्डलुः जलपात्रम् कपालो भिक्षापात्रम् द्वयोः समाहारः कमण्डलुकपालं तेन तथाभूतेन, मृजावता मार्ज्जनायुक्तेन निर्म्मलेन शिरसा च उपलक्षितः । इत्थम्भूतलक्षणे टतीया । लाचिके लाचारजे वस्त्रे : अधोवस्त्रोत्तरीयके संवस्त्र परिधाय । वस्त्रात् समाच्छादने णिच् । तथा मात्राः परिच्छदान् कमण्डलुप्रभृतीन् संभाण्ड्य समाचित्य युगपद्वहनार्थं राशीकृत्येत्यर्थः । "भाण्डात् समाचयने" इति णिच् । संवस्त्र संभाण्ड्य इत्यादौ "विशेषकर्मसम्बन्धात् प्रकृतेस्तु गतार्थता" इति नियमादेवमर्थप्रतिपत्तिः । दण्डवान् गृहीतत्रिदण्डः । "मात्रा कर्णविभूषणे । अचरावयवे हस्ते मानेऽल्पे च परिच्छदे" इति विश्वः ॥ ६२ ॥

अधीयन्निति । आत्मविदां परमात्मतत्त्वज्ञानां योगिनां विद्यां उपनिषदं अधीयन् यत्नेन पठन् । इङ्धार्य्योरिति इङधातोरकच्प्रत्यये कर्त्तरि यद्प्रत्ययः । मस्करी कर्म्माणि निषेद्, 'शीलमेषां मस्करिणां परिव्राजकानां व्रतं धारयन् । मस्करमस्करिणावितिं परिव्राजके सूट् । मस्करिणोहि "मा कुरुत कर्म्माणि माशिवः श्रेयसी" इत्येवमुपदेशयन्तीत्यर्थः । अन्तरा वङ्गमभूतं वदन् अङ्गुलिस्फोटं पुनः स्फोटिकां दत्वा भ्रूक्षेपं

सन्दिदर्शयिषुः साम निगुङ्गूषुः चपाटताम्।
चंक्रमावान् समागत्य सीतामूचे सुखाभव ॥६४॥
सायन्तनीं तिथिप्रथ्नः पङ्कजानां दिवातनीम्।
कान्तिं कान्त्या सदातन्या क्षेपयन्ती शुचिस्मिता॥६५॥

विलोकयन् भ्रुवौ उत्क्षिप्य उत्क्षिप्य विलोकयन्। उभयत्रापि पीड्यमानात् स्वाङ्गात् यमुल्। भरतस्त्वाह भ्रुकुलिस्फोटं भ्रुकुटिं स्फोटयित्वा बहुवदन् मितभाषितया बहु हस्तसंज्ञयैव वदतीति भावः। भ्रूक्षेपं भ्रुवमुत्क्षिप्य विलोकयन् ऋजुतया कटाक्षाद्यभाव इति ॥ ६२ ॥

सन्दिदर्शयिषुरिति। इह भयं माभूदिति साम सान्त्वं सन्दिदर्शयिषुः सम्यक् दर्शयितुमिच्छुः। चपाटतां राक्षसत्वं निगुङ्गूषुः निह्नोतुं गोपितुं इच्छुः। निपूर्वात् हुधातोः सन् तत उप्रत्ययः। कुटिलं क्रमणं गमनं चङ्क्रमा। क्रमेर्नित्यं कौटिल्ये गताविति यङ्। सास्यास्तीति चङ्क्रमावान् अमेध्यादिस्थल-परिजिहीर्षयेति भावः। स रावणः समागत्य समीपमागत्य सीतामूचे। किमिति। सुखाभव यदहं याचे तव अनुकूला भव। सुखप्रियादानुलोम्ये इति खम्बस्तियोगे डाच् ॥ ६४ ॥

सायन्तनीमिति। पञ्चदशकलानां हानिवृद्धाभ्यां तिथीः पञ्चदशसंख्काः प्रथयति प्रवर्त्तयतीति तिथिप्रथ्नीः तस्याः पङ्कजस्य। कर्त्तरि क्विप्। सायन्तनीं दिनावसानभवां कान्तिं तथा पङ्कजानां दिवातनीं दिवसमात्रस्थायिनीं कान्तिं सदातन्या रात्रिन्दिवं स्थायिन्या कान्त्या निजया त्वदीयया श्रिया क्षेपयन्ती क्षपयन्ती

का त्वमेकाकिनी भीरु निरन्वयजने वने।
क्षुध्यन्तोऽप्यघसन् व्यालास्त्वामपालां कथं न वा॥६६॥
हृदयङ्गममूर्त्तिस्त्वं सुभगभावुकं वनम्।
कुर्व्वाणा भीममप्येतद्दद्भ्यैः केन हेतुना॥ ६७॥

तिरस्कुर्व्वन्ती तथा शुचिस्मिता विशदनिर्म्मलहासा "का त्वम्" इति वक्ष्यमाणेन सम्बन्धः॥ ६५॥

का त्वमिति। हे भीरु भयप्रकृतित्वात् स्त्रीणामिदं सम्बोधनम्। निरन्वया निरनुगमा जना यस्मिन् तस्मिन् निरन्वयजने निःसम्बन्धजने जनशून्ये इत्यर्थः। वने एकाकिनी असहाया। एकादाकिनिच्चासहाये इत्याकिनिच्। एवम्भूता त्वं का देवी मानुषी राक्षसी वा। कथं वा क्षुध्यन्तः क्षुधार्त्ता अपि व्यालाः हिंस्रा व्याघ्रादयः। "व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः। पालयतीति पालः। पचाद्यच्। नास्ति पालो यस्याः तां अपालां अशरणां त्वां न अघसन् अभक्षितवन्तः। अदेर्घुञि घसादेशः ततोऽङ्॥ ६६॥

हृदयमिति। हृदयं गच्छतीति हृदयङ्गमा लावण्यातिशयात् मनोहारिणी मूर्त्तिर्यस्याः सा तथोक्ता। कर्त्तरि खच्। अतएव भीममपि श्वापदादिभिः सङ्कुलत्वात् भयावहमपि एतत् वनं असुभगं सुभगं रम्यं भवति सुभगभावुकं तत्। अमूतद्भावे कर्त्तरि खुकञ्। कुर्व्वाणा त्वं केन हेतुना अभ्यैः इदं वनमभिगतासि। अभिपूर्व्वादिणो लटि मध्यमपुरुषैकवचनम्॥ ६७॥

सुकृतं प्रियकारी त्वं कं रहस्युपतिष्ठसे।
पुष्पक्षत्चाटुकारस्ते किङ्करः सुरतेषु कः॥ ६८॥
परिपर्य्युदधेरूर्वमाद्युलोकाच्च दुर्लभम्।
भावत्कं दृष्टवत्स्वेतदस्माकमधि सुजीवितम्॥ ६९॥

सुकृतमिति। त्वं प्रियं करोति या सा प्रियकारी अनुकूलवर्त्तिनी सती। कर्म्मवाचकादण् तत ईप्। शोभनं कृतवान् सुकृत् पुण्यवान् तम्। अतीते कर्त्तरि क्विप्। कं जनं रहसि एकान्ते उपतिष्ठसे सङ्गच्छसि। मैवाध्वमङ्गाराध इति सङ्के आत्मनेपदम्। तथा पुण्यकृत् पुण्यवान् को जनः सुरतेषु शोभनरतेषु ते चाटुकारः प्रियवाक्यकारी किङ्करः भृत्योभवतीति शेषः॥ ६८॥

परीति। उदधेः परि परि उदधिं वर्जयित्वा चतुरुदधिमेखलायां भुवि इत्यर्थः। समुद्रे लक्ष्म्या उत्पत्तिः तत्रैव तत्सम्भवेः नान्यत्रेति भावः। अपपरियहिरञ्चवः पञ्चम्या इति विभाषया समासविधानात् अव्ययीभावसंज्ञे "परेर्वर्ज्जने" इति द्विर्वचनम्। द्यौर्लोकः द्युलोकः द्युलोकात् आ स्वर्गलोकपर्य्यन्तं दुर्लभं पृथिव्यां स्वर्गे च दुष्प्रापमित्यर्थः। एतत् भवत्वा इदं भावत्कम्। कृण्प्रत्यये युवदावः। रूपं लावण्यं दृष्टवत्सु अस्मासु अधि अधिकं सुजीवितं शोभनं जीवनम्। विषये सप्तमी। यद्वा अस्मासु अधि अस्मत्स्वामिकं सुजीवितम्। त्वां दृष्टवतामस्माकं जीवनं धन्यं, त्वामपश्यतान्तु तन्नास्तीति भावः। अस्मासु अधि इत्यत्र स्वाम्यर्थवाचिनाधिना योगे सप्तमी॥ ६९॥

प्रपीतमधुका भृङ्गैः सुदिवेवारविन्दिनी।
सत्यरिमललक्ष्मीका नापुंस्कासीति मे मतिः॥७०॥
मिथैव श्रीः श्रियमन्या श्रीमन्मन्यो मृषा हरिः।
साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियं श्रियः॥७१॥

प्रपीतेति। भृङ्गैः भ्रमरैः प्रपीतं मधु यस्याः सा तथोक्ता। श्रेषादिभ्यपेति कप्। शोभनं नीहाराद्यभावात् निर्मलं दिवा यस्याः सा सुदिवा दिवाशब्दोऽयमव्ययः। सुप्रातेत्यादिना अच्। अरविन्दिनी पद्मिनी इव, सती विद्यमाना परिमललक्ष्मीः सुगन्धानुलेपनसम्पत्तिः यस्याः सा तथोक्ता त्वं अपुंस्का भर्तृहीना न असि न भवसि इति मे मतिः निश्चयः। विगतभर्तृकायां गन्धानुलेपनं निषिद्धमतः परिमलसम्पर्कात् तव सधवात्वं तथा अनुमीयते यथा सुदिवसे पीतमकरन्दाया नलिन्या भृङ्गसङ्गतिरिति भावः। यद्वा सत्यौ परिमललक्ष्मौ गन्धानुलेपनवेष-भूषाजनितशोभे यस्याः सा तथोक्ता। "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव कथ्यते" इति। "विमर्दोत्थे परिमलो गन्धे जन-मनोहरे" इत्यमरवचनेऽपि लक्षणया तस्य गन्धमात्रवाचित्वमि-त्यनुसन्धेयम्। अपीतमधुकेति क्वचित् पाठः॥ ७०॥

मिथेति। श्रियः लक्ष्म्याः श्रियं रूपसम्पदं हरन्तीं अभि-भवन्तीं त्वां साक्षात्कृत्य प्रत्यक्षीकृत्य। विभाषा कृञीत्यनुव-र्तमाने "साक्षात्प्रभृतीनि च" इति गतिसंज्ञा, गतिसमासे ल्यपा-देशः। अहं अभिमन्ये तर्कयामि। किमिति। श्रीः विष्णुप्रिया देवी मिथैव अलीकं श्रियं शोभाधिष्ठात्रीं मन्यते इति

नोदकण्ठिष्यतात्यर्थं त्वामैक्षिष्यत चेत् स्मरः।
खेलायन्ननिशं नापि सजूः कृत्य रतिं वसेत् ॥७२॥
वल्गूयन्तीं विलोक्य त्वां स्त्री न मन्तूयतीह का।
कान्तिं नाभिमनायेत को वा स्थाणुसमोऽपि ते ॥७३॥

त्रियम्मन्या, तथा हरिः नृपा आत्मानं श्रीमन्तं श्रीपतिं मन्यते इति श्रीमन्मन्यः। आत्मम्भरौ खच्। त्वमेव हि कान्त्यधिदेवता, यस्य त्वं स एव श्रीमानित्यहं मन्ये इति भावः ॥ ७१ ॥

नेति। स्मरः रतिपतिः त्वां ऐक्षिष्यत दृष्टवानभविष्यत् चेत् तदा अत्यर्थं अधिकं न उदकण्ठिष्यत रतिं प्रति भृशमुत्कण्ठितो नाभविष्यत्। क्रियातिपत्तौ लृङ्। नापि रतिं स्वभार्यां सजूःकृत्य सहायीकृत्य। ऊर्यादिषु सजुः सहार्थे इति वचनात् गतिसंज्ञा। अनिशं निरन्तरं खेलायन् क्रीड़न्। कण्ड्वादित्वात् यक्। वसेत् अवतिष्ठेत अपितु तां परित्यजेत् यदि त्वां पश्येदित्यर्थः। अत्र क्रियातिपत्तिर्न विवक्षिता किन्तु हेतुहेतुमद्भावः इति भूते भव्ये वा लिङ ॥ ७२ ॥

वल्गूयन्तीमिति। इह जगति का स्त्री वल्गूयन्तीं शोभमानां त्वां विलोक्य न मन्तूयति कुप्यति स्वपतिवैराग्यगङ्गया ईर्षावगाहेति भावः। वल्गुमन्तुगन्दाभ्यां कण्ड्वादित्वात् यक्। को वा जनः स्थाणुसमोऽपि काष्ठतुल्योऽपि गुणदोषानभिज्ञत्वात्। यद्वा स्थाणुसमोऽपि महादेववच्छितेन्द्रियोऽपि काष्ठवत्कठोरसोऽपि वा आत्मानंन्यः। ते कान्तिं विलोक्य न अभिमनायेत पूर्वमदर्शनात् अनभिमनाः सन् अभिमनाः सचेता भवेत्।

दुःखायते जनः सर्व्वः स एवैकः सुखायते ।
यस्योत्सुकायमाना त्वं न प्रतीपायसेऽन्तिके ॥७४॥
कः पण्डितायमानस्त्वामादायामिषसन्निभाम् ।
वस्यन् वैरायमाणेभ्यः शून्यमन्ववसद्वनम् ॥७५॥

अपितु सर्व्व एव प्रीतमना भवेदित्यर्थः । असम्भावने लिङ् भृशादित्वात् क्यङ् सलोपश्च ॥ ७३ ॥

दुःखेति । यस्य अन्तिके निकटे त्वं उत्सुकायमाना उत्कण्ठायमाना सती प्रेमोद्वेलहृदयत्वात् इति शेषः, न प्रतीपायसे, प्रतिकूलवर्त्तिनी न भवसि । भृशादित्वात् उत्सुकप्रतीपशब्दाभ्यां क्यङ् । स एवैकः जनः सुखायते सुखमनुभवति केवलं स एव जगति सुखीत्यर्थः । तद्भिन्नः सर्व्वः जनः दुःखायते दुःखमनुभवति । सुखादिभ्यः कर्त्तृवेदनायामिति क्यङ् ॥७४॥

क इति । अपण्डितः कथमपि पण्डितो भवन् पण्डितायमानः कः जनः । भृशादित्वात् क्यङ् । वैरायमाणेभ्यः वैरं कुर्व्वद्भ्यः शत्रुभ्यः, भीत्रार्थानां भयहेतुरिति सूत्रात् पञ्चमी, वस्यन् विभ्यत् कदाचिदस्मद्भयेत् प्रियां मे धर्षयेरन्निति शङ्कमानः इत्यर्थः । शब्दवैरेत्यादिना क्यङ् । आमिषसन्निभां लोभनीयद्रव्यतुल्यां सर्व्वजनप्रार्थनीयत्वादिति भावः । त्वां आदाय शून्यं विजनं वनं अन्ववसत् अनुवसति स्म । उपान्वध्याङ् वस इति कर्म्मसंज्ञा । "आमिषं पललं लोभ्ये सम्भोगोत्कारयोरपि । आमिषं सुन्दराकारे रूपादिविषयेऽपि च" इति विश्वः ॥ ७५ ॥

ओजायमाना तस्यार्घं प्रणीय जनकात्मजा।
उवाच दशमूर्द्धानं सादरा गद्गदं वचः ॥ ७६ ॥
महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम् ॥७७॥

ओजेति। ओजः इव आचरन्ती ओजायमाना किञ्चिल्लज्जा-परित्यागात् तेजस्विनीव भवन्तीत्यर्थः, ओजःशब्दात् धर्म्मिप्रधानात् कर्त्तुः क्यङ् सलोपश्च। भृशादित्वादभूततद्भावे वा क्यङ्। जनकात्मजा सादरा अतिथिरयमिति सबहुमाना सती तस्य कपटपरिव्राजकस्य अर्घः पूजाविधिः प्रयोजनमस्य अर्घ्यं पूजार्थोदकम्। "मूल्ये पूजाविधावर्घः" इत्यमरः। प्रणीय दत्वा। सम्प्रदानस्य सम्बन्धविवक्षायां षष्ठी। दशमूर्द्धानं रावणं गद्गदं लज्जया अन्तर्भिया वा सम्यक् नाभिव्यक्तं वचः उवाच। "अतिथि र्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते। स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति" इति शास्त्रादतिथिसत्कारस्य अवश्यकर्त्तव्यतया कथञ्चिदर्घदानसाहसं कृतं आगन्तुना सह वाक्योवाक्यकरणे तु तस्याः कुलवधूचितो लज्जोपरोधः सर्व्वथा परिहरणीयो नाभूदेवेति सलज्जमुवाचेति भावः। गद्गदमनभिव्यक्तमसंस्कृतत्वादिति जयमङ्गलेनोक्तम् ॥ ७६ ॥

यदुक्तं "कं रहस्युपतिष्ठसे" इति तस्य प्रतिवचनमाह महेति। इक्ष्वाकूणामयं ऐक्ष्वाकः तस्मिन् वंशे जात इति शेषः। महाकुलीनः महावंशोत्पन्नः सूर्य्यवंशोत्पन्नः पितुः दशरथस्य प्रियङ्करः अनुकूलकारी। क्षेमप्रियमद्रेति खच्। तपस्विनां

निहन्ता वैरकाराणां सतां वहुकरः सदा ।
पारश्वधिकरामस्य शक्तेरन्तकरो रणे ॥ ७८ ॥
अध्वरेष्विष्टिनां पाता पूर्त्तौ कर्म्मसु सर्व्वदा ।
पितुर्नियोगाद्राजत्वं हित्वा योऽभ्यागमद्वनम् ॥७९॥

क्षेमं करोतीति क्षेमकारः शुभङ्करः । खच्विकल्पपक्षे कर्म्मण्ण्। दाशरथिः रामः मम भर्त्ता स्वामी । नाहमत्रैकाकिनी तिष्ठामीति भावः ॥ ७७ ॥

निहन्तेति । वैरं कुर्व्वन्ति ये ते वैरकाराः शत्रवः । वैरपूर्वात् क्षञ्ञः अण्, तेषां निहन्ता । कर्म्मणि षष्ठी । सतां साधूनां धर्म्मे स्थितानामिति यावत् सदा वहुकरः वहुकार्य्यसाधकः । परान् श्यति खण्डयतीति परशुः परश्वधर्य इति निपातनात् साधु । परश्वधः प्रहरणमस्य पारश्वधिकः सचासौ रामश्चेति तस्य परशुरामस्य शक्तेः रणे युद्धे अन्तकरः संहर्त्ता स मे भर्त्ता इति पूर्व्वेण परामर्शः ॥ ७८ ॥

अध्वरेष्विति । इष्टमेभिरिति इष्टिनः यज्वानः । इष्टादिभ्य इनीति इनिः । अध्वरेषु यज्ञेषु इष्टिनां पाता रक्षिता । क्षत्रेन् विषयस्येति कर्म्मणि समासः । सर्वदा कर्म्मसु श्राद्धादिक्रियाकलापेषु पूर्त्तमनेनेति पूर्त्तौ पितॄणां तृप्तिप्रद इत्यर्थः । पॄणातेः भावे क्तः तत इन् । यः पितुर्दशरथस्य नियोगात् शासनात् नृपयोग्यत्वात् राजत्वं हित्वा त्यक्त्वा वनं समभ्यागमत् आगतवान् स मे भर्त्तेति योज्यम् ॥ ७९ ॥

पतत्रिक्रोष्टुजुष्टानि रक्षांसि भयदे वने।
यस्य वाणनिकृत्तानि श्येनीभूतानि शेरते ॥ ८० ॥
दीव्यमानं शितान् वाणानस्यमानं महागदाः।
निघ्नानं शात्रवान् रामं कथं त्वं नावगच्छसि ॥८१॥
(उद्गत्।)
भ्रातरि न्यस्य यातो मां मृगावित् मृगयामसौ।
एषितुं प्रेषितो यातो मया तस्यानुजो वनम् ॥८२॥

पतत्रीति। यस्य वाणनिकृत्तानि शरच्छिन्नानि अश्येनयः श्येनयः भूतानि श्येनीभूतानि। अभूततद्भावे च्विः। रक्षांसि भयदे भयङ्करे वने पतत्रिक्रोष्टुजुष्टानि पक्षिशृगालैः परिवृतानि सन्ति शेरते भूमौ पतित्वा दीर्घनिद्रामनुभवन्ति। शीङो लट्। प्रथमपुरुषबहुवचनम्। स मे भर्त्तेति पूर्वेण सम्बन्धः ॥ ८० ॥

दीव्येति। शितान् वाणान् दीव्यमानं तीक्ष्णैः शरैः क्रीड़ाशीलं विजिगीषाशीलं वा। दिवु जिगीषेच्छाव्यवहारद्युतौ क्रीड़ागत्योः, तद्योगात् करणे द्वितीया। महागदाः अस्यमानं महतीनां गदानां क्षेपणशीलं, शात्रवान् शत्रून्, स्वार्थे णः, निघ्नानं शत्रूणां मारणशीलम्। सर्वत्र शक्तिप्रयुक्ताच्छीलार्थे शतुः शान इति शानः। एवम्भूतं रामं त्वं कथं न अवगच्छसि न जानासि सर्वलोकप्रसिद्धकर्मैकत्वात् तमजानतस्तावेव महदनभिज्ञत्वं स्फुरतीतिभावः ॥८१

यद्यपीवं ज्ञातवत्यत्राह भ्रातरीति। मृगान् विध्यतीति मृगावित् मृगी मे भर्त्ता मां भ्रातरि अनुजे न्यस्य समर्प्य मृगयां यातः पशुवधार्थं प्रस्थितः। तस्य अनुजः कनिष्ठोऽपि मया

अथायस्यन् कषायाक्षः स्यन्नस्वेदकणोल्बणः ।
सन्दर्शितान्तराकूतस्तामवादीद्दशाननः ॥ ८३ ॥
कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम् ।
को नग्नमुषितप्रख्यं बहु मन्येत राघवम् ॥ ८४ ॥

प्रेषितः प्रेरितः सन् एषितुं तमेव ज्ञातुम् । सर्वे गत्यर्थाः प्राप्त्यर्था ज्ञानार्थाश्चेति वचनात् इषुगतौ इत्यस्य ज्ञानार्थत्वम् । प्रेषित इति च तस्यैव रूपम् । वनं यातः अग्रजान्वेषणाय सोऽपि वनमगमदित्यर्थः ॥ ८२ ॥

अथेति । अथ सीतावाक्यानन्तरं आयस्यन् क्रोधवशात् शरीरं खेदयन् कम्पयुक्त इत्यर्थः । कषाये कोपरक्ते अक्षिणी यस्य स तथोक्तः । बहुव्रीहौ सक्ष्यक्ष्णोरिति पच् । स्यन्नैः स्रुतैः स्वेदकणैः स्वेदबिन्दुभिः उल्बणः उद्भटः व्याप्त इत्यर्थः । स्यन्देस्त्र स्यन्देः क्तः । सन्दर्शितं प्रकटितं आन्तरमन्तर्गतं आकूतमभिप्रायो येन स सन्दर्शितान्तराकूतः कम्पस्वेदारुणत्वादिभिः बाह्यैर्लिङ्गैः क्रोधेर्ष्यादिकमान्तरं भावमाविष्कुर्वन्नित्यर्थः, यद्वा प्रकटीकृतनिजगर्हिताभिप्राय इति तात्पर्यम् । दशाननः रावणः तां सीतां अवादीत् वक्ष्यमाणमुवाच ॥ ८३ ॥

कृते इति । कनिष्ठाया अपत्यं कानिष्ठिनेयस्तस्य भरतस्य कृते निमित्ते ज्यैष्ठिनेयं ज्येष्ठापुत्रमपि विवासितं अयोग्यत्वात् राज्यात् बहिष्कृतमित्यर्थः अत एव नग्नमुषितप्रख्यं, यथा कश्चित् प्रथमं मुषितः हृतसर्वस्वः पश्चात् नग्नः दिगम्बरीकृतः भवति तद्वदृतम् । पूर्वकालेति समासः राजदन्तादित्वात्

राक्षसान् वटुयज्ञेषु पिण्डीशूरान्निरस्तवान्।
यद्यसौ कूपमाण्डूकि तवैतावति कः स्मयः ॥८५॥
मत्पराक्रमसंक्षिप्तराज्यभोगपरिच्छदः।
युक्तं ममैव किं वक्तुं दरिद्राति यया हरिः ॥८६॥

परनिपातः। नग्नेति नञतेः क्तप्रत्ययान्तं साधु। लग्नमुपितप्रस्थमिति पाठे लग्नः लज्जितः लस्जधातोः क्तः। राघवं रामं कोऽन्यः वद्रु मन्येत श्लाघेत न कोऽपीत्यर्थः। कानिष्ठिनेयज्यैष्ठिनेयग्रन्थौ कृतस्य णेयप्रत्ययस्य इनेयादेशात् साधू ॥ ८४ ॥

अथ रैक्षिटिनामित्यस्योत्तरमाह राक्षसानिति। असौ रामः वटुयज्ञेषु कुमाराह्मणयज्ञेषु पिण्डयां भोजने एव शूरान् पिण्डीशूरान् औदरिकानित्यर्थः पावेमेमितादयवेति चेपे समासः। राक्षसान् मारीचादीन् निरस्तवान् तिरस्कृतवान् यदि। यदिशब्दोऽवधारणे। मण्डूकस्य अपत्यं स्त्री माण्डूकी कूपे माण्डूकी इव कूपमाण्डूकी तत्सम्बुद्धिः। पूर्ववत् समासः। हे कूपमाण्डूकि। एतेनाल्पदृग्बलाद्न्ये वीरास्त्वया न दृष्टा इति ते स्मय इति सूचितम्। एतावति स्वल्पे वस्तुनि तव कः स्मयः गर्वः विस्मयो वा स नैव युज्यते इत्यर्थः ॥ ८५ ॥

मदिति। मम पराक्रमेण संक्षिप्तः उपहृतः राज्यभोगपरिच्छदः हस्त्यश्वरथपदातिरूपः यस्य स तथोक्तः हरिरिन्द्रः यया दरिद्राति दुर्गतो भवति तत् वक्तुं किं ममैव युक्तं उचितं नैवेत्यर्थः। आत्मगुणानुवादस्य लज्जाकरत्वादिति भावः ॥ ८६ ॥

निर्लङ्घो विमदः स्वामी धनानां हृतपुष्पकः ।
अध्यास्तेऽन्तर्गिरं यस्मात् कस्तन्नावैति कारणम् ॥८७॥
भिन्ननौक इव ध्यायन् मत्तो विभ्यदमः स्वयम् ।
क्षणिमानं दधानेन मुखेनास्ते निरुद्यतिः ॥८८॥

निर्लङ्घ इति । यस्मात् कारणात् निर्लङ्घो लङ्घातो निष्क्रान्तः । "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति समासः । हृतं पुष्पकं तन्नामकविमानं यस्य स तथोक्तः । अतः विमदः विगतमदः गर्वहीनः धनानां स्वामी कुबेरः गिरेः कैलासस्य अन्तः मध्ये अन्तर्गिरं अव्ययीभावे समासान्तष्टच् । अध्यास्ते अधिवसति । को जनः तत्कारणं कुबेरस्येदृगदुर्गतिहेतुभूतं मत्पराक्रमं मां वेति भावः । न अवैति जानाति सर्व एव जानातीत्यर्थः । अल्पदृश्यत्वात् खमेव तदनभिज्ञा प्रतिभासि इति भावः ॥ ८७ ॥

भिन्नेति । स्वयं साक्षात् मत्तः विभ्यत् बिभ्यन् । अभ्यस्तत्वात् न नुनागमः । अतएव क्षणिमानं दधानेन मलिनीभावात् कालिमानं धारयता मुखेन । इत्थंभूतलक्षणे तृतीया, उपलक्षितः यमः धर्मराजः भिन्ना भग्ना नौर्यस्य स भिन्ननौकः पोतवणिक् इव ध्यायन् अहमनेन हृतसर्वस्वः किं ममापतितमिति चिन्तयन् सन् नास्ति उद्यतिः उद्यमो यस्य स निरुद्यतिः उद्योगहीनः सन् आस्ते तिष्ठति । स्वयमित्यस्य चिन्तयन्नित्यनेनाम्बयः स्वयमेवात्मनो वैधुर्यं जानाति नत्वन्येन बोधित इति भरतेन व्याख्यातम् । स्वयं यमःप्राणिनामन्तकोऽपीति वार्थः ॥८८॥

समुद्रोपत्यका हैमी पर्व्वताधित्यका पुरी।
रत्नपारायणं नाम्ना लङ्केति मम मैथिलि ॥८९॥
आवासे सिक्तसंमृष्टे गन्धैस्त्वं क्लिन्नवासिता।
अर्पितोरुसुगन्धिस्रक् तस्यां वस मया सह ॥९०॥

एवं स्वपौरुषमुक्त्वा सीताप्रलोभनार्थमात्मपरिचयं दातुमाह समुद्रेति। हे मैथिलि मिथिलाधिपपुत्रि समुद्रस्य उपत्यका आसन्ना समुद्रोपत्यका। उपत्यकायद्यस्यां रासन्नभूमिवाचकत्वेऽपि लक्षणयात्र केवलासन्नपरत्वं बोध्यम्। पर्व्वतस्य त्रिकूटनामकस्य गिरेः अधित्यका उपरिस्थिता पर्व्वताधित्यका। "उपत्यकाद्यासन्ना भूमिरूर्द्धमधित्यका" इति अमरः। परं परमं श्रेष्ठं अयनं स्थानं परायणं तदेव पारायणम्। स्वार्थे अण्। रत्नानां मुक्तादीनां पारायणं प्रकटस्थानम्। यद्वा रत्नानां पारमवसानं अयन्ते बुध्यन्ते तत्परीक्षका अत्र इति रत्नपारायणं सर्वरत्नस्थानमित्यर्थः। यदाह हलायुधः, "साकल्यवचनं प्राप्तैः पारायणमुदाहृतम्" इति। लङ्का इति नाम्ना ख्याता हैमी सुवर्णमयी मम पुरी राजधानी अस्तीति शेषः। दुर्गावस्थिता अनभिभवनीयता रत्नोपचयात् समृद्धता च सूच्यते। उपत्यकाधित्यकायद्यौ उपाधिभ्यां त्यकन्प्रत्ययेन निष्पन्नौ ॥ ८९ ॥

आवास इति। तस्यां पुर्य्यां आदौ सिक्ते रजोनिरासार्थं जलेनोक्षिते पश्चात् संमृष्टे परिष्कृते सिक्तसंमृष्टे, आवसत्यस्मिन् इति आवासे निलये। अधिकरणे घञ्। गन्धयन्तीति गन्धाः चन्दनादयः तैः आदौ लिप्ता चर्चिता पश्चात् वासिता धूपोदिता

सङ्गच्छ पौंसि स्त्रैणं मां युवानं तरुणी शुभे ।
राघवः प्रोष्यपापीयान् जहीहि तमकिञ्चनम् ॥९१॥
अघ्रीतपिवतीयन्ती प्रसिता स्मरकर्मणि ।

धूपादिनेति शेषः । लिप्तवासिता । "वासिता करिणी नार्योर्वासितं सुरभीकृते । ज्ञातभावे खगारावे वासितं वस्त्रवेष्टिते" इति विश्वः । तथा अर्पिता न्यस्ता उर्वी महती सुगन्धिः सुरभिः स्रक् माला यस्यां तादृशी सती त्वं मया सह वस । प्रार्थनायां लोट् ॥ ९० ॥

सङ्गच्छेति । पुमांसं अर्हति तस्य हिताय वा भवति इति पौंसी तत्सम्बुद्धिः हे पौंसि । स्त्रीपुंसाभ्यां नञस्नञौ इति साधु । शोभते इति शुभा । कर्त्तरि कः । हे शुभे कल्याणि तरुणी त्वं स्त्रैणं स्त्रीयोग्यं स्त्रीहितं वा युवानं मां सङ्गच्छ अङ्गीकुरु, सदृशयोरावयोर्योग उचित इति भावः । ननु ममापि तादृशो भर्त्तास्तीति चेदाह राघव इति । राघवः रामः प्रोष्य देशान्तरं गत्वा पापीयान् पापतरः इति प्रोष्यपापीयान् विदेशे प्रोषितः सन्प्रतिगत्येन पापाचारः सम्वृत्त इत्यर्थः । प्रोष्यपापीया-नित्यत्र मयूरव्यंसकादित्वात् समासः । पापीयानित्यत्र पाप-यत्गण्णात् ईयसुः ततः सुप्रहद्दिनामिति यस्तोलुक् । अतः अकिञ्चनं नास्ति किञ्चन यस्येति तं दरिद्रमित्यर्थः, यद्वा "द्रविणे किञ्चनं क्लीबे" इत्यभिधानात् नास्ति किञ्चनं धनं यस्यासौ तं दरिद्रं तं जहीहि त्यज ॥ ९१ ॥

अघ्रीतेति । अघ्रीत पिबत इत्येवं नियोगः सततं भृत्य-

वशीकृत्य दशग्रीवं मोदस्व वरमन्दिरे ॥ ९२ ॥
मास्म भूर्ग्राहिणी भीरु गन्तुमुत्साहिनी भव ।
उन्नासिनी च भूत्वा मे वक्षःसम्मर्दिनी भव ॥९३॥
तां प्रातिकूलिकीं मत्वा जिहीर्षुर्भीमविग्रहः ।
वाङ्मपीड़मार्श्लिष्य जगाहे द्यां निशाचरः ॥९४॥

जनान् प्रति यस्यां क्रियायां सा अग्रीतपिवता तामाक्त इच्छतीति अग्रीतपिवतीयन्ती। मयूरव्यंसकादित्वात् आख्यात-माख्यातेन क्रियासातत्ये इति समासः। ततः स्त्रियामाप् आत्मेच्छायां क्यच्। तथा सरकर्म्मणि कामव्यापारे प्रसिता तत्परा सती प्रसितोत्सुकाभ्यां ढतीया च इति चकारात् सप्तमी। दशग्रीवं रावणं वशेकृत्य आयत्तीकृत्य। साधावसहति-त्वात् गतिसंज्ञा। वरमन्दिरे उत्तमगृहे मोदस्व सुखिता भव ॥९२॥

मास्मेति। हे भीरु भयशीले ग्रहातिं प्रतिकूलार्थमिति ग्राहिणी प्रतिकूलवर्त्तिनी मास्म भूः। मास्मयद्योगात् लुङ्। गन्तुं मदालयगमनाय उत्साहिनी उद्युक्ता भव। तथा उन्ना-सिनी अलङ्कारादिभिः शोभमाना भूत्वा मे वक्षःसम्मर्दिनी भव गाढ़ालिङ्गनेन मे उरःस्थलं निपीड़य इत्यर्थः। सर्व्वत्र ग्रहादि-त्वात् कर्त्तरि णिनिः ॥ ९३ ॥

तामिति। तां प्रतिकूलं वर्त्तते या सा तां प्रातिकूलिकीं प्रतिकूलवर्त्तिनीं मत्वा जिहीर्षुः हर्त्तुमिच्छुः, हृधातोः सन्नन्तात्, अतएव भीमविग्रहः भिक्षुरूपं विहाय धृतनिजभीषणाकारः

चस्यन्तीं तां समादाय यातो रात्रिञ्चरालयम् ।
तूष्णीम्भूय भयादासाञ्चक्रिरे मृगपक्षिणः ॥ ८५ ॥
उच्चैरारस्यमानां तां कृपणां रामलक्ष्मणौ ।
जटायुः प्राप पक्षीन्द्रः परुषं रावणं वदन् ॥ ८६ ॥

एते प्रकीर्णकाः । अतःपरं टाधिकारः ।

द्विषन् वनेचराग्र्याणां त्वमादायचरो वने ।

निशाचरः रावणः बाहुभिः उपपीड्य बाहूपपीड़ं बाहुभिः दृढ़ं धृत्वेत्यर्थः । सप्तम्याश्चोपपीड़े इति चकारात् तृतीयान्ते उपपदे णमुल् । द्यां आकाशं जगाहे उत्पपात ॥ ८४ ॥

चस्यन्तीमिति । चस्यन्तीं बिभ्यतीं तां समादाय बलात् गृहीत्वा रात्रौ चरतीति रात्रिञ्चरः । चरेष्टः, विकल्पेन मुमागमश्च । तस्य आलयं लङ्कां यातः गच्छतः रावणादिति शेषः । यातेः शतरि पञ्चम्यां रूपम् । भयात् मृगपक्षिणः तूष्णींभूय मौनमवलम्ब्य आसाञ्चक्रिरे स्थिताः । रावणभयात् सर्वे नीरवं तस्थुः इत्यर्थः ॥ ८५ ॥

उच्चैरिति । रामलक्ष्मणौ हा राम हा लक्ष्मण इति शब्दौ उच्चैरनीचैः रारस्यमानां पुनः पुनरुदीरयन्तीम् । रसेः शब्दकर्मकत्वात् क्रियासमभिहारे यङ् । भरतस्त्वाह रामलक्ष्मणौ उच्चैःरारस्यमानां आह्वयन्तीमिति । कृपणां दीनां तां सीतां । रावणं परुषं निष्ठुरं वदन् भर्त्सयन् पक्षीन्द्रः जटायुः प्राप सीतासमीपमभ्युपागमदित्यर्थः ॥ ८६ ॥

इतः प्रभृत्यधिकारकाण्डमुच्यते, यत्र प्राधान्येन एकैकं विषय-

अग्रेसरो जघन्यानां माभूः पूर्वसरो मम ॥ ८७ ॥
यशस्करसमाचारं ख्यातं भुवि दयाकरम्।
पितुर्वाक्यकरं रामं धिक् त्वां दुर्वृत्तमवपम् ॥८८॥

माश्रित्य व्याकरणलक्षणं प्रदर्शितं भवति तदधिकारकाण्डम्। तत्रापि लक्षणान्तरसम्बन्धात् प्रकीर्णतास्तीति सूचयितुं अन्तरान्तरा प्रकीर्णश्लोकाभिधानं दृश्यते। विवक्षितस्य सर्गार्थस्यापरिसमाप्तत्वात् सर्गमध्ये काण्डान्तरारम्भो न दोषाय एवञ्चायं सर्गो मिश्रक उच्यते द्वयोरप्यत्र प्राधान्येन विवक्षितात्। कीदृशं परुषं वदन्नित्याकाङ्क्षायामाह द्विषन्निति। वनेचराणां अग्र्याः प्रधानाः ऋषयः तेषाम्। रे वनेचराग्र्याणां द्विषन् हे ऋषिहिंसक। सम्बन्धे षष्ठी। वने आदाय सीतामिति शेषः। चरतीति चरः प्रयाणपरः जघन्यानां नीचानां अग्रे सरः प्रथमः त्वं मम पूर्वसरः मा भूः मम अग्रतो भूत्वा मा गाः। तिष्ठ ते प्रतिफलं दास्यामीति भावः। जघन्यशब्दस्त्वाह हे द्विषन् वने वनेचराग्र्याणां आदायचरः मधुकः त्वमिति ॥ ८७ ॥

यशस्करेति। यशः करोति इति यशस्करः। हेत्वर्थे टः। तादृशः समाचारः चरितं यस्य तं महनीयकीर्त्तिमित्यर्थः, भुवि पृथिव्यां ख्यातं प्रसिद्धं दयाकरं दयाकरणशीलम्। ताच्छील्ये टः। पितुः वाक्यकरं वाक्यकरणानुकूलं आज्ञाकरम्। धातुलोप्ये टः। रामं दुर्वृत्तं उपतापयन्तं अवपं परस्त्रीहरणेन निर्लज्जं त्वां धिक्, ते निन्दामु ॥ ८८ ॥

अहमन्तकरो नूनं ध्वान्तस्येव दिवाकरः ।
तव राक्षस रामस्य नेयः कर्म्मकरोपमः ॥ ९९ ॥
सतामरुष्करं पक्षी वैरकारं नराशिनम् ।
हन्तुं कलहकारोऽसौ शब्दकारः पपात खम् ॥१००॥

इति टाधिकारः । अतःपरं प्रकीर्णकाः ।

धुन्वन् सर्व्वपथीनं खे वितानं पक्षयोरसौ ।
मांसशोणितसन्दर्शं तुण्डघातमयुध्यत ॥१०१॥

अहमिति । हे राक्षस रामस्य नेयः वश्यः कर्म्मकरोपमः किङ्करतुल्यः अहं नूनं अवश्यं ध्वान्तस्य अन्धकारस्य दिवाकरः सूर्य्य इव तव अन्तकरः विनाशयिता । न त्वं रामस्य तुल्यप्रतियोगी, अतस्तद्भृत्योऽहं ते प्रतिफलमुचितं ददामीत्यर्थः ॥९९॥

सतामिति । सतां साधूनां अरुष्करं पीड़ाकरणशीलम् । अरुःशब्दः व्रणार्थकोऽपि पीड़ोपलक्षणपरः । वैरकारं विरोधकरणशीलं नराशिनं राक्षसं हन्तुं मारयितुं कलहकारः वाग्युद्धकारी असौ पक्षी शब्दकारःसन् घोरं निनादं कुर्वन्नित्यर्थः खं आकाशं प्रति पपात वेगेन उदगच्छत् । शब्दपातमिति पाठे शब्दस्य पाती यत्रेति खविशेषणं यावद्दूरं शब्दगमनं तावद्दूरमित्यर्थः । यद्वा शब्दस्येव पाती यत्रेति पतनक्रियाविशेषणं, एतेन यथा शब्दस्य शीघ्रगमनं तथास्येति ध्वनितं । वैरकारादिषु नशब्दश्लोकेति टे प्रतिषिद्धे अण् एव भवति कर्म्मण्यण् पाणिरक्षीति टाधिकारः ॥ १०० ॥

धुन्वन्निति । असौ जटायुः सर्वपथीनं सर्वेषां पथां व्यापिनं

न विभाय न जिह्राय न चक्लाम न विव्यथे।
आघ्नानो विध्यमानोऽपि रणान्निवहते न च ॥१०२॥
पिशाचमुखधोरेयं सच्छस्त्रकवचं रथम्।
युधि कद्रथवङ्गीमं वभञ्ज ध्वजशालिनम् ॥१०३॥

इति प्रकीर्णकाः। अतःपरम् आमधिकारः।

पक्षयोर्वितानं विस्तारं विस्तृतपक्षयुगलमित्यर्थः धुन्वन् कम्पयन् मांसशोणितसन्दर्यं कार्त्स्न्येन मांसं शोणितञ्च दृष्ट्वा रावणस्येति शेषः। कर्म्मणि दृगिविदोः साकल्ये इति णमुल्। तुण्डघातं तुण्डेन चञ्चा हत्वा अयुध्यत दैवादिकात् युध्यतेर्लङ्। तुण्डाघातैः शत्रोः शरीरात् मांसं कृन्तन् शोणितञ्च स्रावयन् युद्धमकरोदित्यर्थः ॥ १०१ ॥

नेति। आघ्नानः प्रहरन् पक्षी। आङोयमहन इति अकर्मकात् हन्तेरात्मनेपदम्। न विभाय तस्मात् न भीतः। न जिह्राय मया ताड़ितोऽपि न मृत इति लज्जितो न बभूव। न चक्लाम जितश्रमत्वात् ग्लानिं नाससाद। न विव्यथे सत्वाधिकत्वात् अवसादं न भेजे। तथा विध्यमानोऽपि परेण ताड्यमानोऽपि रणात् न निवहते च, अभग्नोत्साहत्वात् न पराङ्मुखो बभूव। अत्र यथाक्रमं भीङ्ह्रीक्लमव्ययनिपूर्वहृतधातूनां लिट् ॥१०२॥

पिशाचेति। युधि युद्धे पक्षी धुरं यहन्ति धौरेयाः पिशाचस्येव मुखं येषां तादृशा धौरेयाः यत्र तं पिशाचमुखधौरेयं सत् शोभनं विद्यमानं वा शस्त्रं कवचञ्च यस्मिन् तत् सच्छस्त्रकवचं ध्वजशालिनं ध्वजयुक्तं,शालिन् शब्दोऽयंतद्वत्तायां अस्त्यर्थे शालिन।

संत्रासयाञ्चकारारिं सुरान् पिप्राय पश्यतः ।
स त्याजयाञ्चकाराथ सीतां विंशतिबाहुना ॥१०४॥
असीतो रावणः कासाञ्चक्रे शस्त्रैर्निराकुलः ।
भूयस्तं वेभिदाञ्चक्रे नखतुण्डायुधः खगः ॥१०५॥

भीमं भयानकं रथं कद्रथवत् कुत्सितरथमिव । रथवद्योधेति कोः कदादेशः । बभञ्ज भग्नवान् । ध्वजशालिनमित्यत्र धातूनामनेकार्थत्वात् शालिरत्र दीप्त्यर्थे इति केचित् । एते प्रकीर्णकाः ॥ १०३ ॥

इतः प्रभृत्यामभिक्षत्याह संत्रासेति । स पक्षी अरिं रिपुं रावणं संत्रासयाञ्चकार भीतमकरोत् । त्रासेरकर्मकत्वात् अणिकर्तुः कर्मत्वम् । तथा विंशतिबाहुना रावणेन सीतां त्याजयाञ्चकार त्याजितवान् । गत्यर्थादिषु त्यजेरसंग्रहात् प्रयोजककर्तरि दृतीयैव भवति । अतः पश्यतः युद्धमवलोकयतः सुरान् देवान् पिप्राय प्रीणितवान् । प्रीणातेर्लिट् । अत्र त्रासनं सीतात्याजनं च देवानां प्रीतिकारणमिति भावः । स त्याजयाञ्चकारेत्यत्र संत्याजयाञ्चकारेति क्वचित्पाठः ॥१०४॥

असीत इति । असीतः त्यक्तसीतः अतएव निराकुलः पूर्वं बाहुभिः सीताग्रहणेन व्याकुल आसीत् अधुना तदभावात् सुस्थिरः शस्त्रैः उपलक्षितः रावणः कासाञ्चक्रे कुत्सितशब्दमकार्षीत् । एष्येहि खगाधम इत्युत्कटमाह्वयते स्म इति भावः । कास शब्दकुत्सायामिति धातोः लिट् । यद्वा धातूनामनेकार्थत्वात् शस्त्रैः कासाञ्चक्रे क्षयमगे इत्यर्थः । नखतुण्डानि एव आयु-

हन्तुं क्रोधवशादीहाञ्चक्राते तौ परस्परम्।
न वा पलायाञ्चक्रे विहंयाञ्चक्रे न राक्षसः ॥ १०६॥
उपासाञ्चक्रिरे द्रष्टुं देवगन्धर्वकिन्नराः।
छलेन पक्षी लोलूयाञ्चक्रे क्रव्यात् पतत्रिणः ॥१०७॥

धानि यस्य स तथोक्तः, खगः तं भूयः पुनरपि वेभिदाञ्चक्रे अत्यर्थं भिन्नवान्। नखाघातेक्षुण्णाघातैश्च शत्रुं क्षतविक्षतं चकारेत्यर्थः। भिदेर्यङन्तात् लिटि रूपं यङो लुक् च ॥ १०५॥

हन्तुमिति। तौ जटायुरावणौ क्रोधवशात् कोपाधीनतया परस्परं अन्योन्यं हन्तुं व्यापादयितुं ईहाञ्चक्राते चेष्टां कृतवन्तौ। विः पक्षी। वयतेरौणादिक इक्। नवा नैव। "वा स्यात् विकल्पोपमयोरेवार्थेऽपि समुच्चये" इति विश्वः। पलायाञ्चक्रे रणात् दुद्राव। परापूर्वस्यायधातोरूपं रिफस्य लत्वं। तथा राक्षसः न दयाञ्चक्रे पक्षिणं खल्वहं कथं व्यापादयामीति नानुकम्पामभजदित्यर्थः ॥ १०६ ॥

उपासामिति। दिव्यन्तीति देवाः पचाद्यच्। गानमेषां धर्मः इति गन्धर्वाः पृषोदरादित्वात् साधु। कुत्सिताः नराः किंनराः अम्रमुखत्वात्। ते द्रष्टुं युद्धदर्शनाय उपासाञ्चक्रिरे तयोरन्तिकमाजग्मुरित्यर्थः। क्रव्यं मांसमत्तीति क्रव्यात् राक्षसः। अत्तेः क्विप्। पतत्रिणः पक्षी छलेन प्रसह्य जेतुं न शक्नोतीयमिति मायया लोलूयाञ्चक्रे अत्यर्थं चिच्छेद। लूधातोर्यङि लिटि ततो यङोलुक्। छलेनेत्यत्र बलेनेति पाठान्तरम् ॥ १०७ ॥

प्रलुठितमवनौ विलोक्य क्षत्तं
दशवदनः खचरोत्तमं प्रहृष्यन्।
रथवरमधिरुह्य भीमधुर्य्यं
स्वपुरमगात् परिरुह्य रामकान्ताम् ॥१०८॥

इति श्रीभट्टिकाव्ये पञ्चमः सर्गः।

प्रलुठितमिति। खे चरन्तीति खचरास्तेषां उत्तमं खचरोत्तमं जटायुं क्षत्तं लूनपक्षं अतएव अवनौ भूमौ प्रलुठितं विलोक्य प्रहृष्यन् निहतो विघ्नकारीति हर्षमनुभवन् दशवदनः भीमधुर्य्यं भीषणाक्षं रथवरं स्मरणादुपस्थितं पुष्पकाख्यं स्यन्दनश्रेष्ठं अधिरुह्य रामकान्तां सीतां परिरुह्य तथैव धारयित्वा स्वपुरं लङ्कां अगात् अगमत्। रुहधातोर्लुङि रूपम्। पुष्पितामाख्यवृत्तमिदं लक्षणं तूक्तम् ॥ १०८ ॥

इति भट्टिटीकायां पञ्चमः सर्गः।

# BHATTIKAVYAM.

## ENGLISH TRANSLATION.

### CANTO. I.

1. There lived a king celebrated by the name of Dasaratha, who was a friend of the gods and a vanquisher of his enemies; and who was versed in sacred lore, and so eminent in virtues that the eternal being himself, on the pretext of doing good to the world, became incarnate only to have him for a father.

2. He studied the Vedas, offered oblations to the gods, propitiated the manes, honored his friends, triumphed over the passions, delighted in the study of moral science, and destroyed his foes root and branch.

3. He gave away riches as a cloud pours down water, sat in the same seat with the king of heaven, did not worship any other god than the three-eyed one and eclipsed the glory of all (the most renowned) archers.

4. Being holy, esteemable and surrounded by a host of distinguished Brahmans, he gratified by his offerings the dwellers in heaven, and flamed forth in his might for the welfare of the world like the fire consecrated at a sacrifice.

5. Having spotless reputation and resembling the god of a hundred sacrifices, he lived in Ayodhya as his capital, which was pleasant in all the seasons, and inhabited by Brahmanas of bright intellects, and in grandeur rivalled the metropolis of heaven.

6. With the rays of its gems streaming to the sky, that city stood, as it were laughing to scorn the capital of Indra, and seemed as a perfection of Brahma's skill so conspicuous in the work of creation.

7. In it were mansions, containing pearls, diamonds, and minerals of various hue, which had parterres attached to them, and were inhaibted by damsels as fair as bevies of Apsarasas, and thus resembled the peaks of Meru.

8. The glittering rays of the jewels contained in the houses of that city, flashing through the numerous windows, appeared like the crystal waters of the Ganges pouring down from a ravine of the Himalaya.

9. As a scholar is attached to the sciences, so was the king to his three noble wives whom he had married in due time; who were pious and respected by the people, and were so blessed as to contribute to his pleasure, wealth and fame.

10. Desirous of having sons, he resorted to the help of fair ones and thus enticed away to his capital the sage Rishya-s'inga, in whose mind true wisdom was developed, and who being

enlightened, high-minded and skilful in the performance of a sacrifice, was revered by all.

11. The king, who was possessed of self control, asked that prince of sages to perform a sacrifice in order that he might obtain sons. Then that skilful priest being informed of his wish commenced a ceremony certain to produce male offspring.

12. Having expelled evil spirits from the vicinity of the altar by conjuration, offered oblations to the principal deity and his attendants, and cast certain figures made of pounded rice into the sacred fire, the great sage offered a prayer that the king might obtain a son.

13. The people invited there having been satisfied with gifts the sacrifice was concluded, and the three queens of high pedigree partook of the remainder of the offerings in such a manner as to give birth to four sons.

14. First of all Kaus'alya was delivered of Rama with ease, next Kaikeyi bore Bharata, and then Sumitra alone gave birth to Lakshmana together with S'atrughna celebrated for noble deeds.

15. The learned sage Vas'ishtha, the first of ascetics, having expelled evil spirits, honored, and distributed rich presents among the Brahmans, and then performed in due time the ceremony of investing the princes with the sacred thread.

16. The princes studied the entire Veda with its attendant sciences, and became initiated into the use of arms which yield victory. They were moreover so endowed by nature as to appear equally captivating to men of various dispositions.

17. After that the son of Gâdhi whose sacrifice had been

interrupted by demons, came to the king to ask for Rama's protection, and he with curd and honey in his hand paid him due homage.

18. Has that meditation of thine, said the king, been undisturbed, which thou hast commenced in order to triumph over the evil of transmigration, and pursued with a total disregard to sensuous impressions, and by means of which thou hast penetrated into the mysteries of things.

19. That meditation of mine, the sage replied, is tolerably safe; but demons have infested our sacrifice in the forest, and I pray that Ra´ma, the vanquisher of his foes, may destroy them with the help of Lakshmana.

20. On hearing this the king, unable to bear the thought of being separated from his son, fell into a swoon. Then the great sage so haughty in his temper, thus addressed the blessed king.

21. "From the dread of demons, I have sought for thy protection as thou wouldst ask for our help in performing religious rites. Brahmans and Kshetriyas are destined to help each other; so banish all fear and permit thy son (to accompany me.)"

22. "I predict that thy son will stand foremost in the field of battle and slay Ravana, that mighty foe of all; so do not O great king! reject my suit, for a sage like myself will never entrust inferior men with the accomplishment of great enterprizes.

23. The king at first thought that the fire of the sage's wrath, if kindled, would consume his race into ashes; while on the other hand, to part from his son would be most agonizing to him. Thus wavering for a while, he at last consented to his son's departure.

24. Then the sage, well satisfied with the king, honored him with benedictions, and set out for his hermitage The prince equipped with flashing arms for the destruction of demons, submissively followed him as he led the way.

25. The countenance of the victorious Rama brightened up at the thought of seeing the sacred grove, and the firm-minded Lakshmana, that favourite of the three mothers, who had mastered the science of war, followed him ever intent on his welfare.

26. When the lion of the house of Raghu firmly grasping a great bow, the terror of his foes, and being equipped with arrows and a finger-protector, was setting out for the forest, desirous of destroying the demons; the damsels of the city, his well-wishers, owing to their great grief, with difficulty abstained from crying : for that would have been a bad omen.

27. Then the Brahmanas loudly chanted benedictions on the prince, and the others struck cymbals of loud and pleasing tone ; the auspicious birds chirped merrily, and the prince felt his right arm throb gracefully, auguring well for the fulfilment of his desire.

---

## CANTO. II.

### ENGLISH TRANSLATION.

---

1. Having come out of the town, the prince beheld all around him, the signs of autumn, at which season trees, lakes, brooks, stars and the sky look gay and serene.

2. The red lotuses, struck by the waves, were oscilating; their leaves, moving to and fro, appeared like flickering lights, and the black-bees seated on them being agitated looked like curling lines of smoke.

3. The banks of the lakes beholding their own glory appropriated by the water in which were reflected the trees on their margin, imitated the beauty of the water-lilies with the smiles of the land-lotuses.

4. At the dawn of day, the trees growing on the banks, from the extremeties of the leaves of which fell transparent drops, seemed as if bewailing the fate of the Kaumudi, with the humming of bees and with the dews of night which resembled tears.

5. The woodland and the water beheld, as it were, each other's charms with a feeling of astonishment and eagerness; the flowers blooming in the one and the lotuses floating on the other had black-bees seated on them, and thus appeared like eyes.

6. As it trembled in the morning breeze, the lotus seemed as if expelling the black-bee, which was embrowned with the dust of the Kaumudi; just like a proud damsel who had become indignant at the flirtations of her lord with her rival.

7. The hunter though desirous to slay the stag, which stood still absorbed in the sweet hummings of the bees, could not take aim at his mark, while he listened to the noise of the excited swans.

8. A cloud which caused the rivers to rise by its showers, but which now appeared as white as snow for want of water,

was seen agitated by the wind, and moving about the ridge of a mountain like a second Himalaya.

9. In a well-watered upland-grove beside a river, a lion roared, and deceived by the echo of his own voice, thought that it was the roar of a rival; so he was in a rage and crouched ready to spring on him.

10. The prince beheld many a lotus blooming in the lakes, listened to the humming of black-bees, and smelled the sweet breeze as it blew laden with the perfume of the lotuses over which it had passed.

11. He drew towards him many a creeper and plucked its flowers, descended to many a brook and rinsed his mouth with the water, and out of curiosity sat himself down on many a slap of rock with a smiling countenance.

12. At day-break he saw in the east waters so gilt with the rays of the sun as to appear like a sheet of the son's light, that had poured down in the form of rays, and collected on the face of the earth.

13. He saw with delight the rows of paddy plants, which were captivating to the sight, and extended as far as the eye could reach: their clumps looked clean and smooth, and stretched up straight, between which no weeds were allowed to grow.

14. He saw settlements of cow-herds inhabited by country-folk, who never knew pangs of separation from their dear ones, paid their due tribute to the king regularly, were free from deceit and destitute of all artificial decorations.

15. He was delighted at beholding in the milk-maids that modest deportment which is regarded as an ornament of the fair-sex ; he was also pleased with their charming looks which were free from coquetry, and with their simple dispositions which inspired confidence.

16. At the time of churning, the graceful movements of the milk-maids, the turning of their sides, and the heaving of their hips, were as gratifying to him as a dance with which the low deep murmur of the churning, as it were, kept time.

17. A herd of deer of various hue, which on the disappearance of clouds had come forth into the forest, and looked gay, bounded by him vigorously and ran in the direction of the wind exciting his interest.

